**************************************************
* ii"svarapratyabhij~naakaumudii by bha.t.taaraka sundara
*
* research and publications department, jammu and kashmir government,
* srinagar manuscript no. 1089
* no. of folio : 82
* pages : 164
* size of ms 20.3 cm x 14.5 cms
* script : "saradaa
*
* data entered by the staff of muktabodha
* under the supervision of mark s. g. dyczkowski
*
* licenced for use under the creative commons non-commercial attribution licence
*
* revision 0 february 9, 2009
*
**************************************************

ॐ नमः श्रीगणाधिपतये सवल्लभाय नमो नमः॥

ॐ श्रीविद्यपादुकाभ्यो नमः॥

ॐ नमः शिवाय॥

ॐ यत् तत् सत् परमप्रकाशमहमित्यन्तःस्फुरच्चिद्घनं

यन्मात्रादित्रयात्मविश्वमखिलप्रोल्लासयत्यन्यथा॥

यत्रोदेति परापारापरतरा चिच्चन्द्रश्यौतिच्छजा

श्रीसादादिधरान्ततत्वप्रभवं सैवं महः स्ताच्छ्रिये॥ १॥

ॐ श्रीत्रैयम्बकनाथमाद्यगुरुभिर्वन्द्यं तथैवापरं

सोमानन्दमथोत्परं गुरुवरं श्रीलक्ष्मगुप्तं तथा॥

श्रीमच्चुक्खलकं तथा परतरं श्रीशम्भुनाथं गुरुं
श्रीभट्टारकमाश्रये भिनवगुप्ताख्यं च भट्टारिकाम्॥ २॥

ॐ हेरम्भवटुकौ स्तौ मे प्राणापानौ विभूतये बहिरन्तश्चरौ
शुद्धौ प्राणभ्यद्देहधारकौ॥ ३॥

ॐ यदन्तन्निखिलं विश्वं दर्पणेन गतादिवत् मात्रादिशूलभा
रूपा सा काचिच्चित् सुधाच्छजा॥ ४॥

ॐ महायास्तात् स्वेष्ठदेवी शिवशक्त्यैक्यभाविनी।
बहिरन्तश्चारशीला चित्क्रियाज्ञानरूपिणी॥ ५॥

सादादिगर्भपीनाङ्गी श्रीविद्या साधकेष्ठदा।
मामाविश्य मदज्ञानतमोविध्वंसवयम्॥ ६॥

प्रत्यभिज्ञां विलोक्यैव गद्यैः पद्यैश्च गुम्फिताम्।
विद्यन्तिपाठकाः सर्वे नो शक्तावयमित्युत॥ ७॥

तदहं सरलांसद्वीं? पाठकामोदनिर्भरां।
विमर्शिनीं करोम्यद्य गद्यमार्गानुसारिणीम्॥ ८॥

श्रीमच्छ्रीपूर्वगुरुभिः सूत्रितायाद्विसङ्ख्यया।

शतयोः प्रत्यभिज्ञाया यथा गुरुनुसारतः॥ ९॥

हसन्तु वाथ निन्दन्तु शक्तिपातलसच्छजाम्।

रोद्धुकामः कः प्रसरदधो भुवनजं पयः॥ १०॥

क्षमन्तु गुरवः पुन्ये सहा याः सन्तु चापरे।

करोमि विवृतिं लाघ्वीं यथाबुद्ध्यनुसारतः॥ ११॥

इह खलु प्रेक्षावन्तः स्वार्थपरार्थकारुण्यादीन्

हृदन्तन्निधाय प्रवृत्तिनिवृत्ति कर्तुं प्रारिप्सन्ते।

तदन्यथोपपत्यान्यथोपपत्तेच्चेत्येवं

साम्प्रदायिकसम्प्रदायक्रम इति सिद्धोयं

शास्त्रविदुपदेशक्रमः॥

अथ च परार्थकारुण्यातया शास्त्रमभिदधानः।

स्वात्मपरमेश्वरतादात्म्यनुभवहेतवे परत्र

समस्तसंपत्समवाप्तिप्रयोजनावसरवर्तनाय (दादा?) च

शास्त्रार्थमवतारयति ग्रन्थकारः॥

ॐ कथञ्चिदासाद्य महेश्वरस्य दास्यं

जनस्याप्युपकारमिच्छन्॥

समस्तसम्पत्समवाप्तिहेतुं तत् प्रत्यभिज्ञामुपपादयामि॥ १॥

कथञ्चित् पूर्वोल्लङ्घितजन्मजन्मानन्तरं महेश्वरस्य

दास्यमासाद्य। समस्तसम्पत्समवाप्तिहेतुभूतां

तत्प्रत्यभिज्ञां तस्येश्वरस्य प्रतीपमाभिमुख्येन ज्ञानं

उपपादयामि शब्दानुवृत्या स्वरूपेण भावयामि यतो दि

जनस्याप्युपकारमिच्छन्॥ तदभ्यासान्न भवमात्रेणैव हि तत्

तदभिमतसिद्धेः॥

इत्येवमादिसूत्रपदयोजना॥

२अ) एवं हि सामान्यतोऽर्थः विशेषतश्चाहुः ननु महेश्वरस्य

दास्यमित्यत्र को नाम महेश्वरः। वा देहो जडः(?) वा

ज्ञानेन्द्रियाणि वा कर्मेन्द्रियाणि वा प्राणः वा मनः।

अहङ्कारो वा। वा बुद्धिः। वा तेषां संघात इति इत्यत्राहुश्च

महेश्वरो हि नाम महांश्चासावीश्वरो मं महेश्वरः॥

ऐश्वर्यादिगुणगणसम्पन्नः। अत एव च परमः। उत्कृष्टतम इति

सर्वमयः। सर्वव्यापी सर्वस्वभावः। सर्वोत्तीर्णस्वभावश्चेति चोच्यते॥

तथा च प्रत्यभिज्ञायामेव॥

विश्ववैचित्र्यचित्तस्य समभित्तितलोपमे।
विरुद्धाभावसंस्पर्शे परमार्थसतीश्वरे॥ १॥

प्रमातरि पुराणे तु सर्वदा भातविग्रहे।
किं प्रमाणं न वाभासः सर्वप्रमितिभागिनि॥ २॥

मेयं साधारणंमुक्तः स्वात्माभेदेन मन्यते।
महेश्वरो यथा बद्धः पुनरत्यन्तभेदवत्॥ ३॥

स्वात्म वै सकृजन्थ?नामेक एव महेश्वरः।
विश्वरूपोऽहमिदमित्यखण्डामर्शबृंहितः॥ ४॥

इत्थं तथा घटपटाद्याभासजगदात्मना।
तिष्ठासो नेवमिच्छैव हेतुना कर्तृता क्रिया॥ ५॥

तथा च तन्त्रालोके॥

अनस्तमितभारूपंस्तेजसां तमसामपि।

य एकोऽन्तर्यदन्तश्च तेजांसि च तमांसि च॥ १॥

स एव सर्वभावानां स्वभावः परमेश्वरः॥ २॥

भावजातं द्रितस्यैव शक्तिश्चेश्वर ता?मयी।

शक्तिश्च शक्तिमद्रूपाद् व्यतिरेकं न वाञ्छति॥ ३॥

२ब्) तादात्म्यमनयोर्न्नित्यं वह्निदाहकयोरिवे।

स एव भैरवो देवो जगत्कारणलक्षणः॥ ४॥

स्वात्मादर्शे समग्रं हि यच्छक्त्या प्रतिबिम्बितं।

तस्यैवे वा? परादेवी स्वरूपामर्शनोत्सुका।

पूर्णत्वं सर्वभावेषु यस्य नाल्पं न चाधिकम्।

एष देवोऽनया नित्यं देव्या क्रीडारसोत्सुकः॥ ६॥

विचित्रान् सृष्टिसंहारान् विधत्ते युगपद् विभुः।
अतिदुर्घटकारित्वमस्यानुत्तरमेव तत्॥ ७॥

एतदेव स्वतन्त्रत्वमैश्वर्यं बोधरूपत्।
परिच्छिन्नस्वभावत्वं हारुस्य? किल लक्षणं।
जडाद् विलक्षणो बोधो यतो न परिमीयते।

एवमस्य स्वतन्त्रस्य निजशक्त्यपभेदतः।
स्वात्मगाः सृष्टिसंहाराः स्वरूपत्वेन संस्थिताः॥ ९॥

प्रकाशो नाम यश्चायं सर्वत्रैव प्रकाश्यते।
अनपह्नवनीयत्वात् किं तस्मिन् मानकल्पनैः॥ १०॥

प्रमाणान्यपि वस्तुनां जीवितं यानि तन्वते।
तेषामपि परो जीवः स एव परमेश्वरः॥ ११॥

कामिके तत एवोक्तं हेतुवादविवर्जितं।
तस्य देवादिदेवस्य परापेक्षा न विद्यते॥ १२॥

परस्य तदपेक्षत्वात् स्वतन्त्रोऽयमतः स्थितः।

विभुत्वात् सर्वगो नित्य भावादाद्यन्तवर्जितः॥ १३॥

विश्वाकृतित्वाच्चिदचित्तद्वैचित्र्यावभासकः।

३अ) ततोस्य बहुरूपत्वं प्रोक्तं दीक्षोत्तरात्मिके॥ १४॥

भुवनं विग्रहो ज्योतिः खं शब्दो मन्त्र एव च।

बिन्दुनादादिसंभिन्नः षड्विधः शिव उच्यते॥ १५॥

यो यदात्मकताविष्ठस्तद्भावं संप्रपद्यते।

व्योमादिशब्दविज्ञानात् परो मोक्षो न संशयः॥ १६॥

इत्यादिना बहुबहुश एव श्रीमदभिनवगुप्ताचार्यपादाः॥

विनत्यवितन्यन् (?) तन्त्रालोकादौ तथा चोपनिषत्सु॥

आनन्दादेव खल्विसानिर्थतानि जायन्ते आनन्दे प्रवधन्ते। आनन्द

एव प्रणीयन्ते। आनन्द एव पिधानत्वं यान्ति। आनन्ददेवाघ्नः?

नुग्रही भवन्तीति ब्रह्म। आनन्द इति॥ आनन्दं ब्रह्मणो विद्वान् न

विभेति कुतश्च नेति च॥ यतो वाचो निवर्तन्ते ह्यप्राप्य मनसा सह।

आनन्दं ब्रह्मणो विद्वान् न विभेति कुतश्च नेति या॥ यतो वे मानिर्थतानि जायन्ते। येन जातानि जीवन्ति। यस्मिन्नभिसंविशन्ति। यस्मिन् प्रलीयन्ते। तद्विजिज्ञासस्व तद् ब्रह्म॥ तत्र ब्रह्मेति नाम बृह बृह बृद्धौ॥ एकत्वे सति बहुत्वसम्पन्नत्वेन वा सम्पादनत्वेन च वृद्धिमापन्नः सनी ब्रह्मेत्युच्यते॥

तथा च॥

सदा सृष्टि विनोदाय सदा स्थिति मुखासिने।
सदा त्रिभुवनाहारब्दण्डायस्वामिनेन म इति॥

विश्ववैचित्र्यचित्तस्य समभित्तितलोपमे।

इत्यादिना च॥

प्रत्यभिज्ञयां एवमस्य ब्रह्मसंज्ञा॥
तत एव चोभयन्छायाधारित्वाच्चिदचितोन्नपुंसकनित्रेशः॥
न तु ब्रह्मेति नपुंसकत्वं शिवस्य स्यादिति न विनोधः॥ इत्यलं॥
तथा च वेदः॥ प्रजापतिश्चरतिगर्भेन्तर्जायमानो बहुधा विराजते। तस्ययोनिं परिपश्यन्ति धीनास्तस्मिंस्तिष्ठन्ति

(प्रभिकौ?)

३ब्) भुवनानि विश्वाः॥ वेदाहमेनं पुरुषं
महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वाति
मृत्युमेतिनान्यापन्था विद्यतेयनाय॥ ये देवत्ये आतपते। यो
देवानां पुरोहितः। पूर्वो यो देवेभ्यो जातः॥

न च रुचाय ब्राह्म्यं रुचं ब्राह्म्यं जनयन्तो देवाः अग्रेयद्
ब्रुवनी विद्यास्तस्य देवा आसन्धशीः श्रीश्चते लक्ष्मीश्चते।
पत्न्या अहोरात्री। पार्श्वेनक्षत्राणि॥ रूपमश्विनौ व्याप्तं॥
अर्धमासामासाधतवः परिवत्सराः न सत्सृशंतिष्ठन्ति।
रूपमस्य न चक्षुषा पश्यति कश्चनैनं हृदामनीषा
मनसाभिरतप्तोय एवद्विद्वरमृतास्ते भवन्ति॥ हिरण्यगर्भः
समवर्तताग्रे भूतस्यजातः पतिनेक आसीत्। सदधार पृथिवीं
द्यामुतेमां कस्मैदेवाय ह विषाविधीम इत्यादिना॥

तथा च। नाना विधवर्णानां रूपं धत्ते यथा मलः
स्फटिकः। सुरमानुष्यपशुपादपरूपत्वं तद्वदीशोपि॥

गच्छति गच्छति जल इव हिमकरविश्वं स्थिते निर्थतिंयाति।
तनुकरणभुवनवर्गे तथा यमात्मा महेशानः॥

तत्रान्तर्विश्वमिदं विचित्रतनुकरणभुवनसन्तानं। भोक्ता च तत्र देहे शिव एव गृहीतपशुभावः॥

इत्यादिना बहुधापरमार्थ सारांजो? प्रोक्तगुणगणोयं परमशिवः परमेश्वरश्चिन्दचिन्दुत्तिस्सर्वस्य स्वात्मा महेश्वर इति सिद्धः॥ तन्मयमेवबीजभूतस्सर्वस्य बीजप्रधान इति कथ्यते॥

अनादिमानप्रतिमस्वभाव इति गीतास्व [ अन्वान्यः साङ्गादिभिः प्रकृति पुरुष व्य?जेन। मीमाकैवर्मकर्म?व्याजने तार्किकैरनुमानादि व्याजेन च

अनादिमत्पनं? ब्रह्मेति च

* * इति? श्रुति विकल्पमविकल्पादि व्याजेन च। रैयायि कैवा देवबुद्धिप्राणशा *?व्याजेन च **** *? न्नसारतः प्रमाणीर्थतमस्त्य? प्रमाणतयैव। तत्मन्वमाविद्यकमेव। विद्वतत्त्युविधा * * * * * * ? पमुखमालिन्य हेतुमेव निर्मल दर्पण स्वासकालष्य विरचतं देविहासौ *?]

[तथा च मुक्तवल्यां अविद्या योनिजाभावाः सत्यम् बहुधा इव। क्षणमुद्भूधागच्छन्ति ज्ञातैकसागरे लयम्। मृदादीनां

कारणत्वं यदिनेष्टं घटां प्रति अविद्यायाःकारणत्वं
कथं सिद्धेतुसांविदा॥ २॥ तथा च वशिष्ठपादैः॥
तस्मिंन्चित्दर्पणेच्छरेसमस्ता? वि * * * * * * ** ** * **?]

[* ? भगवद्वाक्यते। यथा तदीनां बहवो स्ववेगा
इत्यादिनातन्नैव ततो? * * * *?]

४अ) एवं बहुधाविराजमानो बहुधाव्याप्त इति बहुश एव कृत
परिणामो विराडिति च कथ्यते॥ नन्व्वेकस्येवं भूतस्य
कथमनेकपरिणामः॥ एकस्येकत्वादेव। अनेकस्याचानेकत्वा
वगमात्॥ यथा गौरयं वा गौरियमिति चैकरोत्वावगमः॥
तथैतागावः पश्योद्यानोपविष्ठा इति॥

इत्यत्रानेकस्यानेकत्वा देव॥ इत्यनेन कथमेकस्यानेकत्वावगमः
॥ अत्रोच्यते॥ ठ सर्वत्रैवपुराणेति हास
वैष्णवशैवयोगव्याकरणादि ष्वेकस्यानेकत्वावगमः सिद्धः॥
तथा हि॥ जन्माभ्यस्य यतोन्वयादि तरतश्चार्थे ष्वभिज्ञः
सुराय्ते?ने ब्रह्महृदाय आदिकवये मुह्यन्ति यत्मुरयः तेजोवारि
मृदां यथा विनिमयो यत्र त्रिसर्गो मृषाधाम्ना स्वेन
सदानिरस्त कुहकं सत्यं परं धीमहि॥ १॥

अत्र पुराणादावेवास्य जगतोजन्मादि प्रोक्तं॥ इत्यनेनैकत्वेपि सति बहुधात्वं सिद्धमेव। अर्थेषु चाभिज्ञ अहमिति स्वरूपतया॥ य एव च ब्रह्मण आदिसृष्टुन्येदादिदाता च॥ यत्र च सूरयो मुह्यन्ति ॥ यतो वाचोनिवर्त्तन्त अप्राप्यमनसा सहेति॥ तेजो वारि मृदां यद्वद्विनिमयो भ्रमस्तथा जगन्मृषेति तत्र ब्रह्मणि॥ स्वेन च धाम्नाय च क एवा द्वितीयः सिद्धः। तमेवं भूतमद्वितीयं सच्चिदानन्दं ब्रह्मसत्यं धामृधीमहि ध्यायेम। नुम इति सर्व विघ्नोपशमायेत्यर्थः॥ [यथा वा। अधोधोविनिविष्ठेषु भेद संख्येषु धामसु। एकं बिन्दुरथापि प्रादन्येषु पाक्तताान्त्यगा *?। ठ स्वपृष्ठगां च तां सङ्घं विनिविश्यैकतः कि?पेती। इत्यादिनाचैकस्येव बहुत्वापादानं॥ ]

[यथा ह्याचौतत्रमासानु?सारेण तद्युक्त्याश्रयेणच। मुखं बिन्दुं कृत्वाक्त च युगमःअस्तस्य अदाधोहराध्वं योध्यायेदित्यात्युपदेशानुसारेण परमोपदेशगत्यावायु *? दा ज्ञाते परमार्थे कुण्डलिनीं त्रिकोण कृतिं विभाव्य बिन्दुत्रयकोणत्रय सुत्तिं? च। *?त्स्वरूप एवा कारादि क्षकारान्तवर्णप्रत्ययः। लिप्याकारेण। आधारत्वाश्चत्तस्यास्त्रिकोणा कृरिति सद्धोशमुपदेशमार्ग एकस्यैव बहुधाकृत्या यवैकस्या एवर्थ मेराणा?र्थताया मु?हस्त्रल्लक्ष्यपरात पर्यन्ताधीय सङ्घ]

४ब) तथा च साङ्ख्य अपि॥ मूलप्रकृति रविकृतिर्महदाद्याः प्रकृति विकृतयः सप्त षोडशकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः॥ इत्यत्रैकस्यैवानेकत्वं सिद्धं॥ अथ च॥

तत्रैव॥

जन्ममरणकरणानां प्रतिनियमादयुगपत् प्रवृत्तेश्च॥ पुरुष बहुत्वं? सिद्धं त्रैगुण्यविपर्ययाश्चैव॥ इत्यादिना एवं सर्वत्र यथोक्तेषु ग्रन्थेष्वेकस्यैव बहुविधत्वं प्रसिद्धमेव॥ कवयोपि चैकस्य मुखस्य वा चन्द्रमस अनेकत्वं यथा बर्णयन्त्येव॥ मुखकमलमिति॥ यन्मुखं स चन्द्र इति॥ एवमेव बहुधात्वं वर्ण्यन्ते॥ चन्द्रमसोप्येवमेव।
पश्यचन्द्रमुखिचन्द्रमण्डलं व्योममध्यसरसीसरोरुहम्॥
इत्यादिना॥ अत्र च कवयः किं न वक्ष्यन्तीति॥ एवं च वैयाकरणा अपि॥ तद्यथा॥ ह्रस्वदीर्घप्लुतत्वाश्चत्रैसुर्योपनयेन च सानुनासिक्य भेदाश्चाप्य कौरष्ठादशात्मक इत्येकस्या कारस्याष्ठादशात्मकत्वं॥ अथ च सम्स्कर्ता। इत्यस्यर्थं पस्याष्ठाधिकशतात्मकत्वं प्रसिद्धमेव शेषपाणिनि वररुचि नानामतेषु॥ यथा॥ सम्स्कर्ता॥ सम्स्कर्ता॥ इत्यत्र समः सुटि॥ अलोन्त्यस्य॥ अत्रानुनासिकः पूर्वस्य तु वा॥ अत्ररुप्रकरणेन

पूर्वस्यानुनासिको वा स्यात् पखरवसानयोन्विसर्जनीयः॥
विसर्जनीयस्य सः इति प्राप्त [अनुनासिकात्परोनुस्वातः मननामिकं
विहाययरोः? पूर्वस्मात्परोनु स्वारा गमः स्यात्] तद्प वा
देवाशरीति पाक्षिके विसर्गे प्राप्ते।

५अ) तथा हि। रस भावतद्भासभाव शन्त्यादिरक्रमः
भिन्नोरसाद्यलङ्कारादलङ्कार्यतया स्थितः॥ तत्र
रसोमासपद्यस्य वा गद्यस्य च जीव इति कथ्यते। व्यज्यापरनामा
भोरट पर पर्याय इति रस तत्वविदः॥ मानकरसत्या येन
चर्वणात्मा घण्टानुरणवत् सर्वत्र संबोध्यः संश्राव्यश्च
तं विना हि कार्या भावाद्यत्र तत्र बोद्धव्यः॥ न हि निर्जीवं
शरीरं क्वाप्युपयुक्तम्॥ इत्यलंङ्कार संयुक्तानां सो
वक्तव्यः।

५ब) संस्स्कर्ता? संस्स्कर्ता?॥ १॥

समोवालोपमेके इति भाश्य लोपस्यापिरुप्रकरणस्था
त्वादनुस्वारानु नासिकाभ्यामेकसकारर्थं पद्वयं द्विस
कारंत्चक्तं?॥ २॥

तत्रा न चिचेति सकारद्वित्वपकेत्रिसकारमपि रूपद्वयं॥ ३॥

अत्रस्वानु विसर्गजिह्वामूलीषो?
पस्मानीययमानामाकारोपरिशषु? च
पाठस्योपसङ्ग्या?नत्वेनानुस्वारस्याप्यश्त्वात्॥ अनुनासिकवतां
त्रयाणां शरः खश इति कद्वित्वेषट्॥ ६॥

ततोनुस्वारव वतामनुस्वारस्यापि द्वित्वे द्वादश॥ १२॥

एवमष्टादशानां तकारद्वित्वे। वचनान्तरेण पुनद्वित्वं च॥
जातं॥ भेदाः॥ ५२॥ एकतं द्वितं त्रितं चेति चतुष्पञ्चाशत्॥ ५४
॥ तत्राणोनुनासिकत्वेष्ठोत्तरशतं॥ १०८॥

इत्येवमेकस्यैवाष्ठोत्तरशतं। कथं द्रा?तमिति भावः॥
एतदेव च स्फुटी क्रियते॥ तथा हि॥ सँस्स्कर्ता संँस्स्कर्ता॥ सँस्कर्ता
। संस्कर्ता॥ सँस्स्स्कर्ता॥ संस्स्स्कर्ता
तत्र संस्स्क्कर्ता। संस्क्कर्ता॥ संस्स्स्क्कर्ता॥ तत्र येषां न॥ तेपि
भेदाः॥ ३॥ जातं प्रथमं भेदाः॥ ६॥ एषां षण्णामपि
अनुस्वारद्वित्वे। जातं। १२। अनुनासिकवतां कद्वित्वे षट्॥ जातं। ६
। ६। ६। भेदाः। १२। तत्र येषां तकारद्विद्वं। ते। १२। येषां न

तकारं द्वित्वं तेपि॥ १८। येषां व्रूचनान्तरेण अनचिचेति।
त्रिन्वं। तेपि भेदाः। १२। येषां न। ते पूर्वमेवद्वितत्वेन
प्रतिपादिताः। जाताः भेदाः॥ ५४॥ तेषां च भेदानां। ५४।
दधिँ। दधि इतिवत् भेदाः॥ १०८॥ एतदेवचाति शुधी क्रियते मया॥
अनुस्वारवतां त्रयाणां कत्वित्वे। प्रथमं॥ ६॥ तेषां
यण्णामप्यनुस्वार द्वित्वेन॥ १२॥ तथानुनासिकवतां कद्वित्वे॥ ६
॥ एवं भेदाः॥ १२॥ तत्र येषां तकारद्वित्वं। ते॥ १२॥ येषां न
तकारद्वित्वं॥ तेपि॥ १२॥ येषां वचनान्तरेण त्रितत्वं॥ ते॥ १२॥
येषां न। ते पूरुमेवद्वि तत्वेन॥ जाताः॥ ५४॥ तेषामेव च।
अणुप्रगृह्यस्यानुनासिक इत्यनेन॥ दधिँ। दधि इतिवत् जाताः॥ १०८॥
तदनेनाष्ठोत्तर शतभेदाः। कथमेक न *? व जाता इति
वदत्रापिज्ञेयमितिभावः॥ १०८॥ तथा चालङ्कार रस चर्वण
तृप्तात्मनस्तुमम्म जालकादयोपिह्येकस्यैवरसस्य दशसाहस्त्र
स्वरूपत्वमभि व्यक्ती क्रियन्त एव [अस्फुट वात्यून्यमत्त्रस्ये
तत्पत्रं स्फुटात्वेन लिखितं॥ एवं गवाद् इत्यादा य्भ्यु त्य *? म्।
भेदः॥ ११८॥ तत्रैव ]

६अ) तथाहि रसभाव तदाभासभावशान्त्यादिरक्षमः -----------

६ब्) तथा च ध्वन्यालोचने श्रीमदभिनवगुप्तपादा एव॥
काव्यस्यात्माध्वनि रितिबुधैर्यस्समाम्नात पूर्वस्तस्याभावं

जगद्वरपरेभाकुसाह्वस्तमन्ये॥ इत्यादिना॥ अत्र

काव्यस्यात्माध्वनिः। नवविधोरस इति प्रोक्तः॥ स च

श्रृङ्गारवीरकरुणाद्भुतहास्यभयानकाः वीभत्सरौद्रौ च

तसाः शान्तोपि नवमः स्मृत इति॥

अथ च॥

रस स्वरूपमाह॥ कारणान्यथ कार्याणि सहकारीणि यानि च

रत्यादिस्थायिनोलोकेतानि चेन्नाट्यकाव्ययोः॥ विभावा

अनुभावास्तत् कथ्यन्ते व्यभिचारिणः व्यक्तस्सतैर्विभावाद्यैः

नर्थ?यी भावोरसः स्मृत इति रस स्वरूपं॥ तस्य च भेदास्तदेक

पञ्चशत्॥ ५१॥ तथा हि॥ अर्थान्तर संक्रमित

वाश्यात्यन्ततिरस्कृत वाश्यश्चेति। अविवक्षित वाश्यस्यत्वौ भेदौ २

असंलक्ष्यक्रमव्यङ्ग्यः क्रमोद्योतितश्चेति विवक्षितान्य

परवाश्यस्य द्वौभेदौ २ असंलक्ष्याक्रमव्यङ्ग्योपि न स भाव

तदाभास भावशात्रादिरक्रम इत्यनन्त भेदोप्येक एव गण्यते॥ १

॥ क्रमोद्द्योतितस्तु शब्दशक्तिमूलः। अलङ्कार

वस्तुत्थपत्वेनद्विधः। तदेवं॥ ५॥

तत्रैवार्थ शक्तिमूलस्तु स्वतः सम्भवीकविप्रतिभानिर्मितः।

कविनिबद्धवक्रप्रतिपादितो वेति त्रिविधः॥ एते च भेदाः वस्तु
वालङ्कारो वेति द्विविधाः षड्ङ्गकः। तत्र
वस्तुवालङ्कारौव्यङ्ग्य

७अ) इति द्विगुणा इति द्वादश॥ १२॥ उभयशक्तिमूलस्त्वेक एव॥
एवमर्थशक्तिमूलोद्वादशविधः॥ १२॥ एवमर्थशक्तिमूलोभय
शक्तिमूलाः॥ १३॥ पूर्वैः पंचभिर्भेदैस्सह जाताः॥ १८॥
अष्टादशानां पदवाक्यप्रकाश्यत्वेन द्वैविध्यात् षड्त्रिंशत्॥
३६॥ एतन्मध्यादुभय शक्तिमूलस्य
पदप्रकाश्यत्वाभावादेकोभेदः पातनीयः॥ तेन
पंचत्रिंशदेव॥ ३५॥ ततः प्रबन्धेप्यर्थशक्तिस्थोरिति
प्रबन्धगतत्वेनार्थ शक्तिमूलाद्वादश। १२। एवं सप्त
चत्वारिंशत्। ४७। ततः पदैकदेशरचना वर्णेष्वपिरसादय
इत्यलक्ष्यक्रम व्यङ्ग्यस्यपदैकदेशगतत्वेन रचनागतत्वेन
वर्णगतेनापि शक्त्यात्? प्रबन्धगतत्वेन च चत्वारोभेदाः॥
तदेवमेक पंचाशद्भेदाः भास्कार्याम्॥ तेषामिति तेषामेक
पंचाशत्सख्यानां शुद्धानां स्वप्रभेदैरेक पञ्चाशता
गुणनेनकौधिकषड्विंशतिशतानिभेदाभवन्ति॥ ३६ ११॥ तेषां
पुनरपि सन्देहत्वेनाङ्गाङ्गिभावेन चैकव्यञ्जनानु प्रवेशेन
चेति त्रिविधेन सङ्करेणैकविधया च संसृष्ठेति चतुर्भिर्गुणनेन

चतुरधिकचतुः शतोपेतदश सहस्त्राणि भवन्ति॥ १०४०४॥ एतेषां शुद्ध भेदैरेक पञ्चाशद्रूपैः सहयोजने जातं शरेषु युगखेन्द्वः॥ १०४५५॥ [तथा च त्रिकशास्त्रादौ। अधोधोविति विष्ठेषु भेदसङ्ख्यषुधाम एकं बिन्दुरष्यापि? प्रागव्येषु प्रार्थनान्त्यगाम् स्वपृष्ठगं। च तं माङ्गां विति विसैकता क्षिपेत्। इत्यादिना बहुधा] इत्येवमेकस्यैव रसस्य दशसहस्त्र भेदाः॥ तथापि दिङ्मात्रेणैवो च ह्यताः आनन्त्यात् ग्रन्थ विस्तरभयाश्चेत्यलम्॥ तथा च शक्तिस्ततौ॥

७ब्) आ ई पल्लवितैः परस्परयुतैर्द्वित्रिक्रमात्यक्षरैः काद्यैः क्षान्तगतैः क्रमादिभिरथ क्षान्तच्चैतैस्तैः सुरैः॥ नामानित्रिपुरे भवन्ति खलुयाभ्यन्तगुह्यानिते। तेभ्यो भैरवपत्निविंशति सहस्त्रेभ्य परेभ्योरमः॥ इत्यनेन देव्याश्चैकस्याविंशति सहस्त्राधिकनामानि॥ इत्यलमप्रस्तुत प्रशंसा मात्रेणानेन प्रसङ्गमात्रेण च दिङ्मस्त्रमुदाहृतम् ॥ प्रकृतं चानुसरामः॥ एवं परमेश्वरे सिद्धे चैकस्मिन् तस्यैव च कथंचित्। दास्यमासाद्य॥ कथंचित् कतिचित्कालानन्तरं॥ तद्विद्धि प्रणिपातेन परिप्रश्नेनमेवया। उपदीक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्वदर्शिन इति श्रीभगवता स्वयमेवोपदेशः कृतः स्वभक्तान्प्रति॥ अथ च तं तं

गुरोर्गुरुमालोक्य। तं च संप्राप्य यथा परम्परया

मधुलुब्धो यथा ध्यत्मा इत्यादि तत्सङ्गप्रणिपातपरिप्रश्न

सेवाद्यनन्तरजातसद्बुद्धिप्रसादेन लब्धाभ्यन्तदुर्लभ

पारमेश्वरदासभावत्वात्॥

पूर्वोपार्जितजन्मशतसहस्रानन्तरपरिपक्वसत्कर्मवशात्॥

दास्यं हि दीयत अस्मै यथाभिलषितमितिदासः॥ अथ च

दस्वक्षेपण इत्यनेनाज्ञानान्ध्यंतिरस्कृत्य

ज्ञानभास्करोदयसंपर्कात् तत् समावेशसंपत्तिमास्वाद्य

स्वात्मैक्यभावनया परमेश्वरतामास्वाद्येत्यर्थः॥

यश्चास्मत्परमेष्ठि [पृच्छाम इति भावः] पाद्यैः आसाद्य

इत्यत्रा वृत्तियोजनेद्वौणिचावित्यादिना स्वरादिणि चास्वात्मना

परमेश्वरदास्य मासाद्य आश्रित्य॥ हेतु मालिशाचा परम

प्यासादयित्वा चेति [उक्तिः] परमेश्वर समापत्तितादात्म्य चेतसा

लौकिकं [च तादैव्योवाच इत्यर्थः] वचसांप्रवृत्तिः [

यत्प्रोक्तं तत्]॥ तत्रैव च स्वयमेव प्रोक्तम्

८अ) पूर्वं तत्र भवद्भिस्तश्चन नयि?चारयन्ति परामृश्यन्ति

स्वसूत्र विमर्शिन्याम्॥ तथा हि॥

यद्यप्यायातदृढीश्वरशक्तिपातस्य स्वयमेवेयमियती

परमेश्वरर्थमिवभ्येति हृदयगोचरं। तत्वत्र पुरुषकारः

स्वात्मेयः कोपिनिर्वहती [तस्यमापेयमान्धतम

सप्रख्यस्यामायेयं शुद्धप्रकाशरूपं

प्रत्यपायतानुपपत्तः?] त्यादिना॥ इत्यनेन हि कथं तैः

पूर्वमेतदुत्त्वा। कथं पुनरुक्तं

हेतुमण्णिचापरस्याप्यासाद्यासादयित्वा॥ इत्ये तत् प्रामादिकं॥

तथापि साक्षाद्भगवद्वाचः [साक्षाद्भगवत् स्वरूपाणां

परमगुरूणां] प्रमाणतरा इति किंजानीम इत्यलं

रहस्योद्घटनेन॥ तथा च स्वयं भगवतापि प्रोक्तमेव॥

बह्नूनां जन्मनामन्ते ज्ञानवार्मां प्रपद्यत इत्यादिना॥

सूत्त्रविमर्शिन्यामपि पुनः॥ तस्यमायीयस्यान्धतमसप्रख्यस्य

शूद्धप्रकाशरूपं स्वप्रतिद्वन्द्विनं प्रत्युपापतानुपपत्ते

रित्यादिना च॥ इत्यलमत्र महागुरुभिन्नादेव महात्मनां

प्रमादोपिमर्षणीयो हिमादृशै किं वा जानौ स

एद्दत्रहस्यचारया हेतुमण्णिच् अपि प्रमाणतरं। वाशुरादिणिच्

अपिप्रमाणतममित्यर्थः॥ [अर्थ तस्तु हेतुमण्णि चैव प्रमाणं।

सर्वं शास्त्रस्य हेतुमत्वात्। इत्युक्तं] ततः समस्त

संपत्समवाप्ति हेतु भूतां तत्प्रत्यभिज्ञामुपपादयामि॥

समस्ताश्च ताः सम्पदः। तासां समवाप्तिः नीलपीतादि

व्यक्ताव्यक्तैकीकरणशील तत्समावेवाप्तिः तस्या हेतु भूतां॥

तत्पठनानुभवाद्या सहृदन्त संकुचिततात्पर्यतया हि तत्

समावेश सिद्धस्तेस्या हेतुं भूतामिति॥ अत एव च तद्धेतु भूतामिति॥ तथा च॥ आगमदीपालोकास्तस्य प्रकाशयन्ति किमपि सा

८ब्) हात्स्यं॥ इत्याद्युक्तेः॥ तामेव च हेतु भूतां तत्प्रत्यभिज्ञामुपपादयामि॥ उपपरमेश्वर सामीप्यं प्रापयामीति भावः॥ तस्यैवं भूतस्य महेश्वरस्य प्रतीपमाभि मुख्येन ज्ञानं॥ अयं देवदत्तः। सोयंशुक्लवासोवामनदत्त इत्यादिवत्प्रत्यक्षतया। यं घट इति वत्प्रत्यक्षे तया चोपपादयामि॥ अन्यानपि प्रकाशयामीत्यर्थः॥ भोलोका अनुत्तरमार्गमाविश्य प्रत्यभिज्ञाशास्त्रावलोकनानुभवाश्य सयुक्त्या पारमैश्वर्यं करामलकवदिति प्रकटोयं वादः प्रबुद्धान्प्रति इति चोद्योच्यते॥ अप्रबुद्धानां तु कथवैवनास्तीति॥ [तथा च सिद्धान्तारर्थवल्यां। अद्वैतमप्यनुभवामि करस्थविखुद्वल्यंश * * ?निर्णयननव वेह्ये?। एवं च जीवनमपि प्रतिभासनं च निःशेषसाभिशमनं दो?पप्रसिद्धमिति] तथा च॥

ज्ञेयत्वमप्युपगता हृदयेन रोढुं शक्ताः

प्ररूढामनसामुपदेशवाचः। आर्द्रत्वमादधति किं

नलिनीदलानां श्लिष्ठा निरन्तरतयापि नभोम्बुधाराः॥

इत्यादिनां॥ अथ च महाजनो येनगगतः सपन्थेति॥ तेन जनस्या

प्रबुद्ध प्रबुद्ध स्वप्रबुधादिभेदेनापि सर्वस्यात्राधिकारः॥

तस्मात् प्रत्यक्षतया यः यः कश्चित् प्रत्यभिज्ञानुभवाव्यास

समावेशदशापन्नः सन्। ससिद्धतीति प्रकटोयं वादः॥ तथा

च॥ घटोमदात्मनां वेत्ति। वद्प्यहं च घटात्मना। सदा

शिवात्मना वेद्मि वेद्म्यहं च शिवात्मना॥ स्पन्दे च॥ यस्मात्

सर्वमयोजीवः सर्वभावसमुद्भवात्। तत्संवेदनरूपेण

तादात्म्य प्रतिपत्तितः तेन शब्दार्थचिन्तासु न सावस्था न या

शिवः भोक्तैवभोग्यभावेन सदा सर्वत्रसंस्थितः॥ इति वायस्य

संवित्तिः क्षीत्वात्वेनाखिलं जगत्। संपश्यन् समतं युक्तो

जीवन्मुक्तो न संशयः॥ पुनस्ताश्च प्रत्यभिज्ञायामेव॥

वर्तमानावभासानां भावानामवभासनम्।

९अ) अन्तः स्थितवतामेव घटते बहिरात्मना॥

प्रागिवार्थो प्रकाशः स्यात् प्रकाशात्मतया विना।

न च प्रकाशो भिन्नः स्यादात्मर्थस्य प्रकाशता॥ २॥

भिन्ने प्रकाशे चाभिन्ने सङ्करो विषयस्य तत्।

प्रकाशात्माप्रकाशोर्थौ ना प्रकाशश्चमिच्छति॥ ३॥

इदमित्यस्य विच्छिन्नविमर्शस्य कृतार्थता।
या स्वस्वरूपे विश्रान्तिर्विमर्शः मोहमित्ययं॥ ४॥

सोऽन्तस्तथा विमर्शात्मादेशकालाद्य भेदिनि।
एकाभिधानविषयेमितिर्वस्तुत्य बाधिता॥ ५॥

[केचिच्च हेतुमण्णि चैव द्वयमेव स्वयमासाद्य।
वान्यमप्यासादि प्रत्यभिज्ञायास्सर्वत्राधिका * * ?॥ ॥ ]

प्रकाशस्यात्म विश्रान्तिरहं भावो हि कीर्तितः।
उक्ता च सैव विश्रान्तिः सर्वापेक्षानिरोधरः॥ ६॥

स्वातन्त्र्यमथकर्तृत्वं मुख्यमीश्वरतापि च।
इत्यादिना सर्वत्र प्रकाशात्मा चिद्वपुरद्वयः
परमार्थस्वरूपः सर्वदाजृम्भत इति शिवम्॥ ७॥

न च तत्र वेत्यवेदनवेदकादिचिन्तापिलेशतोपि॥ इत्येवमनेन समस्त
संपत्समवाति हेतुत्वं प्रदर्शितं प्रत्यभिज्ञायाः॥ एवं च
समस्तसंपत्समवाप्तेर्हेतुत्वं प्रदर्शितं परमेश्वर

प्रत्यभिज्ञायाः षष्ठी तत्पुरुषेण॥ बहुब्रीहिणातु

समस्तसंपत्समवाप्तिर्हेतुर्यस्याः प्रत्यभिज्ञाया इति॥ तस्माद्

बहुब्रीह्याश्रयणेन प्रत्यभिज्ञोपायत्वं नीलमुखादेः॥

सर्वस्यचित्स्वरूपेणैव प्रतिभासात्तज्ज्ञानेन हि तदाप्तेरिति

सिद्धोयमुपदेशमार्गः॥ षष्ठी तत्पुरुषेण तु परमेश्वर

प्रत्यभिज्ञे बर्हिहेतुस्तत् तत् सम्पत्तेरितिभावः॥ तथा

चास्मत्परमेष्ठि पादारं॥ बहुब्रीहिणा रूपायः सूच्यत

इत्यादिन॥

९ब्) इत्येवमाद्यकारिकायाश्चार्थः सिद्धः प्रथमः॥

अथापरार्थस्तु॥ समस्तसंपल्लाभ हेतुं महेश्वरस्यदास्यं

कथं चिदासाद्य यतोजनस्याप्युपकारमिच्छन्। अत एव तत्

प्रत्यभिज्ञामुपपादयामीतिसम्बन्धः॥ यतो हि

महेश्वरदास्यात्मकत्वेन वै समस्तसंपत् समवाप्तिरिति भावः॥

न तु समस्तसंपत्समवाप्ति हेतु भूतां तत्प्रत्यभिज्ञामिति॥

महेश्वरस्यदास्यात्मकत्वे हि सिद्धे तत्प्रत्यभिज्ञोदय इति केचित्॥

अथ च गुरुमुखानुसारतोर्थः॥ महेश्वरस्यदास्यं कथञ्चि च

साद्यसंप्राप्य स्वात्मनः॥ शुरादिणि चा॥ तथा च

महेश्वरस्यदास्यमासाद्य। प्रापव्य च। आसादथित्वेत्यर्थः॥

हेतुमण्णि चा च एवं जनस्याप्युपकारमिच्छन्॥ अत एव च समस्त

संपत्समवाप्ति हेतु भूतां तत्प्रत्यभिज्ञामुपपादयामि।
तस्या एव हि समस्तसंपत्समं वाप्ति हेतुत्वं॥ पुतश्च
जनस्याप्युपकारकारणत्वं च॥ तस्या एव हि
तद्दास्यभावजननत्वं च॥ अतः सैव सर्वत्र हेतुरिति
पूर्वगुरवः॥ तथा च पुरस्तात्॥ तैस्तैरप्युपया
चितैरुपनतस्तन्व्याः स्थितोप्यन्तिके कान्तो लोकसमान
एवमपरिज्ञातो नरन्तुं यथा। लोकस्यैष तथा न वेक्षितगुणः
स्वात्मापि विश्वेश्वरोनैवालं निजवैभवायतदियं
तत्प्रत्यभिज्ञोदिता॥ तदर्थमेवेयं संमस्तसंपल्लाभादि
हेतुतयोपदिष्ठा॥ यतश्च सर्वोयं भावराशिः
प्रकाशविमर्शविस्तृतोल्लोलराशितया विस्तृतिमापन्नः सन्।
जगदिदमितिव्यपदेश्य एव॥ अन्यथा तदभावात् खपुष्पादिवत्॥
स्यात्॥ तस्मादुल्लोलकल्लोलादयस्तदत्रन्नास्तत्
स्वरूपपरिप्लुतास्तन्मया

१०अ) एवेति न किमपि बाह्यस्पन्दप्रमेयविषयं नाम।
यन्प्रमातृतामनुगतं सद्बाह्यं वेद्य्मतिमन्येत॥ इति न किमपि॥
तथा च पुरस्ताती॥ स्यादेतदवभासेषु तेष्वेवावमितेसति।
व्यवहारे किमन्येन बाह्येनानुपपत्तिनां॥

तथा च॥

अवयविनोव्यत्त्यनुपपत्तिः समवाया सिद्धिः॥ कम्पाकम्पावरणावरणरक्तारक्तादिण्भगभेदादिविरुद्धधन् मधोनाः॥ अणुसंचयबाह्यवादेपि संचयस्यान्यस्याभावेणव एव॥ ते च यदि परस्परं संयुज्यन्ते तदेक परमाणुमात्रता॥ अथान्यत्रैकोन्यत्र चापर इति बहव एवेति न किंचिद्वाह्यं नामयन्नाम्ना प्रसिद्धं हि स्यात्॥ परंत्वेकपरमाणुः अथ च बहवः परमाणोदिभागभेदग्राहिणः॥ तथा च देवना ह्येषा?दिक्षु संचेयमानेष्वन्यत्रैकोत्यत्रापर इति न कोदेवनाक्ष इति न बाह्यं नाम किंचित् तत्वतः॥ इत्येवमस्तत् परमगुरुभिस्सूत्त्रविमर्शिन्यां वितत्यनिर्णीतमेव॥ तस्मात् सर्वमेतश्चिदाभासमात्रं चिदात्मकं चेति प्रकाशानन्दापनं यत्तत्मुदिति परमशिव इति कथ्यत एव॥ तथा च॥ वर्तमानावभासानाभवानामवभासनम्॥ अतः स्थितवतामेव परटते बहिरात्मना॥ १॥ प्रागिवार्थो प्रकाशः स्यात् प्रकाशात्म तया विना। न च प्रकाशो भिन्नः स्यादात्मार्थस्य प्रकाशता॥ २॥ भिन्ने प्रकाशे चाभिन्ने सङ्करोविषयस्य तत्। प्रकाशात्मा प्रकाशोर्थो ना प्रकाशश्च

सिद्ध्यतीति॥ तत् तदाकस्मिकाभासो बाह्यं चेदनुमापयेत्। न

ह्यभिन्नस्य बोधस्य विचित्रा भास हेतुता न वासना प्रबोधोत्र

विचित्रो हेतुतामियात्। तस्यापि तत्प्रबोधस्य वैचित्र्ये किं निबन्धनं

॥ तदेतदेव निश्चितं॥ प्रकाशविमर्शात्मकभावाः

प्रकाशानन्दघनास्तरुन्भूता बुहुधा इव तत्रैव लीयन्त इति तेपि

प्रत्यभिज्ञाहेतव इति बहुब्रीहिणा॥ अथ च

प्रत्यभिज्ञासमस्तसम्पत्समवाप्तेर्हेतुरिति

१०ब्) षष्ठी तत्पुरुषेण च द्योत्यत एव॥ इत्येवं

प्रथमसूत्रव्याख्या एवं च प्रत्यभिज्ञा शास्त्रार्थ

गर्भीकारेण चायमधिकरण सिद्धान्तः॥ यस्मिन्नर्थे सिद्धे

तदन्वयव्यर्थान्तराण्यापि सिद्ध्यन्ति सोधिकरणसिद्धान्तः॥

यथा इन्द्रियादि व्यतिरिक्त आत्मा

दर्शनस्पर्शनाव्यमेकार्थानुग्रहणात्॥ इत्यस्मिन्नर्थे सिद्धे।

आत्मनो व्यतिरिक्तानि। नियतविषयाक्ये क्रियाणीन्यपि हि सिद्धम्॥

एवमाद्यसूत्रार्थ प्रयोजनेनुभव पथं याते सति। सर्वत्र

सिद्धिरितिभावः॥ रोहणलाभेरत्नसंपद इव॥ तथा

चोपद्धातोप्ययमाद्यश्लोकः॥

तथा हि॥

सर्वशास्त्रार्थ गर्भीकरण हेतोरुपस्घात इति॥

तथा च॥

निर्णीयते यत्र पदैक देशेचैकत्र सर्वागमशास्त्रसारं।

तज्ञैरुपोद्घात इति प्रसिघ्या प्रोक्तस्तु पूर्वैरुपलक्षणीयः॥ १॥

यत्रकवाक्येत्वाद्यस्थे सर्वशास्त्रार्थ निश्चयः। स उपोद्घात

इत्याष्यः? सर्वलक्षणसंयुतः॥ २॥

तस्यचार्थः॥ उप इत्यात्मनः समीपे। उद्घातः। उद्गमनं॥

हनहिंसागत्योः॥ १॥

अथ च॥

उप इत्यात्मनः समीपमुपविश्य। उद्घातः प्रमेयविषयमोहस्य॥

२॥

अथ च॥

उप इत्यात्मनि प्रविश्य॥ उदिति शास्त्रादौ ज्ञायते स्वात्मानमिति च॥

३॥

उप इत्यात्मनः परमेश्वर समीपगमनेन। उद्गम्यते परमेश्वर सम्पत्तिमिति च॥ ये गत्यर्थास्ते ज्ञानार्था इति च॥ तथा च पूर्वैरपि॥ उप इत्यात्मनः समीपे टङ्कवदीश्वराभिज्ञानलक्षण उत्कर्षो हन्यते। विश्राम्यते येन ॥ उप इत्यात्मनः समीपे। उदितिशास्त्रस्योर्ध्वे एव हन्यते प्रमेयविषयोव्यामोहोयेनेति। वा ज्ञायते प्रमेय विषयतत्वं येनेति वा॥

११अ) तथा॥ उप इत्यात्मनि। उदिति शास्त्रस्योर्ध्वे एव हन्यते ज्ञायते परमेश्वर तत्वं येन॥ ये गत्यर्थास्ते ज्ञानार्था इति॥ हन हिंसा गत्योरित्यस्य गत्यर्थत्वात् तेन च ज्ञानार्थात्वादिति भावः ॥ एवमनेनाथमुपोद्घातः प्रथमश्लोक इत्यलं॥ यश्चपरमगुरुभिः चतुःश्लोकगुम्फितोयमुपोद्घात इति। तत् तैः परमेश्वर च स्यमासाद्य प्रथमश्लोकेन। तच्छक्तिद्वयात्मकं च ज्ञानक्रियात्मकं चासाद्यसाङ्गां परमेश्वरं विभाव्य। उपोद्घात। इत्याख्ययोपदिष्ठमिति॥ अस्माभिश्च परमेश्वरदास्यात्मकत्वेन वै ज्ञानक्रियाशक्ति स्वरूपमपि

निर्दिष्टं॥ आश्रयासिद्धौ तद्गुणग्रहणे सिद्धेसिद्धाभिप्रायत्व प्रसङ्गात्॥ यथाब्राह्मणोयं। इत्यत्र जातिगुणक्रियात्मक ब्राह्मणवदत्रामिवेद्यमिति॥ अलं च बहुना॥ तदिदानीं विषयप्रयोजनाद्यभिधीयते प्रयोजनमनुद्दिश्य न मन्दोपि प्रवर्तते। यावत् प्रयोजनोक्तं तावत् तत्केन गम्यत इति॥ एवं प्रयोजनमत्र परमेशता लाभेन तत्समावेशापत्तिसम्पत्॥ परमेश्वरतालाभे हि समस्तास्तन्निः ष्यन्दमय्यस्सम्पदः प्रसरन्ति रोहण लाभेरत्न सम्पद इव॥ इत्येवं प्रयोजनं अभिधेयश्चात्र परमेश्वर स्वरूपतादात्म्यसमापत्ति हेतुरिति अभिधानं चास्यशास्त्रस्य प्रत्यभिज्ञाकौमुदी॥ अधिकारी [लाभमूभयत्रमज्जतः॥ इत्येवं परमात्मनि स्वप्रकाशे स्वभावेविद्यादि स्पर्शाभावः अपरस्तु जीवः। तस्यचातिविषमालङ्कार मा श्र्धदति विषमालङ्कारदृष्टन्तः॥

तथा हि॥

न केवलमात्मरवना रूपेष्ठानाप्तिः। अपि तु स्वाश्रय?ताख्य मृतशस्टपि? सम्भवा च तिर्यथै?स्यालङ्कारः। अथा। मंहिकामुतमन्त्रा? साच्छशः श। तां शमास्तितः। ग्रसते साश्रयतंत्र तमन्यः सिद्धिकामुतः॥ इत्येवं यथास्य

शशोनाच्छयनाश?]

[ * * * *? मातरिपुराणे। वेदकवेद्यवेदनात्मनि चैकेनापरोस्ति वेद्यादि भावः। तत्कदासः। दोवाप * * * ? स्वरः। यद्दास्यात्मकत्वमाश्रयेत्। इति सर्वोयं भ्रमैति। इत्यत्राहुः ॥परमार्थतोतद्वै *? ध्यं। परं कर्तरिष्णतरिस्वात्मन्यादि सिद्ध इत्यादिनसिद्धेपरमेश्वरे। किन्तु मोहवशादस्मिन्दित्यादिना च सिद्धे मोहात्मजीवे। तपोः परस्परं व्यवहारा भेदतः। किंचिद्भेदः। नन्त? वाध्याः। अण्डितास्तितदेव तद्वानतत् इति ]

[ तथा च वेदः। द्वौ मुपलौसयुजासोखा यौसमानं वृक्षंपदिषम्बजाते। तपोः न्यः पिप्पलं वात्मपरमात्मतोन्भेदः। इत्यनेन प्रभुदासात्मकत्वं सिद्धंद्वयेन। एकः प्रतः। एकश्चदासः। परमात्मजीवात्मनेन सिद्धौ उभौ पूर्वं प्रोक्तं चान्यत्। एतयोक्त्य?क्षणं बहुबहुधा। पुरस्ताद्वक्ष्यत च॥ एतश्चालङ्करमार्गे लङ्कारकारकैर्भेदेनं दर्शितं॥ अतगुण विषमालङ्कार द्वयोन॥ तथाभि यधितदीयं वर्णं सम्भवन्त्यमपि योग्यतायां नूतमपि न*?ह्लीयात् तदातद्गुणो गुणलङ्करः। परमात्मवत्॥ यथा च दृष्टान्तः। राजहंसतवसवैशुभ्रता धीयतेन च न चाप धीय। गाङ्गसम्क्षमितसावया * *?]

[चन्द्र समो नाशेसति स्वात्मनोपि नाशाः। राहूनस्त चन्द्र कृतः

॥ तद्वदस्त्रापि जीवस्य प्रकाशानन्द स्वरूपनाशे जीव भावन?

यास्या? सान्माया कालष्येण स्वात्मनो विप्रग्रति रिन्यनयोः

परस्परभेदः। प्रभुजीवयोः। इत्यनया मथात हुणातिवैस्या

राङ्करसादृशं॥ इति शुभम्॥ ४॥ ४॥ अतद्गुणलजारः * * * * * * ?]

११ब) चात्रपरमेश्वर

शक्तिपातोन्मिषज्ज्ञानाङ्कास्तमिताज्ञानतमो हृदयः प्रबुद्ध

इति कथ्यते॥ अप्रबुद्धस्यानधिकारात्॥

तथा च॥

ज्ञेयत्वमप्युपनीता हृदयेन रोढुं शक्ताः

प्ररूढमनसामुपदेशवाचः॥ आर्स्त्रत्वमादधति किं नलिनी

दलानां श्लिष्ठानिरन्तरतयापि नभोम्बुधारा इति पुनः

स्वप्रबुद्धस्य च सिद्धत्घात्पुनः सिद्धेर्हेतोरनुर्योगात्॥

तत्प्रबुद्ध एवाधिकारीति कथ्यते॥

तथा च॥

रामं प्रतिस्ती वासिष्ठोपदेशवाक्यं॥ अहं बद्धो विमुक्तः

स्यामिति यस्यास्तिनिश्चयः। नात्यन्तमज्ञोनतज्ञः

सोस्मिश्फास्त्रेधिकारवात्॥ इति प्रबुद्धः॥ उपायोपेयभावश्च

सम्बन्धः॥ उपायश्चात्र प्रत्यभिज्ञात्मकं शास्त्रं।

उपेयश्च समस्तसंपत्समवाप्तित्वमिति सिद्धम्॥ अलं चाति

विस्तरेण॥ इत्येवं प्रथमश्लोकार्थः॥ इति

श्रीमद्भट्टारकानन्दनाथरचितायां

प्रत्यभिज्ञाकौमुद्यां प्रथममाह्निकं समाप्तं॥

शूभमस्तु श्रीविद्योपासकानां

तद्दयामात्रस्फूर्जश्चिच्छजानाम्॥ ॥

इदानीं य साङ्ख्यादयः प्रधानकारणतया।

तथामीमांसकादयः कर्मकारणतया॥ तथा नैयाविकादयोपि

ह्यात्मकारणतया। बोद्धादयोपि चात्माभावकारणतया

शरीरादि॥

१२अ) पातञ्जलादयोपि हि योगसाधान कुम्भकादि धारणा

परत्वकारणतया॥ वैष्णवाश्च विष्णुकारणतया तथा शैवाः

शवकारणतया च॥ शाक्ताश्च शक्तिकारणतया

कणास्त्वद्दीप्तीनां रविशशिकृषाणु प्रभृतय इत्यादिना

शैवाश्च शिवकारणतया। इति किंचित् स्थूलं। वा सूक्ष्मे
प्रपञ्चितं। तत्सर्वं प्रमाष्ययत् किंचिदनुत्तरनिस्पन्दाख्यं
तदिति स्वरूपं परममुत्कृष्टतमं तत्वं॥ सप्तादशं।
वाष्टादशं। तदेवेदानीं द्वितीयाह्नि केन लक्षयति
शक्तिसंचय कारणतया॥ ननु यदुक्तं समस्तसंपत्समवाप्ति
हेतुं तत्प्रत्यभिज्ञामुपपादयामि। इति तत्समस्तसंपत्समवाप्ति
हेतुः प्रत्यभिज्ञात्मकं शास्त्रमेव॥ तत्र च प्रत्यभिज्ञायाः
शास्त्रत्वाच्छास्त्रस्य चागमप्रामाण्यादत आगमप्रमाणमेव
प्रमाणमीश्वरसिद्धौ चतुरप्रमाण्यत्॥ चतुष्प्रमाणानि तु
परोक्षवृत्यवबोधनाय माहेश्वराण्येव पूर्वसिद्धानि
निर्दिष्थानि॥ तेभ्यश्चागम एव प्रमाणमाप्तवाक्यात्॥
इत्यनेनाप्त प्रामाण्यवचनमेवेश्वर सद्भावो प्रामाणं॥
इत्यनेन चेश्वरः कार्यं। आगमम्तु कारणमित्यत्रत्रा आगम
एवेश्वरोनाम ईश्वरस्तु घटादिवत् कार्यमिति कथं॥ इत्याह॥ ॐ
कर्तरिज्ञातरि स्वात्मन्यादि सिद्धे महेश्वरे।

१२ब) अजडात्मानिषेधं वा सिद्धिं वा विदधीतकः॥ २॥
महांश्चासावीश्वरश्च माहेश्वर्यादि शक्तिचक्रभरिततनुः
संपूर्णा चिदानन्द प्रकाशवपुरद्वितीया खण्ड च
मत्कारैकलक्षणः। अहमिति स्फुरद्वपुः।

स्वस्पन्दनोदन्ताविश्वशक्तिभरिततनुस्संपूर्णश्च॥

तथा च॥

न तत्र सुर्योभाति न चन्द्रतारकंनेमाविद्दुतोभान्तिक्तोय
मग्निः तमेव भान्तमनुर्भातिसर्वं तस्य भासा सर्वमिदं
विभाति॥ तथा च पुरस्तात्॥ या चैषा प्रतिभा तत् तत्रदार्थ
क्रमरूषिता अक्रमानन्त चिद्रुपा प्रमाता प्रमाता स महेश्वर
इति मूलशास्त्र एव॥ श्रीमदभिनवगुप्ताचार्यपादाश्च
निराभासात् पूर्णादहमिति पुराभासयति यद्विशा॥
खामाशास्ते तदनु च विभङ्कुं निजकलाम्। स्वरूपादुन्मेष
प्रसरणनिमेष स्थिति ज्वाषस्तदश्चैतं
वन्देपरमशिवशक्त्यात्मनिखिलम्॥ इत्यादिना च चिदर्कमण्डला
कृतिः। तस्मिंश्च सिद्धे महेश्वरे हमित्यनेन
भासमानेनन्तरमिच्छोन्मेषमात्रेणेदं जगत्प्रमेयतास्पदं
प्राप्तं जगदित्युच्यते स्पन्दात्मकतया। सद सद्यक्ताव्यक्तादि
रूपं॥

तथा च॥

हिरण्यगर्भः समवर्तताग्रे भूतस्यजातः पतिरेक आसीत्।

सदधार पृथिवींद्यामुतेमां कस्मैदेवा यरुविषाविधीम॥

योविश्व चक्ष्वारुत विश्वतो मुखो विश्वतो हस्तरुत विश्वतस्मात् ...

१३अ) इत्यादिना॥ एवमेव च तस्मिन्परमेश्वरे ह्यादिसिद्धे॥ तथा च कर्तरि क्रियाशक्ति युते। तथा ज्ञातरिज्ञानशक्ति युते च। अत एव च स्वात्मनि। आत्मनो हि ज्ञानक्रियात् संयोगाज्ज्ञेयादि व्यवहार इति स्थितम्॥ तथा हि॥ जानाम्यहं घटदि। करोम्यहं क्रियादि॥ इत्येववं ज्ञानक्रियामये स्वात्मनिपरमेश्वरे सिद्धे॥ कः परो अजडात्मा ज्ञातासन् ज्ञातृत्वमेवाविहाय। जन्मान्ध्यमाश्रितः सन् तस्यैव महेश्वरस्य सिद्धिं। ईश्वरोनामकश्चिदस्तीति। वा निषेधं बोद्धादिवत्कर्तुमुत्महेत॥ न किंचित्॥ इश्वरोनास्ति। यदि स्यात् तर्हि घटदिवत् प्रत्यक्षेण पश्येतमन्यः? इति नास्ति॥ अत एव च प्रोक्तं॥ अजडात्मेति॥ बोद्धादयस्तु सर्व एव हि देव प्रिया इति कथ्यन्ते॥ तथा च। बोद्धाः खलुवयं लोके सर्वत्रख्यातकीर्तयः । विकल्पमात्रशब्दार्थ परिकल्पनपण्डिता इति मञ्जर्याम्॥ ते च विकल्पमात्रेणैव शब्दार्थयोर्जीवन्ति॥ पुरस्ताश्च ननुस्वलक्षणाभासमित्यादिनातन्मतमुत्थाप्य।

[पश्चाद्दशार्धार्ध चन्द्रपुष्टिघातशतसहस्राण्यवत्ये प्राप्नुवन्ति दशावंप?हिणहस्ततलं तनयदर्ध चन्द्रश्यपात् इति कश्मीरभाषया कृमुषिघांतं * *? इति कशमीरशुषया।

तयोः शतं। वा सहस्त्रं।] तत्र चजलमकुल?मात्रेण घृतलाभः

कियानिति। महात्मनां प्रमादेन स्वात्मानं दूषयन्त्यम्॥

एवं न कोपि शक्त इति॥ सर्वो हि ज्ञान वा ज्ञानमालम्ब आदिसिद्धो

महेश्वरः सर्वशक्तिः

१३ब) सर्वगुणप्रकाशित वपुश्चेति तस्यैवं विदधीत अव्याप्तेः॥

तथा च॥ जन्माद्यस्य यतोन्वयादि तरश्चार्थे

ष्वभिज्ञासुराट्टेने ब्रह्महृदाय आदिकवये मुह्यन्ति यत्सुरयः।

तेजोवारि मृदां यथा विनिमयो यत्र त्रिसर्गो मृषाधाम्नास्वेन

सदानिरस्त कुहकं सत्यं परंधीमहि॥ तथा

चोत्तरमीमांसायामादित एव ब्रह्मणोलक्षणादि द्वारैण

प्रतिपादनम्॥ अथातो ब्रह्मजिज्ञासा॥ अथा त इत्यनेन

पूर्वमीमांसा कर्मकाण्डनन्तरमुत्तरमीमांसायां

ब्रह्मजिज्ञासित व्यमितिशेषः॥ तत्र च ब्रह्म। वृह वृह वृद्धौ॥

एकः सन् स्वस्पन्दनमात्रात्मकं विश्वमिति रूपतया भासयति।

आदावह्यमित्येवासीत् पश्चाश्चेदमिति वेद्यमापन्न्यं

नीलपीतादिरूपं॥ तद्धारणषुक्त्या च

वृद्धिमापन्नमिवास्वरवश्चित्र गन्ध च नगरादिव ब्रह्मेति

कथ्यते॥ तस्यैव च जिज्ञास्द्व? ज्ञातुमिच्छा॥ ज्ञाते ब्रह्मणि

सर्वं हि विश्वं ब्रह्मेति कथ्यत एव॥ कारणकार्ययोरविभागात्

अविभागेन चैक्यापत्तिप्रसङ्गात्॥ तत् तत्सम्पत्ति प्रवृत्तेश्च॥ तत्
तदैश्वर्यादि गुणगणसंभवाश्चेति
तस्माद्ब्रह्मजिज्ञासितव्यमिति भावः॥ १॥

ततश्च जन्माद्यस्य यतः॥ २॥

अस्य च जगतो यतो ब्रह्मणो जन्मादि वर्तत इति शेषः॥

यतश्च॥

श्रीस्पन्दे॥

यश्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ।
तं शक्ति चक्रविभव प्रभवं शङ्करंस्तुमः॥ १॥

यत्र स्थितमिदं सर्वं कार्यं यस्माश्चनिर्गतम्।
तस्यानावृत रूपत्वान्ननिरोधोस्थि कुत्रचित्॥ २॥

जाग्रदादि विभेदेपि तदभिन्ने प्रसर्पति।
१४अ) निवर्तते निजान्नैव स्वभावादुपलव्वृत्तः॥ ३॥

इत्यादिना॥

तथा च।

ईक्षतेर्न्ना शब्दम्॥ ३॥

यत ईक्षतृत्वात् ब्रह्मण एव प्रधानादि न कारणम्॥ ईक्षतृत्वं च॥ स ईक्षत बहुस्याम् प्रजाये येति॥ अत एव च प्रधानाद्य शब्दं॥ तस्य जडत्वादत एवा शब्दमपि॥ यथा स ईश्वर ईक्षत इति तया न प्रधानादि लक्षणं ईक्षतृत्वेन। प्रधानमैक्षत॥ बहुस्यामिति न इत्यनेन यदस्ति तत्ब्रह्मेति। अतस्सर्वं तदैश्वर्यविप्रुङ्क्त्वि हिर्जतं विश्वमिति निर्णीयते॥ प्रधानं च॥ प्रधानं प्रकृतिस्त्रियां अथ च सत्वरजस्तमसां साम्यावस्था प्रकृतिः॥ नत्वश्यत्॥ सा चा नित्या॥ सा च द्वादशमं तत्वं शिवतत्वादधः॥ तथा च॥ शक्तिर्माया प्रकृतिः पृथ्वी चेति प्रभाविभुं प्रभुनेति च॥ यत्त श्रीमत्सिद्धकपिलादयं उष्णीशं दक्षिणतो निधाय तन्महिमात्वं ब्रुवन्ति॥ तत् तेषामेवोपयोग्यं। न चानुत्तरशास्त्रादौ॥ तेपि च कपिलादयः

पश्चादध्वत्तरमार्गमेव प्रविष्ठाः॥ [नदीनां बह्वस्भवोगवत्?] तेषा च एवं तत्वाभ्यासान्नास्मिनमेनाहमित्य परिशेषम्। अविपर्ययाद्विश्तद्धं केवलमुत्पत्यते ज्ञानमिति॥ १॥

सङ्घात परार्थत्वात् त्रिगुणादि विपर्ययादधिष्ठानात्। पुरुषोस्ति भोक्तृ भावात्कैवल्यार्थं प्रवृत्तेश्च॥ २॥ वत्स विवृद्धि निमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य। पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य॥ ३॥ एवं हि यत्र तत्र यथा तथा ब्रुवन्ति। तश्च सर्वत्रानुत्तरमार्गप्रवर्तनमिति भावः॥ तथा च भगवान् ॥ यथा नदीनां बहवोम्बुवेगाः समुद्रमेवाभिमुखाद्रवन्ति। तथा तवामीनर

१४ब्) लोकदेवा विशन्ति नाशायसमृद्धवेगाः॥ यथा प्रदीप्तं दहनं पतङ्गा विशन्तिनाशायसमृद्धवेगाः। तथैव नाशायसमृद्धवेगास्तवापि वक्त्राण्यार्भितो ज्वलन्ति॥ तत्सर्वमेतत् तदुन्मेषमात्रजातं। यद्भूतं यश्च भव्यं यश्चास्ति वा॥ तथा च यस्मादन्योन परोस्ति जातोय आविवेश भुवनानि विश्वाः प्रजापतिश्चरति गर्भैरन्तर जायमानो बहुधाविराजते। तस्य योनिं परिपश्यन्ति धीरास्तमिस्तिष्ठन्ति

भुवनानि विश्वाः॥ वेदाहमेनं पुरुषं

महान्तमादित्यवर्णं तमसः परस्तात्। तमेव विदित्वाति

मृत्युमेतिनान्यापन्था विद्यते यनाय॥ यो देवेभ्य आतपते। यो

देवानां पुरोहितः। पूर्वा यो देवेभ्यो जात इति तन्त्रालोके च॥ किं

च या वदिदं बाह्यमान्तरो पायशा स्मृतं॥ तत्प्रकाशात्मता

मात्रं शिवस्यैव परं वपुः॥ नीलं पीतं मुखं रुखं

प्रकाशः केवलः शिवः। अमुष्मिन्परमाद्वैते प्रकाशात्मनि

कोपरः॥ उपायोपेयभावः स्यात्प्रकाशः केवलं हि सः। इदं

द्वैतमयं भेद इदमद्वैतमित्यपि॥ प्रकाशवपुरेवायं

भासते परमेश्वरः॥ अस्यां बूमौ मुखं दुःखं

बन्धमोक्षौ चितिर्जडः। घटकुम्भवदेकत्वा च्छब्दास्ते

प्येकमेव वा॥ प्रकाशेप्य प्रकाशांशः कथं नाम

प्रकाशतां। प्रकाशमाने तस्मिन्वा तन्द्वैता तस्य लोपिता॥

अप्रकाशे च तस्मिन् वस्तुता कथमुच्यते। न प्रकाश विशेषत्व मत

एवोपपद्यते॥ अत एव प्रकाशोयमिति वादेत्रमुस्थिते

सूरादावादिताः सद्यं विभिन्नज्ञानवादिनः॥

प्रकाशमात्रमुदितमप्रकाशनिषेधनात्॥

१५अ) एकशब्दस्य नत्वर्थः सङ्ख्यादिग्व्यक्तिभेदभाक्॥ ईशशक्तिः

परादेवी न परत्राश्रयायतः। न चैषशक्तिमान्देवो न

कस्याप्याश्रयोयतः॥ नैष ध्येयो ध्यातृध्यानध्येयादि
वर्जनात्परं पूज्यः प्रजनाभावात् तथा भावन्नपूजकः
नदीक्षादीक्षकोवापि दीक्षा वान्परमेश्वरः॥ स्थानासन
निरोधान्घसन्धाना वाहनादिकम्। विसर्जनान्तं नास्त्यत्र
कतृकर्मक्रियोचितम्॥ न सन्न चासत्सदसन्न च तन्नोभयोज्झितं
दुर्विज्ञेया हि सा वस्थाकिमप्ये तदनुत्तरम्॥ इत्यादिनावितत्य
वितत्यनिर्णीतं॥ [हन् परमेष्ठिपादैः] अलं च बहुना॥ तदेवं
सिद्धे परमेश्वरे निरस्त समस्तकारणोपाधि वर्जिते। कः
समर्थस्तत्सिद्धो अयं ईश्वरोस्ति। वानास्तीति॥ एतश्चैत देव
सूर्योलोकानां प्रातरुदेति॥ शृण्वात॥ अपां निधिश्चायं
शश्वद्रत्ना करं इति श्रूयते॥ तस्मादत्रकोपि सिद्धिनिषेधौ न
कर्तृमुत्सहृत इत्यलं॥ तथा च॥ अतीतः पन्थानं तव
समहिमावात्मान सयोरतद्यावृत्त्यायं चक्तितमभिधत्ते
श्रूतिरपि। सकस्यस्तो तव्यः कतिविधगुणः कस्यविषयः
पदेत्वन्वाचीने पतति न मनः कस्य न वचः॥ इत्यादिना अथोच्यते॥
आगमाद्यपि तत्र न प्रवर्तते। प्रमाणानां हि चतुः सख्यानां
। आगमान्तानां॥ अयं घटः। इति प्रत्यक्षं घटोयं न
घटभावः। प्रत्यक्षत्वात्। पटादिवत्॥ इत्यनुमानं
घटसामान्यसदृशोयं घटह्। तत्क्रियाकारित्वात्॥

१५ब) इत्युपमानम्॥ भो आप्तकिमिदं द्रव्यं नाम
यदेतत्प्रत्यक्षतामेति। तस्य च प्रतिब्रूते॥ गटोयं घटोयं
घटोयमिति। तत्क्रियाकारित्वात्॥ अयं च घट इति शिक्षय यथा
नवैपरीत्येन घटकार्ये पट इति कस्याप्यर्थ आनयिष्यसि॥ इत्येवं
घटकार्य एव चतुष्प्रमाणानियावत् सिद्धिमुत्सह्यन्ते नातश्च
परत्र दुरादौ॥ अथचारोग्यकामाः शिवां सेवन्तां
सेवध्वमित्यनेन भवतु वा न नैरोग्यमित्यागमः॥ तद्योयं
प्रमाण प्रमेयादि व्यवहारः। सतुघटोयं। पटोयमित्यत्र
चतुष्पंच पदादौ॥ तद्यतोवाचो निवर्तन्त
अप्राप्यमनसासह्यत्योदिना प्रमाणादिभिः सिद्धिं वनिषेधं
कर्तुं चालमित्यलमतिमंतृ न भाषाभिः॥ महात्मना
प्रमादोपिमर्शनीयो हि साद्दशैरित्यलमति विस्तरेण॥ यानि च
सर्वाण्येवसारशास्त्राणि सृष्टिस्थिति लयोस्पादकानितानि सजण्येव
तत एव प्रारुर्भवन्ति। तान्येव च तत्सिद्धिनिषेधौ कर्तुं
कथमुत्सह्यन्ति अनन्वयादर्याप्तेश्च॥ तथा च॥
दशाष्टादशवस्वष्ठभिन्नं यस्फासनं विभोः।
तत्सारंत्रिकशास्त्रं हि तत्सारं माणिनीमतमित्यनेन
पंचब्रह्ममुखाश्चतुः षष्ठि तन्त्रप्रादुर्भावः॥ तेपि च
कथं तत् स्वभावं प्रादुर्भावयन्ति॥ [तत एव प्रादुर्भावात्]
इत्यत्र भूतविभत्या नित्येश अत एव। आदि सिद्ध इत्यर्थः॥ कर्त्तरि।

ज्ञातरि॥

१६अ) कर्ताज्ञाता महेश्वर इत्यभिधानेन।
घटोयमितिवत्प्रत्यक्षतां यायात्॥ अयं ईश्वर इति। तत् भूत
विभक्त्यैव हि नित्यशः कृत इति॥ अथ च ज्ञातं कर्ता महेश्वर
इत्यादिना। यैव हि ज्ञानशक्तिः। सैव च क्रियाशक्तिः॥
ज्ञानपल्लव स्वभावैव हि क्रिया॥ यज्ज्ञानं सैव क्रिया या
क्रिया। तदेव ज्ञानमिति॥ इत्यनयोर्न्बीजाङ्कुरवदुपस्थित्यानाप्यत्र
क्रमः॥ तस्माद् नवद्यं सर्वमिदं॥ तेन चायं द्वितीय
श्लोकोपि निरवद्य एवेति भावः॥ २॥ नन्वेवं विधे परमेश्वरे
सिद्धे चिदात्मनि विश्वावभासके॥ ततस्तु सर्वत्र चराचर
स्थिरास्थिर नीलपीतादि जगद्वैचित्त्रेहमिति स्वरूपेण भासमानस्स
एव सर्वत्र सर्वास्वदशासुप्रकाशमानस्सन्। तत् किं
नेन्द्रियैरनुभवपथमेति। अयमीश्वर इत्यनेनानुभवेन
घटोयमितिवत्॥ सर्वं खल्विदं ब्रह्मेत्यादिनां सर्वत्र तस्यैव
प्रवर्तनात्॥ प्रोच्यते॥ इत्याह ॠ किन्तु मोहवशादस्मिन्
दृष्टेप्यनुपलक्षिते। शक्त्याविष्करणे नेयं
प्रत्यभिज्ञोपदर्श्यते॥ ३॥ शारीर *? का यां? क भाष्ये तु॥
पश्वादिभिश्वा विशेषात्॥ यथा हि पश्वादयो हरि ततृणपाणिं
नरं दृष्टा। तत्सामीप्यमायान्ति यान्ति च। परस्परव्याप्ति

विशेषात्॥ तमेव च दण्डपाणिं पुरुषं दृष्ट्वा तस्मात्
पलीय्यतरं? गच्छन्ति? अव्याप्तेश्च॥ एवं
पश्वादिभिर्जीवानामविशेषः॥ व्याप्तौ प्रवृत्तेः। अव्याप्तो चा
प्रवृत्तेः॥ एवं च माययापहृतज्ञानश्च स्वरं
भावमाश्रिता इत्यादि ना च मुषित पारमार्थास्सन्तः॥ ततश्च॥
नत्यां कीट इवा वत्तादावर्तान्तरमाशुते। व्रजन्तो जन्मनोजन्म
लभन्ते नैव निर्वृतिम्॥ इत्यादि जन्मजन्मान्तरमाश्रित्य

१६ब्) नैव निर्वृतिं लभन्त इति॥ ततश्च॥ सत्कर्मपरिपाकान्ते
करुणानिधिनोद्धृताः॥ प्राप्यतीर तरुच्छायां विश्राम्यन्ति
यथा सुखमित्यादिना॥ केनापि कृपालुनानद्यावर्तादाकृष्य।
ततश्च तरुच्छायामासाद्य सूर्यकिरणोदये यथा विश्राम्यन्ति।
तथा केनापिस्तरुणादत्तो पदेशादिनाचैते विश्राम्यन्ति।
इतिदाष्ट्रान्तिकयोजना॥ इत्यनेन पारमेश्वर तत्वे
सर्वदाभातभासमानरूपेपि॥ सोयं वा मनदर्त इत्यादिवत्॥
अहं करोमि। अहं गच्छामि। अहं पश्यामि। इत्यादिना च
चक्ष्वारिन्द्रियाग्नौ ह्योप्यसौ। मायया विद्यया
राहुग्रस्तहिमांशतवदभ्रमण्डलास्फादि तरविमण्डलवश्चा
प्रत्यक्षोसौ महशुपाधिना॥ किं तत्र हिमांशतन्नास्ति। किं वा
तत्र भास्करो श्र्ष्ठेन्नास्ति॥ तथा च साङ्ख्याः॥

अतिदुरात्सामीप्यादिन्द्रियघातान्मनोनवस्थानात्।
सौक्ष्म्याद्व्यवधानादभिभवात् समानाभिघाताश्च
बाह्यप्रमेयानुपपत्तिः॥ तत्राति दुराद्यथा॥ वियतिपतत्त्रीचोदीयते
॥ अतिदूरतया सन्नपि न दृश्यते॥ किं तत्रयियति। पतत्त्रीनास्ति॥
सामीप्याद्यथा॥ लोचनस्थमञ्जनमतिसामीप्यान्नदृश्यते॥
इन्द्रियघाताद्यथा॥ अन्द्धत्व बधिरत्वादेन्नदृश्यतेनापि श्रृणोति
। मनो नवस्थानाद्यथा॥ कामाद्यपहृतमनः न दृश्यते नापि
पश्यति॥ सौक्ष्म्याद्यथा॥ क्षीरे घृतं॥ व्यवधानाद्यथा॥
कुड्यादिव्यवहितं राजदारादि न पश्यति॥ अभिभवान्यथा।
दोहनेनसौरभीयेषु पयसः॥ समानाभिघाताद्यथा॥ इक्षौ
शर्करखण्डमधुरादयः सर्वे मधुरभेदाः परणमन्ति॥
इत्यनेन हिते सर्वे तत्रामृष्टेः प्रत्यक्षतया न सन्ति। परं
रूपाधिवशाच्च्छन्नाकथन सन्तीति प्रकटोयं प्रवादः॥ एवं
च माया परिग्रहवशाब्धोधोमलिनः पुमान्पशुर्भवति॥ इति
पर्मार्थसारे॥ यथा राजायोद्धं गतः॥ इत्यहन्निशं

१७अ) दृष्टेपिराज्ञि गृहबहिर्गमनाददृष्ठ इवेतिकोविरोधः॥ एवं
हि। ननुप्रत्यभिज्ञा न दर्शनमपि तत्प्रतारकतामात्रमिति
निश्चयः॥ मैवम्॥ अत आह च॥ शक्त्याविष्करणेनेयं
प्रत्यभिज्ञोपदर्श्यते॥ इति॥ ज्ञानं क्रिया चेति द्वेशक्ती॥

हंसस्येव द्वौपक्षौ॥ प्रसिद्धे॥ तयोराविष्करणेन प्रदर्शनेन कृतलक्षणादिना प्रत्यभिज्ञा प्रदर्श्यते॥ कुर्म इत्यर्थः॥ कथं ज्ञानशक्तिः॥ कथं वा क्रियेति निर्देश एवतन्निर्देशः। तस्य च निराभासात्मकत्वेन कृतेपि तल्लक्षणोपाख्याने निराश्रयत्वाद्विरोधापत्ति प्रसङ्गाश्च व्याघातादि दोषप्रवृत्तेश्च॥

तथा च॥ विकल्पो निर्विकल्पस्य स विकल्पस्य वा भवेत्॥ आद्येव्याहृतिरत्यत्रानवस्थात्माश्रयादय इति॥ तस्याप्यन्यस्तस्याप्यत्य इत्यनवस्था पातः॥ एवमप्यनवस्थास्याद्यामूलक्षितिकारिणी॥ सविकल्पस्य विकल्प इत्यनेन चापरत्र चक्रकादि प्रसङ्गात्॥ पूर्वस्य पूर्वापेक्षितमध्यमापेक्षितोत्तरापेक्षित्वं चक्रकम्॥ यथा स विकल्पस्य विकल्पस्था विकल्पेन वर्तते यस्समविकल्प इत्येत्र॥ अथ च निर्विकल्पगुणादि कथनविधौ चानाश्रयत्वेनाश्रया सिद्धत्वादि विरोधाश्च यथा॥ आश्रगा सिद्धस्तु॥ गगनारबिन्दं सुरभि। अरबिन्दत्वात्॥ मनौजारबिन्दवत्॥ इत्यादिवन्निर्वषय वादादिनामौननस्थातव्यमिति भावः॥ ध्याने वा कुर्मवदुपस्थित्या संकोचंदङ्गादिनामौनेन स्थातव्यमित्यलमति विस्तरेण॥ यतो वाचो निवर्तन्त इत्यादिना च॥

तथा अतीतः पस्थानं तव सम
हिमावाङ्मनसयोरतद्यावृत्यायं चकितमभिधत्ते श्रुतिरपि।
सकस्यस्तोतव्यः कतिविधगुणः कस्यविषयः पदेत्वन्वाचीने पतति
नमनः कस्य नव च इत्यादिना च॥ तज्ज्ञानक्रियाशक्ति
द्वयप्रकाश एव गुणादि कथने न तत् प्रकाश इति
सिद्धोयमुपदेशमार्गः॥ ३॥ ३॥ ३॥ तदेव च प्रदर्श्यते॥ ३॥ ३॥ ३॥
३॥

१७ब्) इदानीं यदे तत् प्रोक्तं। परमेश्वरे स्वतः प्रकाशमानेपि।
मोह्यतिमिरस्थरि। बुद्धिप्रयोगेन ना भाद्येव॥ तदेव च
प्रकाशयति युगलेन॥

ॐ तथा हि जदुभूतानां प्रतिष्ठा जीवदाश्रया ज्ञानं क्रिया
च भूतानां जीवतां जीवनं मतं॥ ४॥

ॐ तत्र ज्ञानं स्वतः सिद्धं क्रियाकायाश्रितासती।
परैरप्युपलक्ष्येत तयान्य ज्ञानमूह्यते॥ प तथा च दर्श्यते।
रु *?रु भूतानां नीलानीलस्थलास्थूल घटपटतटादीनां
प्रतिष्ठा। स्थितिर्जीवदाश्रया। जीव एवाश्रयो यस्याः॥

तथा हि॥

अहं पश्यामि। अहं भुञ्जामि। अहं गच्छामि। अहं श्रृणोमि॥

इत्यादिनायो व्यवहारः स तु चिदामाश्रय एव॥

अहमित्यारोहेणाहमित्यत्र च विश्रान्तेः॥ तं विना प्रमेयराशेः

पाषाण प्रख्यत्वेनानित्येशत्व प्रसङ्गात्॥ न हि निर्जीवं किंचित्

वाप्युपयुक्तमितित्यायात्॥ उदयं। एतत्। इदं। स इत्यादिनाया

स्थितिस्सा जीवदाश्रयेति सिद्धं॥ तद्विनास्वरूपा सिद्धेः॥ यतश्च।

अहं पश्यामि। अहं जानामि। एतदहं निश्चनोमि॥

यन्यत्राहमिति स्वस्वरूपेण भासमानोध्यात‌ाकश्चिन्नस्यात् तत् क

एवं वदेत्॥ अहं पश्यामीद्यादिना॥ तत् सिद्धमेतज्जीवदाश्रया

जडप्रतिष्ठेति॥ जडुंप्रति च जडस्यं ज्ञानज्ञेयादिव्यवहारात

प्रवृत्तेरिति हि स्थितम्॥ अत एव च ज्ञानं। अहं जानामि॥ क्रिया च।

अहं करोमि। इत्येवमुभेज्ञान कर्मणी। जीवतां जीवयुक्तानां

स चेतनानां। भूतानां चराचराणां। जीवनं॥ जीव

एवमतमिति। तद्विना व्यवहारा निष्पत्ति प्रसङ्गात्॥ सर्वोयं

भावराशिन्देह वचश्रयी भूतस्सात्। आश्रयिणमपेक्ष्यत इत्यत्र

कोयं वितर्कः॥ ४॥

१८अ) एतदेव च युक्त्यादर्शयितुमाह॥

ॐ तत्र ज्ञानं स्वतः सिद्धं क्रियाकायाश्रितासती।

परैरप्युलक्ष्य ततयात्यज्ञानमूह्यते॥ ५॥ एतश्च

पूर्वमेवप्रतिपादितं॥ जानाम्यहं घटः। करोम्यहं

क्रियाः॥ इत्येवं सिद्धे॥ तस्मात् परैः अन्यैरपि चोपलक्ष्यन्त एव॥

अयं जानाति। करोति चायमिति वा॥ इत्यत्र कायुक्तय इति सिद्धम्॥

लोकेपि चायं व्यवहारोन्यैरप्युपलक्षित एव॥ यथा॥

राजानुज्ञया तत् कार्यार्थं प्रेषित * *?स्सन्। तत्पदं

प्रत्यनुगच्छति॥ तत्पदं च प्राप्वा तत्र तत्र तत् तत् कार्यादि

विधाय पुनरप्य गच्छति॥ तत्र च गमन क्रियया। तत् तत् कार्यं

निर्वाहादिज्ञानेन च राजकार्यं विधाय। एवं कार्यं। चैवं

नेति विधिना। पुनरप्यागत्य राजसामीप्यं प्राप्त्वा। राज्ञे

निवेद्य। इत्थं कृतमकृतं वेद्यादिना। तत्पुनरुद्यमी पुरुष

व्याघ्रश्चासौ। इत्यादिस्तु स्या प्रस्तुतश्च॥ इत्यत्र स्वानुष्ठितोयं

ज्ञानक्रिया व्यवहारः परैश्चोपलक्षित इति भातभासमान

रूपोयं लोकव्यवहारः सिद्धः॥ तत् तत्र ज्ञानं स्वतः सिद्धं

क्रियाकायाश्रितासतीत्यादि सर्वं सिद्धं निरवद्यमेवेति॥

इत्थानवेनायमुपोद्घात इति प्रसिद्धः॥ कृतलक्षणश्चास्मत्

परमेष्ठिपादैः पूर्वमेवेति॥ सर्वशास्त्रार्थ निश्चयोय

तवभासते। तदुपोद्घात इति प्रथितः॥ तथा च॥ उदिति शास्त्रस्योब्ध

एव। उदिति परमेश्वर समीपेह्यन्यते प्रमेय विशयो व्यामोहोयने॥ अथ गम्यते ज्ञानं वा। इत्यादिना च॥ तदियं पंचश्लोकी श्रीमदाचार्यमुखनिर्गता सर्वशास्त्रार्थ प्रयोजना॥

१८ब) तथा च॥ उप इति परमभक्तिदार्ढ्य प्राप्तपरमेश्वर समावेशा पत्या। उत् उत्पन्नः। घातः। इदन्तापन्नस्य सर्वस्यास्य प्रमेयराशेरित्युपोद्घातः॥ १॥ अथ च॥ उप परमेश्वर समीपे। उदिति। उत्पद्यते। घातः गमनं॥ २॥ अथवा॥ उप। ईश्वरात्मसमीपे। उत्। उत्कर्षोहन्यते विश्राम्यते येन॥ ३॥ उपपरमेश्वर समीपे। उदिति। ऊर्ध्व एव शास्त्रादौ प्रमेयराशिमयो मोहोहन्यत अपसार्यते येन॥ ४॥ उदिति परमेश्वर समीपे ज्ञायते प्रमेयायां स्वस्वरूपमिति॥ ५॥ गत्यर्थत्वा द्धाहन्तेः ज्ञानमर्थो ज्ञायत इत्यनेन ये गत्यर्थास्ते ज्ञानार्था इति स्त्रियं हन्तीत्यत्र स्त्रियं गच्छतीति॥ इत्ययमुपोद्घात इति कृतलक्षणोमुक्तिद्वारमार्ग इति सिद्धः॥ तथा च॥ स्वपदा स्वशिरच्छायां यद्वल्लङ्घित्तमीहते। पादोद्देशेशिरोनस्यात् तथेयं बैन्दवी कला॥ १॥ शैवी मुखमिहोच्यते। इत्यादिना च॥ शास्त्रसारमुखयुक्त्या मुक्तिद्वार एवायमुपोद्घात इति सिद्धः॥ वयमपि तदुपदेशानुभवाभ्यास पटवश्चाप्त तत्परमार्थाश्चादि श्लोकेनैव तत्सत्गत्या

परमोपोद्धात इत्यादिना व्यवह्याम इत्यादिशन्ते॥ तत एव च

पंचश्लोक्या अपि परमार्थ सङ्गतेः॥ यथा

सर्वशास्त्रपरमार्थस्य पंचश्लोकपाधादनुभवानुभवः॥

तथाद्य श्लोकेन पंचश्लोक परमार्थप्रकाश इति सर्वमन

इति श्रीभट्टारकानन्दरचितायां प्रत्यभिज्ञाकौमुद्यां

द्वितीयमाह्निकाम्॥

[ * * *? किं कथ्यते मया॥ तिमिरादपितिमिरमिदं गण्डस्यपरि

महानयं स्फोट इत्यादि वदयं वदस्म आत्यश्लोकेन सर्व एव

प्रबुद्धा प्रबुद्धस्वप्रबुद्धादयस्तादात्त्यतदापत्ति परम

प्रकाशस्वरूपास्तत् स्वभावद्योतिनस्तत् स्वभावाश्च

नकश्चिदन्यः। वेदकवेदं नवेत्यादि स्वरूपः इति सर्वे तत्पदार्थ

ढाः कथं चिदासाद्य महेश्वरस्य दास्य मित्यनेन

स्वमत्मलश्लोकेन। ततो द्वितीयेन कर्तरि ज्ञातरि स्वात्मन्यादि सिद्धे

महेश्वर इत्यादिना। तयान्य ज्ञानमुद्यत इत्यत्येन

श्लोकचतुष्केण न कोपि वेदितुं समर्थो वा प्रबुद्धः वा बुद्धः।

वा स्वप्रबुद्ध इत्यादिना चैकेनास्य मार्गेणैकधा किंचित्।

अथैकधा च किंचित्। इत्यत्र महान्हासय य *? दिष्ठानामपि।

असद्दत्यसत्यतया पादनं सत्यस्य चासत्यतया पादनं च।

तत्रेतन्नप्रमाणं। इत्यत्रसर्वत्र प्रतारकता *? त्रमेव॥

अत्रब्रूमः॥ सर्व एव तत्पदप्राप्ता एवेति यत्योक्तं। वाप्रोच्यते च सर्वस्य स्वात्मा महेश्वर इति सर्वोस्वात्म स्वर्थपा एव, घटो मटत्पना वेत्तीत्यादिना यस्मत्सर्वमयोजव इत्यादिना च। तत्सर्वं सत्यमेव नप्रथारकता मात्र॥ तथा हि। यथा पादे पादागतस्य सर्वो मृ *? द्दसश्य मनुभूय। जानतः पारदेशेयं तत्पृष्थश्च तत्तन्निक्के? कर्णयं ?

दताम ? तदुदज्ञानवतां च ज्ञापयन् आप्त इत्युच्यते॥ अयं पारदेशोयनिर्णयी। करमृल?वत्॥ इत्येवं तो पूर्वे गुरवोपिता चात्म्य तत्स्वरूपाविष्ठास्तत्तन्निर्णयान्ब्रुवन्ति। तियेव साद्य श्लोकः सिद्धः। ततश्च तत्परं। यदस्ताभिन्दृष्ठ पूर्वं परम पदं तश्च कश्चिदपि नजानाति। नापि ब्रूयात्। जानाति च पुरस्तात्। यदा मोहं

*? गलति। इत्यनेन श्लोक चतुष्केण। कर्तरि ज्ञातरीत्यादिना। आदि श्लोकेन च। ज्ञातमस्माभिः। एवमेव शिवादि भूमिपर्यंतं सृष्टि स्थिति क्रमं तत्व?रूपतया वेद्यवेदका भावरहितं परमं शान्तं निर्विकल्पं शिव तत्द्वमिति सिद्धण। भवतामपि शिष्याणा अपदे च मार्गेणा सादयामीति भवन्तोपि तत्यैप्राप्ताः प्रापयामीति शुभं॥]

१९अ) अथेदानीं परमेश्वरं ज्ञानक्रियात्मकं शक्तिद्वयेन

दृढी कृत्य तत्र ये त्वन्ये

पूर्ववृद्धाबोद्धादयश्चोष्णीशान्कुटि?लान्दक्षिणतो निधाय।

स्वमतदृढीकरणाय। परमेश्वरं स्वात्मरूपं

मेघमायाच्छादित भास्करमण्डलवन्नास्तीति वादिनो देव

प्रियाः शरीरेन्द्रिय प्राणादिभिः स्थगयन्ति। शरीरमात्मा। वा

प्राणः। वा बुद्धिः। वा नभ इति वदन्तः तेषामिदानीं।

मल्लानामिव भुजदण्डान्संपाद्या॥ भूमावुप शाध्य च।

स्वमतं शैवाभिधं चिदात्मानं स्वप्रकाशरूपं दृढी

कर्त्तुमाह॥ [मादोमन्दनाय तन्मतमुत्थापयि तु]

ॐ ननु स्वलक्षणाभासं ज्ञानमेकं परं पुनः।

साभिलापं विकल्पख्यं बहुधानापि तद्वयं नित्यस्य

कस्यचिद्द्रष्टस्तस्यात्रा नवभासतः। अहं प्रतीति

रप्येषाशरीराध्यवसायिनी॥ ७॥ नन्विति पूर्ववृद्धबोधवृद्ध

प्रश्ने॥ अहोशैवाः॥ बोद्धाः खलुवयं लोके सर्वत्र

ख्यातकीर्तयः विकल्पमात्रशब्दार्थ परिकल्पन पण्डिताः॥ यश्च

सर्वस्य स्वात्मा महेश्वर इति प्रोच्यन्ते।

तत्पीतमध्वादिरसोन्मत्तचित्ततया। वासावधान मनस्कद्वेन॥

यद्यत्राद्यः। तत्फलं भवत्भाषाभिः॥

ताश्चोन्मत्तवदुपेक्षणीया इति॥ अथापरेण॥ दृष्टायं।

श्रोतायं घ्रातश्चायमिति यः स आत्मापरमेश्वर इति॥ तत्रापि च मनः। अथ बुद्धिः। अथाहङ्कारः॥ वा शरीरं। वा प्राणः॥ वा कल्पितं नभ इति॥ चेतयतीति चित् आत्मा मनः वा बुद्धिः॥ निश्चयात्मिका॥ सर्वत्र साक्षिभूता॥ इयमात्मेति कृत पूर्वनिश्चयात्॥

१९ब) इयमात्मा परानन्द इति॥ तत्सैवास्तु परमेश्वर इति किमात्मना॥ अथ च॥ यद्यात्मानामकश्चित् स्यात्॥ तर्हि किं न लक्ष्यते। दर्शनाभावान्नास्तीति॥ नासतो विद्यते भावोना भावो विद्यते सत इत्यादि भगवद्वाक्य दर्शनात्॥ अथ च॥ यत् सत् तत् सदिति प्रोक्तं यदमत्तदसत्परं। घटोस्ति भूतले चान्यद् घटोनास्तीति चान्यथा॥ तद्यद्यात्मा स्यात् तत् हृद्रक्ष्यत्॥ दर्शनाभावास्तीति॥ तस्माज्जगति व्यवहारोयं स्फुटः॥ इहस्व लक्षणाभासं ज्ञानं निर्विकल्पाख्यं॥ साभिलापं विकल्पाख्यं चापरं स विकल्पाख्यं च॥ तेन द्वयेनैव च व्यवहारसिद्धिः॥ तथा हि दूरात्कश्चिदागतः सन् दृष्टोदूरतः कश्चिदयं साकार इति॥ तदनुकश्चित्। वा किंचिदिदं निश्चिनोति च॥ तदनु किंचित्समीप्ये प्राप्तः। सोयं वा न। वा कश्चिदिति च॥ तदनु च निकटतरं प्राप्तौ मनां स एवायं। नान्य इति वदति च॥ उति निर्विकल्प ज्ञानं। तदनु शिक्षादिशूत्वातस्मादयममुकजात्या।

अमुकवर्णेन च सर्वलक्षणकल्पनया स विकल्पेन च गृह्य त एव॥
मनसा। तथा बुद्ध्या च। तथा दाविन्द्रियादिभिश्चेत्ये तदेव
व्यवहार सिद्धेर्हेतुतया ज्ञानयुगलं मन आदि सह एतत्युगं
विनानात्मादि किंचित्॥ अयुक्तेश्च [अनवभासतः]॥ छूरि च॥

२०अ) तथा हि॥ भेदेन प्रतिभासादन्य परत्वादभेदवचनानाम्
व्यवहार विप्रलोपादद्वैतकथा कथामात्रमित्यादिना॥ तदनेन
सिद्धं। आत्माकश्चिन्नास्तीति॥ ७॥ इदानीं त एव बौद्धवृद्धाः
शैवान्प्रति परस्परसंवादमात्रेण प्रतिवदन्ति सिंहावलोकित
भ्याययुक्त्या॥

ॐ अथानुभवविध्वंसे स्मृतिस्तदनुरोधिनी। कथं भवेन्ननित्यः
स्यादात्मा यद्यनुभावकः॥ ८॥ भो शैव॥ चेत्प्रश्योसे॥ भवन्
मतेन चेदात्मानस्यात्। तत् ह्यनुभव विध्वंसे संजात सति।
यथा घटोयमिति सृष्ठ प्रत्यये सति। प्रत्यक्षे। तदनन्तरं च यः
पूर्वं मया दृष्टो घट इति। पूर्वं दृष्ट आसीत्। स एवेदानी
मनुभवसंस्कार वशात् स्मरण पथमेतीतिस्मरणानुमान
ज्ञातं चाभात्यस्य। सामेमातेतिवत्। इत्यनेनानुभवेनष्टे
पूर्वप्रसिद्धे॥ तत्सांकारमात्रात् स्मरणे। तदनन्तरं च सिद्धे
को हि नामस्मरणानुभवज्ञाता यद्यात्मा हि न स्यात्॥ अहं

जानामि। अहं करोमि। अहं पश्यामीत्यादि व्यवहृतेरात्मन एव॥
तं विनानापि कश्चिच्छरीरादि प्रमाता चिद्रूपो जदु इत्थं कर्तुं
शङ्कुयादित्यनेनात्मा कश्चिदस्त्येवेति शैवमतदार्ढ्यमेवनापि
बोद्धवृद्धास्तदा भासमात्रेणापि वकुमलमिति॥ तथा च स्पन्दे
जाग्रदादिविभेदेपि तदभिन्ने प्रसत्पति। निवर्तते निजान्नैव
स्वभावादुपलब्ध्यत इति॥ तथा च॥ शब्दस्पर्शादयो वेद्या
वैचित्र्याज्जागरे पृथक्

२०ब्) ततो विविक्ता तत्संविदैक्य रूपान्नभिद्यत इति॥
तदयमात्मानामप्रमाता प्रमेयादिङ्ग्राहक इति कथ्यते॥ ८॥
इत्येवं सिद्धे वृद्धाः प्रत्याहुः॥

ॐ सत्यस्यात्मनि दृङ्गाशात्तद्वारादृष्टवस्तुषु स्मृतिः केनाथ
यत्रैवानुभवस्तत् पदैव सा॥ ९॥ भो शैव॥ भवदात्मनि सत्यपि
किं तेन॥ पूर्वं हि घटोयमित्यनुभवै जाते। पश्चात्तन्नाशे च
जातेसति॥ पूर्वघट विस्मृतौ सत्यां तत् संस्मृतिः। केन हेतुना॥
केन प्रमात्रा ज्ञात्रा वा केन च प्रमेयेणेति वितर्कः॥
पुनरप्याहुश्च वृद्धाः॥ अथेति भो शैव॥ यत
एवानुभवस्तत्पदैव॥ घटोयमिति योनुभवस्तत् पदा सा स्मृतिः॥
यापीयं मातानुभविता। सा स्मरण पथमेति सामेमातेतिवत्॥

यतो हि पूर्वानुभवसंस्कारात् स्मृति संभव इत्युक्तम्॥ १०॥

अतश्चाहुर्वृद्धाः॥

ॐ यतो हि पूर्वानुभवसंस्कारात् स्मृति संभवः॥

यद्येवमन्तर्गर्त्तनाकोर्थः स्यात् स्थायिनात्मना॥ १०॥

तद्यद्येवं यत्रैवानुभवस्तत् पदैव हि सा स्मृति रित्युक्तं प्रोच्यते च॥ तदनुभवमार्गोयं स्मृस्यादि कार्याणि निर्वाहयितुं समर्थोस्तु। किं च तेनात्मना॥ एवं च सिद्धे तु व्यवहारमात्रे। अन्तर्हृदि यथा गडुराया सा यैव महद्धः खदानायैव॥ मारितोहमनेनान्तर्दुःखेन इत्यादिनाकोर्थः स्यात् किमपि न तेनात्मना॥ परं तु किं करोमीति दुःखं॥

२१अ) तस्माश्च तत् सत्तया वा सत्तया न किमपि प्रयोजनादि॥ यथा कश्चिद्वक्ति॥ आकाशोस्ति। देवाः सन्ति॥ मनुष्या भुञ्जन्ति॥ इत्यादयो यथोन्मत्तवदुपेक्षणीया इमे भावाः तद्वदात्मास्तीति न बुद्धिपदमारूढुं समर्थ इति हित्रजध्वं तच्छङ्का मात्रमपि॥ १०॥ तस्मात् यतश्चैतदत एवैतत्॥ इत्याहुः॥

ॐ ततोभिन्नेषु धर्मेषु तत् स्वरूपाविशेषतः। संस्कारात् स्मृति सिद्धौ स्यात् स्मर्ता दृष्टेवकल्पितः॥ ११॥ तस्मादेव

संस्कारानुगुणगणेषुधर्माषु सत्सुभिन्नेषु चात्मनः।

आत्मनः स्वरूपस्या विशेषात्। विशेषदाना भावात्॥ तदनन्तरं

चानुभवसंस्कारात् स्मृति सिद्धौ सत्यां यथा दृष्टा

पूर्वोक्तलक्षणोपि कल्पित एव। तथैव च स्मर्तापि कल्पित एवेति

कल्पनाभिः कल्पित इति सिद्धम्॥ तथा चास्मद्गुरुवरपादाः॥

अनुभवेन हि संस्कारोहगन्यते स्वोचितः॥ संस्कारश्च

प्राक्तनरूपां स्थितिं स्थापयतीति॥ यथा कृष्टशाखादेश्चिर

संवर्ति तस्य विवर्त्यमानस्य च भूर्जदेः॥ आत्मनोधर्मास्तु॥

बुद्धिः॥ मुख। दुःख। इच्छा। द्वेष। प्रयत्न। धर्म। अधर्म।

संस्कारा इमे गुणा। आत्मनः॥ ११॥ इदानीं बोद्ध

वृद्धैश्चात्मनः कल्पिततत्वमापाद्यतेन चानित्यत्वादि

धर्मानारोप्यात्मनः स्वरूपे विशेषा भावादित्यादिना। अथ च

तच्छक्ति द्वयमपि ज्ञानक्रियात्मकं कारणाश्रया भावे।

कार्याश्रया

२१ब्) भावादिति तदपि ज्ञानक्रियात्मकं युगलमप्रमाणीं

कर्तुं तदपि निराकर्तुमाह॥

ॐ ज्ञानं च चित्स्वरूपं चेत्तदनित्यं किमात्मवत्। अथापि

जदुमेतस्य कथमर्थ प्रकाशता॥ १२॥ ज्ञानक्रिये हितद्गुणे।

तस्मादात्मनो गुणिनोभावाद्गुणा। अपि न विद्यन्त एवेति सिद्धम्।
अत आत्मनो धर्मयोगेनानित्यत्वप्रसङ्गात्। अतस्तद्गुणयोरप्य
नित्यत्वप्रसङ्ग इति व्यातिरेव गुणगुणिं स्ममयायादिति॥ तयोश्चा
भेदादिति॥ एवं चिद्रुपस्य स्वात्मनो यथा धर्मयोगादनित्यत्व
प्रसङ्गः॥ तथा तद्गुणयोरपि परस्पराभेदात्॥ तथा नित्यत्वे सति
जात्यादि दोष प्रसङ्गात्। आत्मतद्गुणयोरप्यनित्यत्वप्रसङ्गात्॥
तदेवं जात्ये सति। प्रकाशमानता कथमस्य वा तद्गुणयोश्च
अनित्यत्वजाद्यत्वे सतिपाषाणप्रख्यत्वादितिकोयं
विद्दद्धधर्मापत्ति प्रसङ्गः॥ एवं हि ज्ञानस्या नित्यत्वेन
जाद्यत्वे सति कथमर्थ प्रकाशता स्यादात्मवत्॥ ज्ञानं हि
चित्स्वरूपं॥ अनित्यत्वे सतिः धर्माधर्मादि गुणत्वात्।
घटादिजडवत्॥ इत्यनया व्याप्त्याहं जानामि वाहं कन्निमीति
वृद्धवारः कथ सिध्येत् यस्तु घटादिवज्जडः सकथमिति॥
इत्येवं वृद्धबौद्धव्याप्तिः॥ यतश्चैते विकल्पमात्रशब्दार्थ
परिकल्पन पण्डिता इति निश्चिताः॥ [तथा च बौधाः खलुवयं लोके
सर्वत्रख्यात कीर्त्तयः। तत् तद्विकल्प शब्दार्थ परिकल्पन
पण्डिता] एवं ज्ञाने सिद्धे। तत्पल्लव स्वभावात्क्रियायास्तामपि
निवारयितुमाह॥

ॐ क्रियाप्यर्थस्य कायादेस्तत् तद्देशादि जातता। नान्यादृष्टेन्न

साप्येका क्रमिकैकस्य चोचिता॥

२२अ) इह हि पचति देवदत्तः॥ आयाति वामनदत्तः॥ याति च लोहितोष्णीयोविप्रः॥ इत्यादौ। तण्डुल। इन्दन। वह्निपाकादि क्रमेणक्रियानेका। गृह गत देवदत्तस्वरूपाद्बाह्य देशगत देवदत्तस्वरूपमित्येता व देवलभ्यते॥ अथ च देवदत्तो गृहेस्ति। बहिर्न्नास्ति। वा बहिरस्ति। गृहे च नास्त्येता वदेव हि क्रिया मात्रं लभ्यते। नत्वन्यत् किंचित्। अदर्शनात्। न चासौ क्रियानाम। वा ज्ञानं कस्यापि ज्ञानिनः। जडाजडस्वभावात् क्रमिकस्य विद्यते ॥ यतः सा चैका। अनेकस्वभावा। तत्परं च निष्क्रियस्यात्मनोन विद्यत एव॥ एकस्यानेक स्वभाव विरोधापत्ति प्रसङ्गात्॥ इत्येवमनेनात्माभावे सिद्धे। आश्रया सिद्धत्वेन चाश्रय्य सिद्धत्वे च सिद्धे। तदनन्तरमेव पुनरपिस्थणानिखनन्यायेन तदेव दृढयित्तमाह॥ १३॥

ॐ तत्र तत्र स्थिते तत्तद्भवतीत्येव दृश्यते।
नान्यन्नान्योस्ति सम्बन्धः कार्यकारणभावतः॥ १४॥ एवं हि तत्तन्मृदादि पिण्डे सति। तत् तद्घटादिभवत्येवा वश्यकतयानान्यत्॥ इति व्याप्तिर्न्निश्चिता। तन्मृदो घटः। तनुभ्यश्च पट इति परमेश्वर नियति तत्वेन कृतोय क्रमः न

चान्यत्। मृदः पुष्पादीनि वा फलादीनि चेति॥ नापि च तन्तुभ्यो घटादीनि। वा तिलतैलादीनि चेति ह्यव्याप्तिः। वातिव्याप्तिश्च॥ नापि चात्रेश्वर ज्ञानक्रिययोः कार्यकारणभावाद्यते सस्वन्द्धोस्त्यन्यः॥ येन वै

२२ब) परीत्यमपि प्रसज्येतेति नस्यात्॥ तस्मादेवमेव सिद्धोयं क्रमः क्रमिकानामन्वय व्यतिनेकेन नियति तत्वदार्ढ्यमापन्नः सिद्ध इत्याह॥ १४॥

ॐ द्विष्ठस्यानेक? रूपत्वात्सिद्धस्यान्या न पेक्षणात्।
पारतन्त्र्यादि योगाश्च तेन कर्तापि कल्पितः॥ १५॥
द्वाभ्यां तिष्ठतीति। वाद्वयोस्तिष्ठतीति द्विस्थः। मल्लयोरिवद्वयोः॥ वाहस्ततदयोः॥ वा परशु हस्तयोश्च॥ तयोश्च द्वित्वेनानेक रूपत्वात् एकस्य हि द्वितीयेन सम्बन्धेनेक विधत्वात्॥ तथा च परात्रिंशिकाया *? कायां श्रीमदभिनवगुप्ताचार्य कृतायाम्॥ अधोधोविनिविष्टेषु भेद संख्येषु धामसु। एकं बिन्दुरथांपि प्रागन्येषु प्राक्तनान्त्यगाम्। स्वपृष्ठगां च तां सङ्ख्यं विनिविश्यैकतः क्षिपेत् इत्यादिना॥ अनेन॥ एक दश। शत। सहस्र। अयुत। लक्ष्य। दशलक्ष्य। कोट्यादि। परार्धान्ताचैकस्मिन्नेव प्रवर्धते॥ अतोमूलस्तम्भ भूत एक

एवासौ प्रणववदुपस्थित्या सर्वत्रचातुर्वेदादिषु॥ इत्येवं दाढ्रान्तिके शिवस्यैकस्य द्वितीयशक्त्या सहजच्छाय येव सम्बन्धे सति चानेकता सिद्धा। सत्येकत्वे चैकत्वं सर्वत्र प्रसिद्धं। न तत्र सूर्यो भाति न चन्द्रतारकं ने मा विद्युतो भान्ति कुतोयमग्निः। तमेभान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति॥

२३अ) अतोद्विष्ठस्यानेक रूपत्वादिति सिद्धम्॥ अथोश्यसे अनयोर्द्वयोः पूर्वसिद्धोयं सम्बन्धो नाम॥ तद्यदिस्यात् तर्हि। अन्यापेक्षा न स्यात्। स्वातन्त्र्यात्॥ अतोन्यापेक्षया स्वातन्त्र्यं विहाय पारतन्त्र्यादि सम्बन्धोपि परमेश्वरस्य॥ तदेभिर्गुणैकर्त्ता कल्पित इति सिद्धः॥ निर्मल आकाशे चैकस्मिन्ननेक सितरक्त नीलकृष्णादि भेदकल्पित त्वात्॥ तदनेनात्मानामन कश्चिदिति सिद्धम्॥ परं तु निर्विकल्प सविकल्पात्मक ज्ञानद्वयेन सिद्धोयं व्यवहारमार्ग इति किमनेन संशयमार्गप्रवृत्तेन कष्टेनात्मास्तीति व्यापारमार्गेणेत्यलम्॥ १६॥ इत्यनेन पूर्वपक्षेण वृद्धबौद्धानां स्वपक्षस्थापन स्थितिः सिद्धा ॥ अन्यत्र च शामे अहो शास्त्राणि व्यर्थानि चतुर्वेदाश्च वा तथा। मीमांसात् तत्कशास्त्राणि योगवेदान्त दृष्टयः॥ १॥ अष्टादश पुराणानि तदङ्गानि च नित्यशः। साङ्ख्यादीनि च शैवादि

रहस्यानि यथा पदं॥ २॥ सर्वाण्ये तान्यात्म मूलाश्रयाणि
प्रवदन्ति च आत्मैव॥ तद्गुणे ज्ञानक्रिये परम चोदिते॥ ३॥
आश्रया भावमात्रेण कुत आश्रयिणां श्रमः। शैव
वृद्धास्तद्भवद्भिस्त्रिक शैवागमानि च॥ ४॥ दग्धानि निर्मूल
तया वारितानि पुनः पुनः॥ कुत आत्मां कुतश्चात्रतज्ज्ञानं
वा कुतः क्रिया॥ ५॥ तत्सद्भावेपि किं नाम
प्रामाण्यमितिकथ्यताम्। निर्विकल्पविकल्पाभ्यां
ज्ञानद्वयमपेक्ष्यते॥ ६॥ अतोन्यन्नास्ति किं मपि बोधाबोध
विशेषव्यत्।

२३ब) चित्स्वभावो चित्स्वभाव उदासीनवदा स्थितः॥ ७॥ अहो
प्रारब्धमात्रेणाप्यलं शास्त्रमहाम्बुधेः। अथवे
भावनामात्रस्तुत्या चालं विरोधतः॥ ८॥ क ईश्वरोथ किं
दास्यं तस्य निष्फलताश्रयं। तथा जनस्योपकार इत्येवं
परवञ्चनां॥ ९॥ तस्मान्नमोस्तु तद्बुध्यै तत्व मात्रे नमो
नमः तच्छास्त्रार्थ प्रदीप्ताय स्वात्मने शम्भवे नमः॥ ११॥
अलंबा बहुनोक्तेन विमर्दोत्राशिंभते। महात्मनां प्रमादोपि
मश्मनीयो हिमादृशैः॥ बौद्धवृद्धावयं पूर्वो पूर्वैः
पूर्वतरैर्मृताः [भो शैव शिवमार्गान्ध्य चारिन्किंनोथलजसे]
भो शैव शिवमार्गान्ध्यचारिण किं नोलज्जसे॥ १२॥ इति

श्रीमद्भट्टारकानन्दनाथकृतायां प्रत्यभिज्ञा कौमुद्यां

तृतीयामाह्निकम् समाप्तिमगमत्॥

ॐ पूर्वपक्षतया वृद्धानाश्वास्याथ विमतृयत्। प्रकाश्यते

शैव सारोत्तरपक्षः स्वसिद्धये॥ १॥ इदानीं प्रत्युत्तरदानेन।

बौद्ध वृद्धानां परमेश्वरे स्वात्मनि विश्रान्ति मासाद्य

ततश्च मूलाधारे स्वात्मन्यहं रूपे सिद्धे। अधेयं सर्वं

विश्वमपि सिद्ध्येदिति दर्शयितुमाह॥

ॐ सत्यं किन्तु स्मृति ज्ञानं पूर्वानुभव संस्कृतेः।

जातमप्यात्कनिष्ठं तन्नाद्यानुभववेदकम्॥ १७॥ भो

बौद्धवृद्धाः॥ यद्भवद्भिः नोक्तं। तत्सत्यमित्य

बाङ्गीकारेण प्रत्युत्तरम्॥ किन्द्वितिपरं द्विति॥ स्मृति ज्ञानं

नाम। सामेमातेति वद्या पूर्वमनुभूता सामेमातेति॥ इत्येवं

पूर्वानुभवसंस्कृतेः स्मृति ज्ञानं॥ योसौ गौर्मयानुभूतो

दृष्टपूर्वस्स इदानीं मयमिति॥ यद्येवं। तथापि

स्वात्मनिष्ठं तत्स्मरण ज्ञानं स्वात्मजातिविजाति गुणक्रियादि

सम्पन्नं तत्रैव च

२४अ) निष्ठं तत् स्वरूपेणैव च स्थितं नान्यथेति॥ यथा

लोहितोष्णीषा ऋत्विजाः प्रचरन्ति॥ शुक्लवाससमानय॥
देवदत्तगामत्याजशुक्लां दण्डो न॥ इत्यादौ शुक्ल वासौ
ब्राह्मणजातितद्गुण तत्क्रिया युक्तमेव ब्राह्मणमाह्वयन्ति॥ न
तु क्षत्रियादि धर्मादि युक्तामिति॥ अथ च॥ चक्षुर्मात्रग्राह्यं
रूपं॥ श्रोत्र ग्राह्यः शब्दः। जिह्वामात्रग्राह्यो रसः।
घ्राणग्राह्यः शब्दः त्वक् ग्राह्यः स्पर्शः॥ न चात्र चाक्षुषः
शब्दः। स्त्रौत्रं वा रूपं जिह्वया च गन्धः। घ्राणेन चरसः
॥ त्वा वा च शब्दादि॥ इत्येवं स्वात्मनिष्ठत्वं सर्वत्रैव
चातुर्वल्यादौ प्रसिद्धमेव॥ एवमनुभवस्मरण ज्ञानादावपि
अनुभवो हि स्वात्मानुभवरूप एव निष्ठः॥ न स्मरणादौ॥
एवं स्मरण ज्ञानमपि स्वात्मन्येव निष्ठं सन्नानुभव
पदवीमारोढुमर्हतीति॥ स्वात्मनिष्ठत्वात् एवं सति यत्स्मरण
ज्ञानं स्वात्मनिष्ठं तत्कथमाद्यानु भूतानुभववेदकं
हि स्यात्॥ ता शद्यद्भवद्भिः प्रोक्तं। यतो हि पूर्वानुभव
संस्कारात् स्मृति संभव इत्यनेनैव व्यवहारे सिद्धे
किमात्मनान्तर्गर्त्तनेति। ज्ञानानां स्वात्मनिष्ठत्वात् तत्
कथमिति॥ १७॥ तथाप्य परयापि युक्त्यापि पूर्वोक्तमेव दृढयति॥
यतश्च

ॐ दृक्स्वाभासैवनान्येन वेद्या रूपदृशेवदृक्।

रसे संस्कारजात्वं तु तत् तुल्यत्वं न तद्गतिः॥ १८॥

तत्र दृक् स्मरणं। स्वाभासैव। स्वप्रकाश चिदात्मकत्वे नैव
प्रसिद्धम्॥ अत एव नान्येनानु भवादिना वेद्यं च। यथा हि
रूपदृशा रस ज्ञाना वाप्तिः॥ इति पूर्वोक्तमेव॥ अथोच्यसे॥
अनुभवसंस्कार जत्वं तु कथं॥ कथमनुभवसंस्कारेण
स्मृत्युत्पत्ति प्रवृत्ती॥ इति तन्न॥ तश्चान्योन्यं स्पर्धावृवृद्धयोः
यथाद्वयोः पण्डितयोः। यथा द्वयोर्मल्लयोः। द्वयोर्वा शिवं
योः। वामेषयो॥ [वृद्ध वृद्ध]

२४ब) वाद्वयोश्चकोरयोः परस्पर युद्धादिना॥ न चैतत्तद्गतिरिति॥
न तेन तज्ज्ञाना वाप्तिरिति न चेति॥ तस्मात् स्वात्मनिष्ठत्वान्नतेन
तज्ज्ञानं लब्धिरिति भावः॥ १८॥ भो पृच्छक॥ अथोच्यसे॥

ॐ अथा तद्विषयत्वेपि स्मृतेस्तदवसायतः। दृष्टालम्बनता
भ्रान्त्या तदे तदसमञ्जसम्॥ १९॥ अथोच्यसे। असत्यप्यनु व
भविषयत्वे। स्वात्मनिष्ठकल्पनया॥ तथापि च
भ्रान्त्याशुक्तौरजतादिवत् आलम्बनता लम्बनत्वं दृष्टमेव।
अनुभवेनैव हि स्मृति सिद्धेः॥ इत्येवमदसमञ्जस्यमेव॥ यथा हि
मध्याह्नार्कमरीचिष्वि वा *? प्रतिभासः॥ शङ्खदाविवरजत
प्रतिभासः। रज्ज्वां वा सर्पाभासः॥ इत्यादौ यो

भ्रमिमात्रतयाभासः। स आभास एव। न च तत्र प्रामाण्यं। तथा हि पुरातान् प्रतिपादयिष्यति॥ रजतैक्य विमर्शोपि शुक्तौ न रजतस्थितिः। उपाधिदेशासंवादाद् द्विचन्द्रेपि नभोन्यथा॥ इत्येवं न प्रामाण्यमिति निर्दिश्यते॥ इति भ्रान्त्यायो भ्रमस्सो न प्रमाणतयास्ति॥ १९॥ एतदेव दृढयितुं पुनरत्यन्यया युक्त्या दर्शयति॥

ॐ स्मृति तैव कथं तावद्भ्रान्तेश्चार्थ स्थितिः कथम्। पूर्वानुभवसंस्कारापेक्षा च किमितीष्यते॥ २०॥ यत्र हि भ्रान्तित्वं शूक्तौरजतवत् तत्र कथमर्थस्थितिः॥ तदभावे कथमनुभवः। तदभावे च कथस्मृति सम्भवः। वृकस्यमूलाभावाच्छाखादेर भावात् इति हि सिद्धम्॥ एवं हि सिद्धे पूर्वानुभव संस्कारापेक्षा च कुत्र वा कथमितीष्यते॥ इत्थं पुरस्तात्प्रतिपादयिष्यति॥ इत्येतद् भवदुक्तं नाम न प्रामाण्यतनो पल्लवायत इति न प्रमाणम्॥ वाच इमा उन्मत्त वाचो वडपेक्षणीया इत्यासमञ्जस्यं सर्वत्र भवद्दुक्त्युक्तिषु [तथा च। इह खलु प्रतिपत्सितमर्थं प्रतिपादयन् आपधीय वचनो भवति प्रेक्षावतां। अप्रतिपिसितं तु प्रतिपादयन् ना सौ लौकिकौ * * * * ? इति प्रेक्षावाप्तिनन्मत्तवहन्मत्तवदु प्रेक्षणीय एवे * * *?] अथान्यथापि परया युक्त्या दर्शयति॥ तदेव चास्फुटी? करोति॥

२५अ) ॐ भ्रान्तित्वे चावसायस्य न जडाद्विषय स्थितिः। ततो जास्त्ये
निजोल्लेख निष्ठान्नार्थ स्थितिस्ततः॥ २१॥ अनेनैव हेतुना
पूर्वोक्तेना वसायस्यानुभव स्थित्या। तस्य च
भ्रान्तित्वेनावस्थित्या। तेन च जात्यत्वात् तस्मान्नविषयानुभव
स्थितिः॥ भ्रान्तित्वेन शुक्तौरजतवत् सर्वत्रा प्रामाण्यामेव॥ अथ
चेत् अजात्ये सति। ततस्तस्मात् हेतोः। निजोल्लेखनिष्ठात्
स्वात्माशविस्रान्तेस्ततस्तम्साज्ज्ञानात्। नार्थस्थितिः। न तस्मात्
प्रमेयता सिद्धिरयमित्यादिवत्॥ यतस्सर्वत्रायं प्रसिद्धः
स्वात्मांशनिष्ठत्वावभासः॥ अनुभवस्यानुभवे
विश्रान्तित्वं स्मरणे च स्मरणविश्रान्तित्वं। इत्यभिज्ञायां च
प्रत्यभिज्ञा विश्रान्तित्वं चेति सिद्धम्॥ [तत्र घटोयं
पटोयमित्यात्यनुभवः। स एव * * * * * * *? यो मयादृष्टः स
एवेचनीमहं स चापि इति प्रत्यभिज्ञानं] न कोपि केन चिद्गृह्यत इति
। निजोल्लेखनिष्ठत्वात्॥ अथ च॥ प्रामादमारुह्य॥
प्रामादादीक्ष्यत इत्यत्र लिब्लो?पेपंचमी॥ इत्यनेन
प्रासादमारुह्येक्ष्यत इतिवत्॥ तथा ततस्तमवलम्ब्य परं
ज्ञानांशं तथापि स्वांशनिष्ठत्वान्न तेनाप्यर्थ सिद्धि
[इत्यनेनापि न किंचित् सिद्धिः] रिति प्रोक्तमेवास्मत्परमगुरुभिः॥ २१
॥ एवं हि सति चित्स्वरूपस्वात्महं भावाभावेनुभव

स्मरणादीनि ज्ञानानि किल सर्वाण्येव बोध्यबोधक
हीनानिस्युरित्यनुभवास्यहमिति को ब्रूयात्॥ वास्मराम्यहमिति च॥
पूर्वमेतद्दृष्टं मया इदं पश्याम्यहं॥ जातश्च
पश्यन्नहमग्रतः॥ इत्यादि परस्परानुगति हीनमेवस्यात्
यद्यनुभावक आत्मानुभवितानस्यादिति दर्शयितुमाह॥

ॐ एवमन्योन्यभिन्नानामपरस्पर वेदिनाम्
ज्ञानानामनुसन्धान जन्मानश्येज्जन स्थितिः॥

ॐ न चेदन्तः हतानन्त विश्वरूपो महेश्वरः
स्यादेकश्चिद्वपुर्ज्ञान स्मृत्यपोहन शक्तिमान्॥ २२ २३॥

२५ब) एवं हि सति चित्स्वरूप स्वात्माहं
भावाभावेनुभवस्मरणादीनि ज्ञानानि किल वा सर्वाण्येव
बोध्यबोधकहीनानि स्युः॥ एवं सति। अरभवास्यहमिति
स्मरास्यहमिति च को ब्रूयात्। जातद्सृष्ट पूर्वमासीत्। इदं
पश्यामि। एतश्चद्रष्टुं भविष्यति। इत्यादिना चान्यत्
परस्परानुगति हीनमेव हि स्यात् यद्यनुभावक
आत्मानुभवितानस्यादिति दर्शयितुमाह॥

ॐ एवमन्योन्य भिन्नानामपरस्पर वेदिनाम्।
ज्ञानानामनुसन्धान जन्मानश्येज्जन स्थितिः॥ २४॥

ॐ नचेदन्तः कृतानन्त विश्वरूपोमहेश्वरः।
स्यादेकश्चिद्वपुर्ज्ञानस्मृत्यपोहन शक्तिमान्॥ २५॥ एवं हि सति अन्योन्य भिन्नानां परस्परभिन्नस्वभावानां। तथा परस्पर वेदिनां च। स्वात्मांशेन भिन्नेनभिन्नस्वभावत्वात्॥ घटपटतटनीलपीतादिवत् परस्पर वेद्यवेदनाभावात्। न हि नीलं नामपीतं दृश्यते। तथापीतं वा नीलं रक्तं च॥ घटोवानपटः। स वानघट इत्यादि॥ योनुभव एवं सनस्मरणं। यत्स्मरणं। तन्नानुभव इति। तत्तद्भिन्नां शपातिनामित्युक्तेः॥ अत एवोक्तं मूले। अन्योन्यभिन्नानामपरस्परवेदिनां। ज्ञानानामनुभवादीनां यानुसन्धान जान्माजन स्थितिः॥ एकस्यान्योनुरीत एव॥ तदभावे हितदभावात् मृदभावे घटभाववत्॥ वातन्त्वभावेपटभावात्। इत्येवमनुसन्धानजन्मा एवं व्यवहारेणानु प्राणिता जनस्थितिन्नश्येत्। कोपि न व्यवहर्तुं शक्नुयात्॥ कदा तदा तदा कदा॥ इत्यपरश्लोकेन हि सम्बन्धः॥ तथा हि॥ २४॥

२६अ) ॐ न चेदन्तः कृतानन्त विश्वरूपो महेश्वरः।

स्यादेकश्चिद्वपुर्ज्ञानस्मृत्यपोहन शक्तिमान॥ २५॥

यदिनान्तर्हृदब्जकोश विवरान्तरहमिति स्वरूपेणाहं जानामीति।

तथाहं करोमीति कर्ता ज्ञाता महेश्वरो हि स्यादेकश्चिद्वपुरिति

सम्बन्धः तथा ज्ञानस्मृत्यपोहन शक्तिमान्॥ तत्र

ज्ञानमनुभवः॥ सरणं च स्मृतिस्सामेमातेतिवत्। अपोहनं

नामगौरयं नागौरश्च इति शक्तिमान्॥ अयं चात्राशयः॥

अनुभवस्मरणादिष्वनुस्यूत एवात्मा चित्स्वरूपभया

भातभासमानरूपः सूत्रेमणिगणवदादि सिद्धो महेश्वरो।

भूतभविष्यद्वर्तमानादिषु स्थित इत्यत्रकोन्यो ब्रूयादिति

सिद्धमेव॥ तथा च। शब्दस्पर्शादयो वेद्या वैचित्र्याज्जागरे

पृथक्। ततो विभक्ता तत्संविदेकरूपान्नभिद्यत इति॥ तथा च

स्पन्दे॥ जाग्रदादि विभेदेपि तदभिन्ने प्रसर्पति। निवर्तते निजान्नैव

स्वभावादुपपलब्द्धृतः॥ अहं सुखी च दुःखी च रक्तश्चेत्यादि

संविदः। सुखाद्यवस्थानुस्युतेवर्त्तन्तेन्यन्त्रताः

स्फुटमित्यादिना॥ इत्येवं सर्वत्रायमनुस्यूत एवात्माहमिति

भासन रूपोनुभवस्मरणाढौ कर्ताज्ञाता महेश्वर इति सिद्धो

ज्ञानप्रकाशानन्दमयचिद्वपुः परमेश्वर इत्यनेन

बौद्धमतनिरासः॥ तेन च स्वपक्षस्थान दृढाशयत्वमिति

सिद्धम्॥ इत्थं चानेन मार्गेण बौद्धवृद्धमतान्तरं

निराकृत्य स्वपक्षस्य स्थापनेन दृढास्थया॥ यद्भुतं यश्च वा भव्यं वर्तमानं च यत्पुनः। सर्वत्र प्रोत एवात्मा तत्रतत्रार्क विम्बवत्॥ अथातः प्रत्यभिज्ञायाः कौमुद्याः कर्तुमुत्सहे॥ प्रारम्भमृडामार्गेण विचार्यगुरुशास्त्रतः॥ २५॥

इति श्रीप्रत्यभिज्ञा कौमुद्यां भट्टारकानन्दकृतायां चतुर्थमाह्निकम्॥

२६ब्) इदानीं बौद्धवृद्धानामुपेक्षणीयमुन्मत्तादिवन्मतं। कुममत पूमतमोमालिन्यं सर्वमात्मेति चैतन्यानलस्फुरज्ज्वालामहत्तेज सा निराकृत्य। स्वमतदृढी करणयुक्त्या परमेश्वर स्वरूपस्सर्वमात्मेति सर्वत्रानुस्यूत एवेति। पंचमाह्निकाद्यावद्ग्रन्थ समाप्तिं शास्त्रार्थ गर्भीकरण युक्त्या प्रतिपादयितुमाह॥ अथातश्च ग्रन्थारम्भः ॥

ॐ स हि पूर्वानुभूतार्थोपलब्ध्या परतोपिसत्। विमृश्यन् स इति स्वैरीस्मरन्नीत्य न दिश्यते॥ २६॥ एवं हि सिद्धे पारमेश्वर स्वरूपे स्वात्मनि तमेवात्मानं स्मरतीत्य पदिश्यते। अहं स्मरामीत्यनया युक्त्यास्मर्तायमेव। यः

पूर्वमनुभवानुभावकः। यश्च पूर्वमनुभावयन् मयेदं

दृष्टं घटादि प्रत्यक्षानुभवेन। तत्पुरतश्च।

यन्मयापूर्वं दृष्टमासीत् तदेवेदानीमहं स्मरामि।

सामेमातेतिवत्॥ अथ च। परदेशानुभूतमिह

स्मरामीतिनामजातिदेशकालादि योजनया सर्वमनुभूयत एव॥

इत्येवं विमृश्यन् स्वेच्छाचारतया। ततश्च

स्मरत्ययमितिव्यपदिश्यते॥ यदि चैवमात्मानस्यात् तत्

कस्येयमाख्या॥ २६॥ तथा हि॥

ॐ भासयेश्च स्वकालेर्थात् पूर्वाभासितमामृशन्। स्वलक्षणं

घटाभासमात्रेणाथाखिलात्मना॥ २७॥ यश्चमया दूरात्

किंचिदिदमित्यनुभूतं सद्वस्तुमात्रमेव केवलं स्वलक्षणं

नामजात्यादिराहित्येनैव पूर्वं॥ तदेव चाहमेवेदानीं

साकल्येन च स्मरामीति। *?र्थोयं। ब्राह्मणोयं।

श्यामोयमिघादिनान्नासजातिगुणादि साकल्येन गृह्यत एव॥ इत्यने

२७अ) नयोमयादृष्ट पूर्व आसीत् स एवायं ब्राह्मण इति

तदनन्तरं जात्यादि युगनुभवस्मृति ज्ञानं सिद्धमेव।

इत्येनेनानुभवितास्मर्तात्मासिद्धः स्वत एवेति सिद्धम्॥ २७॥ एवं

पूर्वोक्तं यत्तदेव च दृढयति भवे॥

ॐ न च युक्तं स्मृतेर्भेदेस्मर्यमाणस्यभासनं तेनैक्यं
भिन्नकालां संविदां वेदितैष सः॥ २८॥

ॐ नैव ह्यनुभवोभातिस्मृतौ पूर्वोर्थवत् पृथक्।[प्रागन्ध भूवमहमित्यात्मारोहणभासनात्] एवं हि यत्यनुभवस्मरण यरो परस्परं चेदो हि स्यात्। तथ्येकोनुभवः। द्वितीयं स्मरणं नाम। इत्यनेन य एवानुभविता स एव कथं स्मर्तेत्यपदिश्येत द्वयोर्भिन्नत्वात्॥ तेन च परस्परसङ्गति हीनाकिलजन स्थितिः स्यात् द्वयोर्ज्ञानयो हि ज्ञातृद्वयदर्शनात्॥ तौ च काविति न कश्चित्। तस्मादनयोरभेदापत्तेः। य एवानुभविता स एव च स्मर्तेति कथ्यते॥ [यतोसौ वेदितेति कथ्यते। यतश्च] मया प्रागनुभूतं मिदमित्यनेन। वा प्रागन्ध
भूवमहमित्यात्मन्यारोहेणाभासात्॥
अनेनानुभवस्मरणयोरभेदेन वेदकस्यात्मारोहेण भासनमिति सिद्धं अत एव च पूर्वोनुभवोनामस्मृतौ पृथक् नाभाति। प्रागन्धभूवमहमित्यात्मारोहेणैव भासनात्॥ अतश्चैवमेव सिद्धं। यो यमात्मा स्वप्रकाशवेदक स्वरूपः स चानुभविता पूर्वं। स्मर्तेति पश्चात् कथ्यत एव। नात्य इति॥ यतश्चा सा वेव वेदितां॥ एष एव च स इति सिद्धः॥ परंतु पदार्थानि घटोयं।

पटोयं। नीलमिदं। पीतमिदं। इत्यादीनिपरम
रभिन्नानिवेद्यानि। न चैवमात्मावेदक इति सिद्धम्॥ २९॥

२७ब) ननुयद्येव मनुभवस्मरणादावात्मा व्यापकः
स्वप्रकाशकर्तृत्वेन सर्वासुदशासु सर्वकालं स्फुरित
एवप्रवर्ततेसु भवितृतया तत्कर्तृत्वेन च। इति यदुक्तं।
तदव्याप्तित्वेना योग्यमेव॥ लोकोत्तरवर्णनेनसर्वत्र
प्रमातृसत्वेन प्रमेयास्पदाभावात्॥ तथा च योग्यवलोकने हि
मृत्पाषाणादि च सुवर्णायते। तथा वा सुवर्णादि च
मृत्पाषाणं तायातीति तत्र किं न
योगादिदशास्वप्रमातृप्रमेयादि व्यवहारो स्यात्मन इति
तदव्याप्तेरेव न सकृत्रतद्यापकत्वसिद्धिः॥ इत्याह॥

ॐ योगिनामपि भासन्तेन दृशोदर्शनान्तरे।
स्वसंविदेकमानास्ता भान्तिमेय पदेपि वा॥ ३०॥
दर्शनान्तरेनुत्तरदर्शनविशेषेस्वसंविदेक निष्ठतया
परमसमाधौ। दृशोज्ञानानि वेद्यानि। घटादि नीलानीलादीनि।
न तत् स्वरूपतया। अयं घटः। अयं पटः। इदं नीलं। इदं
पीतं वा। इत्यादि न नियति तत्वा भात क्रमेणाभान्ति। अपितु तत्

तद्घटादिज्ञानेपि मेयपदप्राप्ते स्वयं चिद्रूपतयैवा भान्ति।

तस्ययोगिनस्सर्वमिदं विश्वं चिन्मयमेव। अचिद्रूपस्या

बाह्यवेद्याभावात्॥ तत्सर्वं तस्य प्रकाशानन्दमयमिदं

जगदितिभावः॥ तथा च॥ योगिनां तु विशेषोयं सम्बन्धे

सावधानतेति॥ तता च श्रीस्पन्दे॥ गुणादिस्पन्दनिष्म्स्य?न्दः

सामान्यस्पन्दसंश्रयात्। लब्धात्मलाभाः सततं

स्युर्ज्णस्यापरिपन्थिनः॥ अप्रबुद्धधियस्त्वेते स्वस्थितिस्तलनोद्यताः

॥ पातयन्ति दुरुत्तारौपरेसं सारवर्तमनि॥ अतः सततमुद्युक्तः

स्पन्दतत्व विविक्तये। जाग्रदेवनिजं भावमचिरेणाधिगच्छति॥

तथा च श्रीभगवान्। यानिशा सर्वभूतानां तस्यां

जागन्निसंयमी। यस्यो जाग्रति भूतानि सानिशा पश्यते मुनेरिति॥

२८अ) तथा च। यदस्तियद्भाति तदात्मरूपं न चान्य च भाति न

चान्यद्रूपं। स्वभावसंवितृतिभाति केवलाग्राह्यं ग्रहीतेति

मृमाविकल्प इति॥ इत्यनेन प्रमातृ प्रमेयादि पदेपि तेषां तत्

स्वभावावभासात्॥ इत्यत्र किमाश्चार्यादि दशया॥ तेन ते

स्वातन्त्र्यश्चैर्य शक्तित्वेने स्वरवद्यत् कुर्वन्ति।

तद्भवत्येवावश्यकतया। किं पुनराश्चर्यं

मोहनस्तम्भनादौ विशेषे॥ तस्मादनेन सर्वत्र तेषां तदैक्य

प्रथामात्रानुभवस्मरणादौ कथं न तथात्वेनानुभवो हि

स्यादितिभावः॥ अत एव च न तस्यानुभवस्मराणादौ कश्चिद्विपर्यय इति हि स्थितम्॥ ३०॥ अत एव चैतत् सिद्धौ पूर्वोक्तमेव दृढयति॥

ॐ स्मर्यते यद्दगामीन्मेसैवमित्यपि भेदतः
तद्व्याकरणमेवास्यामवादृष्ठमिति स्मृतेः॥ ३०॥ सादृग्मे आसीती। इत्येवं भेदने यत्स्मर्यते। तन्मयादृष्टमित्यस्याः स्मृतेः तत् तस्यात्मनो व्याकरणमेव॥ विभज्याकरणं। नतु सान्या॥ [व्याख्यां] इत्येवमात्मनोनुभवस्मरणादौ प्रवृत्तिः॥ ३०॥ पुनरप्येत देवदृढयति॥ अनुभवस्मरणादौ स एक एवव्याप्रियते बोधकर्तृ प्रमातृत्वेनेति दर्शयति॥

ॐ या च पश्यास्य हमिमं घटोयमिति वा वसामन्यते समवेतं
साप्यवसातरिदर्शनं॥ ३२॥ पश्यास्य हमिमं घटं। वद्येतामापन्नं वस्तुमात्रं। घटोयमिति वा। इत्यनेन द्वय रूपेण भातभासमाना च याव सा। अवसायः। स चा वसायि कर्तरि। हेतुभूते स्वप्रकाशे स्वात्मनि समवेतमेव मवसायसमवाय सम्बन्ध विशेष युक्तं मन्यते॥ तत्स्वभावात्तस्य॥ तयोश्च ग्राह्यग्राहक सम्बन्धादपि॥ तयोश्च गुणगुणिवत्॥ क्रियाक्रियावतोर्वा। सम्बन्धवत्॥ जातिव्यक्तिसम्बन्ध

बद्धास्तेदत्वेनाश्रयाश्रय्य विनाभाव विशेषात्॥ इत्युक्तं वक्ष्यते च॥ ३२॥ इदानीमयमेवात्मनुभविता कर्ता

२८ब्) ज्ञाता महेश्वरः सर्वत्रव्यापकश्चिदर्कवदिति निगमयति॥

ॐ तन्मया श्श्रृते दृष्टोयं स इत्यामृशत्यपि। ग्राह्यग्राहक ना भिन्ना वर्थौभातः प्रमातरि॥ ३३॥ एवं हि मयादृश्यते॥ वा दृष्टः। अयं स इति त्रिपुटीमयेनाहं स्वरूपात्मन्यामृशत्यपि प्रमातरिभिन्नतया॥ अथ चातः। ग्राह्यमेतद्घटादि। ग्राहकश्चायमात्मा प्रमाता॥ इत्येवं द्वावर्थौ प्रमातरिभातः। ग्राह्यग्राहकतयाभिन्नावर्थौ स्वात्मनोभातः॥ तथा च॥ प्रकाशस्यात्मविश्रान्तिरहंभावो हि कीर्तितः। उक्ता च सैव विश्रान्तिस्सर्वापेक्षानिरोधत इति॥ तथा च॥ विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यत इति च॥ तथा च॥ स्वभावमवभासस्य विमर्शं विद्वरन्यथा। प्रकाशोर्थोपरक्तोपि स्फटिकादिजडोपम इत्यादिना च॥ तस्मादेवं सिद्धं। इत्येवं तदित्यस्यार्थः॥

इति श्रीमत्तृत्यभिज्ञाकौमुद्यां

भट्टारकानन्दनाथकृतायां पंचमाह्निकं

समाप्तिमगमपराद्भट्टारिका सहायतयेति शुभमस्तु

श्रीपत्यभिज्ञापविच्त्रित हृदयानाम्॥

इदानीं यत्सदसन्नीलपीतादि स्थूलास्थूल

चराचरादिजगदिदमाभाति। तत्सर्वं चिन्मयमेव।

परमेश्वरोन्मेष चिश्शफटा?मात्र स्वरूपं

स्वात्मन्यध्यासेनारोपितं सत्। तरङ्ग इव वारिधावितिनिश्चितं।

स्वस्वात्म परमेश्वरान्तस्सत? सदस्सद्रूप तयैव बहिराभाति।

सतस्सज्जायत इत्युक्तेः। तदन्तः स्थितिं विनाबहिः प्रसरायोगात्।

मयूराण्डरसवदिति सूत्रद्वयेन प्रतिपादयितुमाह॥

ॐ वर्तमानाय

२९अ) भासानां भावानामवभासनं। अन्तः स्थितवतामेव

घटते बहिरात्मना॥

ॐ प्रागिवार्थो प्रकाशः स्यात् प्रकाशात्मतया विना। न च

प्रकाशोभिन्नः स्यादात्मार्थस्य प्रकाशता॥

ॐ भिन्ने प्रकाशे चा भिन्ने सङ्करोविषयस्य तत्। प्रकाशात्मा

प्रकाशोर्थौ॥ ना प्रकाशश्च सिद्ध्यति॥ प्रत्यक्षेण हि भासमानानां घटादिभावानां। भवन्तीतिभावा हि पदार्थाः तेषामव भासोनाम प्रकाशः। प्रत्यक्षभूते चित्स्वरूपे स्वात्मनिह्यन्तः स्थितवतामेव मयूराण्डं सुवर्णादिरसवद्बहिः प्रकाशो नियति तत्व कृतो। घटोयमित्यादिना विद्यावच्छिन्नोयमाभासोन्तर्बहिराभासरूपो न घटादिना प्रमेय पदवीमा रूढ इति सिद्धोयं क्रमः॥ अथं च यद्येवं हि न स्यात् तर्हि प्रत्यक्षतया पूर्वं ज्ञाते घटन्तेर्ज्ञानेनाज्ञात इव स्यात्। परस्परव्याप्तभावात्। अव्याप्तेश्च॥ तत् केन कं गृह्णीयात् तत् कार्यं कारणे सदेव बहिः प्रत्यक्षी भवि तु मर्हतीति। यथा मयुराण्डरसवत् सुवर्णताम्रनीलादि युक्ता देव हि रसात्तन्मयुरप्रस्फादि तत् तद्विचित्रतया बहिर्यातीति सिद्धान्तः॥ नैव च प्रकाशोनामवस्तुनोभिन्नः॥ परस्पर समवायात्॥ यतश्च प्रकाशो नामार्थस्यात्मेति सिद्धम्॥ एवं हि स्वात्मन्य भिन्नश्च। एक एव सर्वत्र व्यापक इत्यर्थः। यदिवस्तुनो भिन्नेतदा विषयाणां सङ्करः॥ घटमानय। पटमानयेत्। पटमानयेन्यादौ मृदमानयेत। इत्यादिना विनाबोधनौ ज्ञानात्मकरोपि हि स्यात्॥ इत्यनेन प्रकाशोर्थोपि

२९ब्) प्रकाशात्मैव॥ यतश्च हेतोन्ना प्रकाशो हि सिद्ध्यति॥

वेद्यस्य हि वेदकाभावे पाषाणवत् केन गृह्यत इति भावः॥

तस्मातृरमेश्वरे स्वात्मनियत् किं च न तद् बहिरप्यस्ति

वान्तरपीतिनिरपवादः परिकरः॥ यदन्तस्तद् बहिरित्युक्तत्वात्॥ तथा

च सांख्याः॥ असदकरणादुपादानग्रहणात् सर्वसंभवात्।

शक्तस्यशक्यकरणात्कारण भावाश्च सत्कार्यमित्यादिना॥

असत अकरणादप्रत्यक्ष द्वाद्वाह्ये। समवायसिद्धेश्च

परस्परं। सर्ववस्थात् पाद न शक्त्यभावादेकस्य वस्तुनः॥

शक्तस्य कर्तुश्च सक्यकरणा देव॥ यदेव हि शक्यते कर्तुं तदेव

करोति। यथामृत् घटं। तन्तवः पटमिति वा। न घटः पटं।

नापितन्तवो घटमित्यादि च॥ कार्येषु प्रतिकारण भावाश्च॥

यथा मृत्तन्तु सुवर्णानां तस्मात्कारणे सदेव

कार्यमयपदवीं बहिरप्यधिरोहति अथोच्यमेवं

बाह्यार्थवादिन्नुल्लेखमालया। बाह्यार्थभिन्नया [वेद्यं]

बाह्यं नामास्तु तत्वतः॥ बोधाऽभिन्नं प्रमारूपं तत्

तद्धटपटादिभिः। भिन्नस्वरूपं विलसत्कल्पना जालसञ्चितं॥

किं भवत्कल्पनाकारबाह्येनानेन तत्वतः। पूर्वपूर्वतरा

वृद्धावयं बाह्यर्थवादिनः॥ इदानीं

बाह्यार्थवादमुत्थाप्यल्लेखतया॥ तस्यापि च पश्चात्

द्वात्मांशोविलोप्य॥ सर्वमिदं चिन्मयमेव चिद्वपुषि

परमशिवस्वरूपेन्तःस्थं बहिराभातीति प्रकटोयं वादोत्र न किमपि बाह्यं नामेति दर्शयति सूत्रस्वयेन॥

ॐ तत् तदाकस्मिकाभासो बाह्यं चेदनुमापयेत्। नह्यभिन्नस्य बोधस्य विचित्राभास हेतुता॥ न वासना प्रबोधोत्र विचित्रो हेतुतामियात्।

३०अ) तस्यापि तत्प्रबोधस्य वैचित्र्ये किं निबन्धनं॥ ३॥

यश्चोल्लेखतया तत् तदा कस्मिकाभासोहमेवमेव करोमिवा

जानामि। वा। एवमहं गच्छामीत्यादिना च।

बाह्यमनुमापयेद्यदि। न चा भिन्नस्य बोधस्य विचित्राभास

हेतुता इति कथमा कस्मिकाभासो बाह्यमनुमापयेत्।

भ्रमिमात्रेणैव हृदयङ्गमत्वात्॥ नापिवासना

प्रबोधोबाह्यमनुमापयेत्॥ सापिचोल्लेख प्रकारेणैव

मृगतृष्णैव भ्रमिमात्रतया कथमनुमापयेत्॥ यथा

भोममात्मन्। इह जीविकानास्ति। अहं गच्छामि राजद्वारमार्गं।

तत्र प्राप्त्वा राज्ञः स्वमनो राज्यं संश्राव्ययद्राजादास्यति।

तदर्ध भागस्या श्वंस्वगतिं मार्गगामिनं गृह्णामि॥

तमारुह्य च परं देशं गच्छाम्य शक्तेः तत्र लक्ष्यपरिमितं

धनं निर्जित्य। स २०००० गृहे प्रेष्यामि। स २०००० गुरोः॥ स २००००

पत्न्याः॥ स २०००० मित्राणां॥ स २००००

अलङ्कारवस्त्राभरणादीनि॥ इत्येवं वासनादयर्का केन च

कृताः स्थिराश्चा स्थिराश्चानाश्रय विशेषात्॥ एवं वैचित्र्ये च

किं निबन्धनं॥ किमपि न॥ अतस्तयोराकस्मिक वासनाबोधयोरपि

स्वात्मान्तः कल्पितेना कारेण बहिः प्रसराणात्तन्मयमेवेदमपि

युगलवेत्ये वेदकतामापन्नं सदात्सोलास इत्येव कथ्यते॥ तेन

विना सिद्धेरिति च प्रोक्तं॥ अतोयत्प्रोक्तमन्तः स्थमेवबहिः

प्रकाशयति तदेव सारं॥ नापि च बाह्यं नामानेनापि किंचिदिति

भावः॥ ३॥

३०ब) अथानन्तरमेवं निश्चिते मति सर्वमिदं विश्वं

स्वप्रकाशचिन्मयमेवातो बाह्यस्य वेद्येस्या भावाद्यद्भवति

तद्वदेकाभिमतमिति दर्शयति॥

ॐ स्यादेतदवभासेषु तेष्वेवावसिते सति। व्यवहारे किमन्येन

बाह्येनानुपपत्तिना॥ ३८॥ भोबाह्यार्थवादिन्। अवभासेषु

विमर्शात्मकप्रकाशेषु। तेष्वेव च व्यवहारे वसिते निश्चिते। सति॥

अवभासान्तर्व्यहारोस्ति बहिरपि प्रकाश्यते। घटोयं नीलं

पीतं रक्तं वेदमित्यादिना। इत्येवं निश्चिते सति अन्येन

बाह्येनानुपपत्तिना। अयुक्त्येदमिति स्फुरितेन। न तु युक्त्या। तया न

किंचिदिति। अयुक्त्या तु किंचिदिति॥ इतीमावाचो बाह्यार्थसत्तावाद
कुण्ठताः कुकार्यं संपादन बद्धकक्ष्याश्चन कार्याहो
इत्यलमेभिर्वाशोभिः॥ ३८॥ अतश्च॥

ॐ चिदात्मैव हि देवोन्तः स्थितमिच्छावशाद्बहिः।
योगीवनिरुपादानमर्थं जातं प्रकाशयेत्॥ ३९॥ इदानीं
निगमत्यपि॥ अयं स्वप्रकाशश्चिदात्मान्तः स्थितं भावजातं
पूर्वोक्तं स्वेच्छयो शेषदशया बहिरप्ययमिदमित्यादि
रूपेणाभासयति॥ कथं निरुपादानं। समवाध्यसमवाय।
निमित्तादि बाह्येत्येन सम्भारेण॥ क इवयोगी यथा। सोपि
योगदशायां। स्थितः॥

३१अ) सर्वमिदं विश्वमुन्मीलयति। वा निमीलयति च। निरुपादान
सम्भारमेव॥ उदयं प्रभुर्विश्वसाक्षीविश्वोत्पादकोथ
पालकोपि स्वान्तःस्थं विश्वमेतद् बहिःप्रकाशयति [तथा च
बद्धानारायणः॥ विरुपादान सम्भारमभित्तावेतन्वते
जगश्चित्रं नमस्तस्मैकलान् लाघ्याय शूलिने॥] इति किमयं
वागाडम्भर पूलिधूसरतमोमालिन्य स्वीकार इत्यलं॥ ३९॥
ननुयद्येवं। तर्हि चतुर्विधप्रमाणेषु
प्रसिद्धमनुमानाख्यं प्रमाणमप्रत्यक्ष वेद्यगमकं

धूमप्रत्यक्षेग्निर्वामकमिति तदेव प्रमाणतरं सर्वत्रशास्त्रेषु। इति तदेव बोधय तु बाह्यं वान्तरं चेति प्रत्याह॥

ॐ अनुमानमनाभातपूर्वेनैवेष्ठमिन्द्रियं। अभातमेव भीजादेर्बाह्यस्याभासवस्तुनः॥ आभासः पुनराभासाद्बाह्यस्यासीत्कथञ्चन। अर्थस्य नैव तेनास्य सिद्धिन्नाप्यनुमानतः॥ ४०॥ ऐन्द्रियमनुमानं। पूर्वमनाभाते। धूमवत्। अग्न्यादौ वस्तुनि। अतीन्द्रिये। नवेष्ठं। न प्रमाणमित्यर्थः। आभात एवेन्द्रियादि प्रवृत्तेः। अनाभाते तु। गुरुवासरसोमवासरयोर्वृद्धिर्भवत्येव॥ तद्दैव वशान्नाभूत्॥ इत्थमेवानाभासात्मनि च कुरादिना व्यापारोपिनेष्ठः॥ धूमदर्शनादत्राग्निरस्ति तत्र नासीदिति केचमनुमानप्रवृत्तिः॥ ततो बीजादावपि बाह्यस्या भासवस्तु न आभातमेव॥ बीजादवस्यमङ्कुरोत्पादः॥ इति दृश्यत एवप्रत्यक्षतया। ततोन्तर्वर्त्ति वस्तुन आभासात्वा ह्यस्याभासः घटोयमित्यनेन न सिद्ध्येत्॥ अव्याप्तेः॥ तेन चास्य बाह्यस्य सिद्धिर्नाप्यनुमानतः। अतीन्द्रियादावप्रवृत्तस्य। अपि तु या वद्दूरं चक्षुर्मात्र ग्राह्योघटस्तावदनुमानप्रवृत्तिरित्येतदनुमानादि

कथमतीन्द्रिय प्रवृत्ति निमित्तम्॥

३१ब्) आतश्चानुमानादपि बाह्यस्य न सिद्धिरितिभावः॥ ४०। ४१॥

इदानीं निगमयति॥

ॐ स्वामितश्चात्मसंस्थस्य भावजातस्य भासनं। अस्त्येव न विनातस्मादिच्छामर्शः प्रवर्तते॥ ४२॥ आतश्च स्वामितस्तु स्वात्मसंस्थस्य भावजातस्य भासनं बहिरन्त्येव॥ न च तस्माद्विना तस्येच्छामर्शो हि प्रवर्तते [इच्छामशो हि नाम किंचित् कर्तुमकर्तुं प्रवर्तते]॥ ४२॥ यतश्च

ॐ स्वभावमवभासस्य विमर्शं विदुरन्यथा। प्रकाशोर्थो परक्तोपि स्फटिकादिजडोपमः॥ ४३॥ यतश्चावभासस्य बोधात्मकस्य विमर्शशक्तिः स्वभावमेव विदुः॥ अन्यथा प्रकाशोर्थो परक्तोपि स्फटिकादिवज्जडप्राय एव हि स्यादिति निश्चयः॥ अत्रायं भावः॥ अहमित्यन्तः स्फुरदात्मा चिदचित्स्वभावो बाह्य प्रतिबिम्बितस्सन् विमर्शशक्त्यासु व्यापारेण । अहं जानामि। करोमि॥ गच्छामि। मुपामि चेत्येवमादौ विमर्शव्यापारेणाह्यानर्हादि स्वसुक्रियादौ व्याधृतः सन्। व्यवहरतीति। अत आत्मनस्सहजा विमर्शशक्तिरिति कथ्यत एव॥ विना

तेन पाषाण प्रख्यत्व प्रसङ्गात्॥ ४३ १॥ तस्मादेवं सिद्धे।

ॐ आत्मानमत एवायं ज्ञेयी कुर्यात् पृथक् स्थितिः। ज्ञेयं न तु तदौन्मुख्यात् खण्डेतास्य स्वतन्त्रता॥ ४७॥ अत एव च यज्ज्ञेयं तदप्यस्यात्मैव बाह्यार्थवादनिरासात्॥ अत एव चायमात्मा महेश्वरः। स्वात्मानमेवभिन्नयत्॥ ज्ञेयी कुर्यात् बाह्यार्थ त्वेनाभासयति॥ भिन्न स्थित्या स्वात्मनः॥ निश्चतस्तु ज्ञेयं नामनलोशतोपि। न भूतं। नास्ति। नोभावि च तत् सत्तायां चास्यात्मनः स्वतन्त्रता खण्डेत। विनश्येत॥ तत् संगेन हि तत्संङ्ग। स्यात् तेन च तादात्म्य प्रतिप्रतिपत्ल्या तदात्मकता स्वरूपलाभास्वात्म रूपप्रश्यावः स्यात् इति हि स्थितम्॥ ४७॥

३२अ) तथा चास्मत्परमेष्ठिपादा अपि॥ निराभासात् पूर्णादहमिति पुराभासयति यद् द्विशाखा माशास्ते तदनु च विभङ्कुनिजकलाम् । स्वरूपा तन्मेषप्रसरणनिमेष स्थिति ज्वषस्तदद्वैतं वन्दे परमशिवशक्त्यात्मनिखिलम्॥ इत्यादिना अत एव च हेतोः॥

ॐ स्वातन्त्र्या मुक्तमात्मानं स्वातन्त्र्यादाद्वयात्मनः। प्रभुरीशादि संकल्पैर्निर्माय व्यवहारयेत्॥ ४८॥ अतश्च स्वतन्त्रता सिद्धन्पादात्मनः आत्मानं स्वातन्त्र्यादमुक्तं

प्रभुर्महेश्वरः। स्वेच्छया विमर्शशक्त्यात्मना। इत्थं करोमि इत्थं गच्छामि॥ एवं महंभवामि। एवं स्वात्मानाभावयामीति च निर्माय। ईशोहं। शिवोहं। सदा शिवोहमित्यादिना चक्रीक्रीडित्तमिच्छति। एवं तस्येच्छा विमर्शात्मकं शक्तिसंचय प्रवर्तनमित्यत्र परमेश्वर एव हेतुः॥ ४८॥ एवमस्य परमेश्वरस्य पंच वत्यि पंचशक्ति स्वातन्त्र्यात् स्वातन्त्र्यमिति दर्शयति॥

ॐ नाहन्तादि परामर्श भेदादस्यान्यतात्मनः। अहं मृश्यतयैवास्य सृष्टेस्तिङ्वश्य कर्मवत्॥ ४९॥ अत्रायमाशयः॥ अहं शिवः। अहं जीवः। अहं ब्रह्म। अहं विष्णुः। अहं वा महेश्वरः॥ इत्यादिनाहन्तादि रूपेणनास्यान्यत्। अन्य स्वरूपता॥ शिवोहं शिव एव। ब्रह्माहं। ब्रह्मा। विष्णुरहं विष्णुरेव॥ परंतु तत्र तत्राहमिति स्वरूपशिष्ठत्वादहमिति न द्द ग्तो भवति॥ यथा कनके कटककुण्डलमाला कङ्कनमुद्रिकादिभेदेषु कनक एवावशिष्यते। न कुण्डलादि। तदुदयं मपि स्वात्माहमिति विशिष्ठ रूपतयाशिष्येत इति॥ तथा च॥ नानाविधवर्णानां रूपं धत्ते

३२ब) यथामलस्फटिकः। सुरमानुष्य पशुपादप रूपत्वं

तद्वदीशोपीत्यादिना परमार्थसारसंग्रहे॥ तदत्राप्यहन्तैव पारमार्थिकी समनन्तर प्रत्यया नान्यत्॥ तत्र च किंवत्॥ तिज्वाश्य कर्मवत्॥ यथा जुहोति जुहुतः। जुहुन्ति। इत्यादावेक द्वित्रिभेदा एव॥ न तु ह वनक्रिया भेदः॥ सा च सर्वत्रमाधारणेति सिद्धम्॥ ४९॥ नन्वेवं विधायाः पराचितेः कथं संकल्पविकल्पादिकमपरषा स्वरुपमित्याह॥

ॐ माया शक्त्याविभोः सवैभिन्न संवेद्य गोचरा। कथिताज्ञान संकल्पाद्यवसायादि वामभिः॥ ५०॥ मीयते प्रमीय तेन या घटादिनीलानीलादि जातं भिन्ना कारतयेति माया॥ तथा च माया बिम्बोवशी कृत्यतां स्यात् सर्वज्ञा ईश्वरः। अविद्या वशगस्त्वन्यस्तद्वैचित्र्यादनेकधेति॥ इत्येवमविद्या वशगो जीवस्सैव च चितिरिति कथ्यते। तेनैव च वशगत्वेन सा चित् भिन्नसंवेद्यगोचरा। घटोयं। गौरियं। इत्यादिना वैचित्र्येण॥ ज्ञानसंकल्पादिनामभिस्सैव च प्रोक्ता। ज्ञानं च। संकल्पश्च। तथाध्यवसायश्च॥ इत्येतैनामभिः प्रोच्यन्ते॥ तत् तदध्यासादविद्यावशगत्वेनेति भावः॥ ५०॥ नन्वेवमनुभव संकल्पदि स्मरणादिषु विकल्पत्वात्शूलत्वेन च वर्तमान स्वभावत्वादस्तु चितेरन्तु वर्तनं॥ यत्रत्वभिलाप संजल्पादि निष्कलावार्थायामनुभवदशामात्रे किचिदिदमित्येव हि स्यात्॥

तत्र च कथमेतत्प्रवृत्तिः। एतदप्रवृत्तौ हि। न किंचिदवैदिषमिति वदप्रवृत्तिरेवचितेरिति कथं सर्वत्रायमात्मा व्यापकः विश्वसाक्षी सर्वत्रप्रोत एव इत्येवं निवारयन्दर्शयति॥

३३अ) ॐ साक्षात्कारक्षणेप्यस्ति विमर्शस्योदयः कथम्।
धावनाद्युपपद्येत प्रतिसन्धानवर्जितम्॥ ५१॥ उरादागतस्य। दूरदृष्टस्य किंचिदिदमितिमृश्यमानेन तत्रापि विमर्शोनामास्त्येव॥ तं विनानुभवमात्रासिद्धेरिति वक्तव्यम्॥ तदनन्तरं चायं स इति जातिगुणक्रियादिवानसौव्या प्रियते च इत्यनेनात्रापि विमर्शवांश्चिदेव प्रवर्तमानोनुभवितुमुत्सैहत इति भावः॥ तद्विपर्यये तु। राज्ञा कृताज्ञस्तत्कार्यार्थं धावन् प्रतिसन्धाने वर्जितमभिलापादिर्वाहित्ये नैव कथं तद्धावनाद्युपपद्यते॥ यद्येवं तत्र विमर्शवान्बोधनो स्यात्॥ तथा च स्पन्दे॥ अतिक्रुद्धः प्रहृष्ठो वा किंकरोमीति वा मृशनी। धावन्वायत् पदं गच्छेत् तत्र स्पन्दः प्रतिष्ठित इति ननु परमेश्वरे सर्व कर्तृत्व स्वरूपे सिद्धे। यश्च तस्यास्तदेवस्त च बहिराभाति। भासयति चायमहं स्वरूपेणैव। इत्यत्र च यदिदमिति रूपेण घटाद्याकारतया भासयति तत्र किं कारणमित्याह॥

ॐ घटोयमित्यध्यवसानाम रूपातिरेकिणी। परेशशक्तिरात्मेव भासतेनन्विदन्तया॥ ५२॥

ॐ केवलं भिन्न संवेद्यदेशकालानुरोधतः।
ज्ञानस्मृत्यवसायादि सक्रमं प्रतिभासते॥ ५३॥

नाम्ना रूपेण चोद्रिक्ता। या घटोयमित्यवसा अवसायः। निश्चयः अयं घट इति रूपेणेति सा परेशस्यप्रभोः शक्तिरेव स्वस्वरूपशिवभासते॥ अन्तरात्मतया। नन्विदन्तया। वेद्यतयाभासत इति भावः॥ परं तु केवलं भिन्न संवेद्यतया देशकालानुरोधने। ज्ञानां स्मृतिः। अवसायादि ससक्रमं भासत इति भाव॥

३३ब्) घटोयं। पटोयं। इत्यादीनि भिन्न संवेद्यानि। तत्र च यद्देशकालानुरोधः॥ देशे कुत्रापि वा काले तत् संभवात्॥ तत्र ज्ञानं नाम। अयमिदमित्यादिनानुभव रूपेण॥ तत्पुरतश्च तत्स्मरणं। पूर्वं मयानुभूतं यत्तदेव च तदिति॥ तत्र चावसायोनिश्चय इत्येतद्विश्व व्यवहारमार्गानुसरणं॥ इत्येत देव च सक्रमं प्रतिभासते। परमार्थतस्तुना क्रमः। नापि क्रम इति तदवशिष्यते केवलं ज्ञानं ब्रह्माख्यं

पारमेश्वरं तत्वमिति न किंचित् सक्रमं प्रतिभाति तथा च विज्ञान वादिनोपि॥ यदाभासं प्रमेयं तद्विज्ञानाना हृते पुनः । ग्राहकाकारसंवित्योस्त्रयं नातः पृथक् कृतम्॥ इत्यादिनैकस्यैव बोधस्यत्रयात्मतया प्रतिभासान्नान्यत्॥ ५३॥

इति श्रीमद्भट्टारकानन्दनाथरचितायां प्रत्यभिज्ञाकौमुद्यां षष्ठममाह्निकं समाप्तिमगमत्॥ इति शुभमस्तु श्रीशिवपासकानां इदानीं स्वात्मनि माहेश्वरे परभैरव स्वरूपिणी यदहमनहं स्वरूपद्वयं स्वभावेनैवा भाति। तन्नक्वापि हानिस्ततस्वरूपस्यति प्रकाशयन्कारिकात्रयेणाह॥

ॐ अहं प्रत्यवमर्शोयः प्रकाशात्मापि वाग्वपुः। नासौ विकल्पः सद्युक्तोद्वया क्षेपीविनिश्चयः॥

ॐ भिन्नयोरवभासो हि स्याद् घटाघटयो द्वयोः। प्रकाशस्यैव नान्यस्यभेदिनस्त्व वभासनम्॥

ॐ तद तत् प्रतिभा भाजामात्रैवातद् व्यपोहनात्। तन्निश्चयनमुक्तो हि विकल्पोघट इत्ययं॥ ५६॥ यश्चान्तरहमिति

प्रत्यवर्शः। अहं करोमि॥ अहं जानामि॥ अहं सुपामि। अहं गच्छामि॥ इत्यादौ यदहमित्यवमर्शोनाम।

३४अ) स चाहमित्येव रूप एव॥ शुद्धस्वातन्त्र्य लक्षणश्चित् पूर्णाहन्तात्मकस्सर्वत्र भासमान स्वभावश्च। न च तस्य गच्छामि करोमीत्यादिना महौपाधिस्पर्शादिना नानात्वमेव। तेन च स्वस्वरूप प्रश्याव इति वेदितुं शक्नुयात्॥ निराभासात् पूर्णादित्याद्युक्त लक्षणात्॥ यतोयं प्रकाशात्मा। सदा प्रकाशमाचिद्वपुः॥ अत एव च वाग्वपुः॥ अन्तक्षीनपरावाग्रूपपरमार्थः शुद्धसंविद्वपुरित्यर्थः॥ अमौन हि विकल्पोनाम॥ अपितु द्वयाकेपी विनिश्चयः॥ अहमनहं रूपस्य विनिश्चयोनामेति भावः॥ एतदेवचाह॥ भिन्नयोर्घटाघटयोर्द्वयोरेवावभासो नामावुभासनं। इदमित्यनेन। प्रकाशस्यैव। न चान्यस्य कस्यचिद् भेदिनस्त्ववभासनमिति॥ तदितरस्य हि प्रकाशतानुपपत्तेरिति हि सिद्धम्॥ तथा च॥ मात्रा प्रमात्रा च। तदतर्प्रतिभाभाजा। घटोयं न पट इति॥ अतत्व मोहनाश्च। सर्वस्य तत् स्वरूपत्वा देव। तन्निश्चयनं च निश्चयीकरणं। पृथग् ज्ञानं नाम। घट इति विकल्पः व्यपोहनाभावात् तदतदोः। परस्पर सा कल्येन च घट इत्ययं विकल्प इति॥ एतदपि माहेश्वर्यं तत्त्वमेवेति

नान्यद्वेप्यदि॥ वाह्यतस्तु घट इत्ययं विकल्पं इति सिद्धोयं क्रमो नाम तस्मात् सर्वपरिगृहीतः सर्वस्यायमात्माहमिति स्वरूपसंभिन्नश्चा साविति॥ ५६॥ ननु शुद्धप्रमातृ स्वरूप अहमित्यात्मनि कथमनहमित्यध्याहार अध्यासेनानुपयोगत्वात्॥ य एवं म कथमेवं। य एवं च स कथमेवमिति भ्रममात्रं भिन्दन्नाह॥

ॐ चित्तत्वं मायया हित्वाभिन्न एवा व भातियः। देहे बुद्धावथ प्राणे कल्पितेन भासीवया॥ प्रमातृत्वेनाहमिति विमर्शोन्य व्यपोहनात्। विकल्प एव स परप्रतियोग्यवभासजः॥ ५७॥ अत्रायमाशयः। अहमित्यवमर्शोद्विधा। शुद्धोमायीयश्च॥ तत्र शुद्धः

३४ब्) प्रकाशमानसं विद्रुपः। अशुद्धस्तु शरीरदण्डा प्राण बुध्यादौ प्रमातृताहं रूपेण स्थितः प्रकाशमान स्वरूपं हित्वा प्रधानीकृत्य तत्प्रमातृताभिमानतया व्याप्रियते। अहमेव देहादिः॥ वा नीलानीलौ च प्रमेये प्रमातृत्वाभिमानवान्। इत्यनेन चित्तत्वं मीथात्मीकरण युक्त्या हित्वा देहादौ नभः पर्यन्ते प्रमातृत्वेन भिन्नावभासवदाभाति॥ अहं देही। अहं प्राण इत्यादि च॥

अन्योनेति व्यपोहनात्॥ विकल्प एव सः॥ परप्रतियोग्यवभासजः॥
अहं देही न प्राणः। अहं वा प्राणः। न बुद्धिः॥ अहं वा
बुद्धिः। न नभ इत्यादि परप्रतियोगित्वं॥ तत्र चावाकाः
पाकजोत्पत्तिपरिणामादि बलादस्थिरं शरीरमात्मेति मत्वानः॥
मन्यन्ते च॥ ततश्च काणादप्रभृतयो ज्ञानमुखाद्याश्रय
भूतां। बुद्धिमेवात्मानं मन्यन्ते॥ ततोपि केचन श्रुत्यन्तविदो
वुभुक्षापि पासायोग्यं प्राणमेवात्मनं मन्यन्ते॥ अपरे च
शून्यब्रह्मवादि साङ्ख्य प्रभृतयस्सकल वेद्य
राशिविनिर्मुक्तं शून्यत्वान्नभस्तुलं महाभूताकाश
स्वभावं नभस्तत्वं प्रमातृत्वेनात्मानमाहुः॥
अयमत्राशयः॥ माया वशत्वेन चित्तत्वं विहायन्देहे
बुद्धावित्यादौ यः प्रमाता। सोपि विकल्प एवान्यव्यपोहन
व्यापारात्॥ परप्रतियोग्यत्वाश्च॥ इत्यनेन युद्धाहं रूपस्य न
कापि शुद्धाशुद्धादिशङ्का॥ परंतु माया संपर्क
वशाश्चिदचिदादि संस्कारात् तत् तदध्याहार इत्यवधातं॥ ५७॥
अपि च॥

ॐ कदाचित्कावभासे या पूर्वाभासादि योजना संस्कार्कल्पना
युक्ता सापि भिन्नावभासिनि॥ ५८॥ योहं बालः स एवाहं तरुणः
। यस्तरुणः। स एव च वृद्ध इत्यादिनाया पूर्वाभासादि योजना।

कदाचिद्भवेद्देहादौ॥ पूर्वानुभवसंस्कारात्। सापि च भिन्नावभासिनि कल्पना प्रोक्ता। इत्यनेन मायावच्छिन्नस्मन् क्रिडति प्रभुरेवेति तत्र काक्षतिरिति सर्वमनवद्यम्॥ ५८॥

३५अ) इदानीसमुमेवार्थं पूर्वोक्तं चतुः श्लोकार्थेनान्यया युक्त्यानिगमयति॥

ॐ तदेवं व्यवहारेपि प्रभुर्देहादिपाविशन्। भान्तमेवान्तरर्थो घमिच्छया भासयेद्बहिः॥

ॐ एवं स्मृतो विकल्पे वाप्यपोहन परायणे।
ज्ञाने वाप्यन्तराभासः स्थित एवेति निश्चितम्॥

ॐ किन्तु नैसर्गिको ज्ञाने बहिराभासनात्मनि।
पूर्वानुभवरूपस्तु स्थितस्सस्मरणादिषु॥ ६२॥

ॐ सनैसर्गिक एवस्ति विकल्पे स्वरैचारिणि।
यथाभिमत संस्थाना भासनाद्बुद्धि गोचरे॥ ६३॥

तत् तस्माद्धेतोः। प्रभुर्देहादिमाश्रित्य। अहं करोमि। अहं

जानामीति व्यवहरन्। अन्तःस्थमेवार्थौघं बहिः

स्वेच्छथैवोन्मेषेण भासयेत्॥ तस्मादस्य प्रभोः। अनुभवे।

ततः स्मृतौ। ततो विकल्पे ततश्चापोहन परायणे। गौरयं नाश्व

इति निश्चये वा ज्ञाने चान्तराभासः स्थित एवेति निश्चयः॥

तस्माश्च बहिराभासनात्मनि घट इत्यनुभवे। स्मरणे

पूर्वानुभवोनाम स्थितः प्रतिष्ठित इव॥ सोयं यो मया दृष्ट इति

॥ सोयं देवदत्त इति वश्च॥ तस्मात् प्रभोरन्तःस्थं भावजातं

बहिरपि प्रकाश्यत इति तदपि चिदद्वय रूपमेवभावजातं

प्रकाशमानं प्रकाशात्मकमेवेति सिद्धम्। अतश्च स

पूर्वानुभव रूपः स्वैरचारिणि विकल्पे स्वेच्छा चारिणि

घटादिविकल्पे। नैसर्गिकः स्वाभाविक एवास्ति सोयं देवदत्तः।

सचायं वामनदत्तः। यो महायज्ञादौ निमन्त्रित आसीत्॥

इत्यादिनाभिमत संस्थाना भासनान्निर्मलायां बुद्धौ

प्रकाशनात्॥ अत एव च तदेव माहेश्वरं तत्वयश्च

सर्वत्रानुभवस्मरणादौ व्याप्तसदहमिति स्वरूपेण

३५ब) स्वात्मान्तरस्थं बहिरपि प्रकाशयति॥ इत्येवमहं

बोधलक्षणा वृत्याहं बहिरन्तः प्रकाशयत्येक इति भावः॥ ६२॥

इदानीमनेनान्तः स्थितमेव बहिःप्रकाशयति प्रकाशात्मा

प्रकाश्यमर्थं। इत्थं जानन्नेव प्रत्यभिज्ञामासाद्य

सर्वमेवेश्वर प्रत्यभिज्ञात्मकं विज्ञान सा स्वाद्य कृतकृत्योभवत्येवेत्यधिकरण सिद्धान्तदिशानायाससिद्धमित्येवं दर्शयन्नाह॥

ॐ अत एव यथा भीष्ट समुल्लेखावभासनात्।
ज्ञानक्रिये स्फुटे एव सिद्धे सर्वस्य जीवतः॥ ६३॥

अयं चात्रभावः॥ सर्वस्य जीवत इत्यत्र जातावेकवचन विभक्तिनिर्देशः॥ यथा। शक्तित्रिपुनतालोक शास्त्रका व्याद्यवेक्षणात्। काव्यज्ञशिक्षयाभ्यास इति हेतुस्तदुद्भवे॥ अत्र तस्य काव्यस्योद्भवेनिर्माणे। एते हेतव एव हेतुः। एकवचनान्तेन। न तु हेतव इति बहुवचननिर्देशने॥ इत्येर्थमत्रापि सर्वस्य जीवत इत्यनेनमन्येषां जीवाश्रयाणामिति॥ तथा हि॥ गृहात्बहिर्निर्गतः सन्॥ ग्रामतरुणं तरुण्या नववञ्चलमञ्जरी सनाथकरम्। पश्यन्त्या भवति मुहुर्मलिना हितरां मुखच्छाया इत्येवं पश्यन्। देवदत्तो विमृश्यति। किमियं सरोरुहपत्त्राक्षी सलिनमुखाजातेति॥ ततश्चनायं स्वरूपसौन्दर्यादि गुणयुक्त आसीत्। एवं तरुणं दृष्ट्वामोहितेति॥ तस्माज्ज्ञायते। वञ्जुललता गृहे चतुसङ्केतानागतासीति व्यङ्ग्यं॥ इत्यनेन मलिनमुखा जाता॥ इत्येवं विज्ञाय स्वकार्यप्रवृत्तिं प्रवृत्तः॥ इत्यनेना

स्यास्य ज्ञानक्रिये स्वत एव

३६अ) सिद्धे सर्वस्यापि जीवत इति॥ इत्येवं सर्वत्रपश्चादावपि ज्ञानक्रिये स्वत एव सिद्धे॥ पशुरपि गृहान्निर्गत्यमार्गे वारण्ये। वारामादौ यद्यत् तृणाद्युपभोज्यं जानाति तदेव भुञ्जति। यन्न कण्वकतृणादि भुञ्जति॥ अतश्च तस्यापि ज्ञानक्रिये सिद्ध एव ॥ इत्यनेन पशोरपि ज्ञानक्रिये स्वत एवसिद्धे। तत्कस्य न सिद्ध्येत ज्ञानक्रियाख्य युगलमि *?भावः॥ अत एवोक्तं॥ ज्ञानक्रिये स्फुटे एव सिद्धे सर्वस्य जीवत इति॥ कुतः॥ पूर्वोक्त यथाभीष्ठ समुल्लेखावभासनात्॥ इत्येवमधिकरणसिद्धान्ते न परमानुमानेना नाथामसिद्धं प्रत्यभिज्ञात्मक शास्त्रार्थ समुश्चयमिति भावः॥ यस्मिन्नर्थे सिद्धे तदनुया पून्यप्यर्थान्तराण्यापि सिद्ध्यन्ति। सोधिकरण सिद्धान्तः॥ यथा स्वात्मा परमेश्वरो बोधरूप स्वस्वभावो न भवस्मरणादौ व्याप्रियत एवा॥ अहं जानामि। अहंकरोमीत्यादिना॥ इत्यस्मिन्नर्थे हि सिद्धे। तदनुयायून्यप्यर्थान्तराणि॥ कर्ताज्ञाता च महेश्वर इत्यपि सिद्ध्येत्॥ तत् सर्वोयं जीववान्ज्ञानक्रियादि युक्त इति सिद्धम्॥ ६३॥

इति श्रीमत्प्रत्यभिज्ञाकौमुद्यां

श्रीभट्टारकानन्दनाथकृतायां सप्तममाह्निकं

समाप्तिमगमत्॥

३६ब) इदानीं यदेभिर्बौद्ध वृद्धैः पूर्वं

प्रश्नतमोमालिन्यमुत्थाप्यात्मानुभवाद्यनुभावक एव नास्ति।

अनुपलम्भात्॥ स च कोयं। वा शरीरं। वा प्राणः। वा बुद्धिः

वा नभ इत्यादिना। स्वमुखमालिन्यमेवरचितं। तदिदानीं

तन्मतमालिन्यं निराकृत्यात्मानं दर्शयति प्रत्यक्षतया

परमन्देहापनुत्तये च॥

ॐ या चैषा प्रतिभातत् तत् पदार्थ क्रम रूषिता अक्रमानन्त

चिद्रूपा प्रमाता स महेश्वरः॥ ६४॥ यदयं प्रकाशानुत्तर

रूपो महेश्वरः। अहमिति विमर्श स्वभावः। तत् स एव

स्वातन्त्र्यानन्द चिदात्मा बोध इति कथ्यते सर्वत्रानुस्यत

एवानुभवस्मरणादिषु सर्वदासंविन्मात्ररूपं इति हि पूर्वं

प्रतिपादितमेव॥ तत् सैव च संविच्छैवं विधा। तत् तत्पदार्थ

घटादि प्रतिबिम्बमयी नानात्वमापाद्यते॥ स्वयं च

चिदाभासैक स्वरूपा तत् तत्स्पर्शास्पर्शव्यतिरिक्ता। अत एव

चाक्रमानन्तचिद्रूपेति कथ्यते॥ अत एव च सैव यतो

मातृमानमेयादि त्रिपुटीमयी तदैक्यता पादकबोध स्वभावा

प्रमातेति। महेश्वर इति कथ्यते॥ तदात्मकत्वात्॥ तयोश्चान्योन्यं व्याप्तश्चेति सम्बन्धः॥ तथा च तन्त्रालोके॥ एकस्यसंविन्नाथस्य ह्यान्तरी प्रतिभातनुः। सौम्यं वान्यन्मितं संविदूर्मिचक्रमुपासते॥ आन्तरी प्रतिभा स्वातन्त्र्य शक्तिः॥ तत् तत्सौम्यारौश्रदिनियताकारा वच्छिन्नत्वान्मितं॥ एतदेव च विभज्यदर्शयति। अस्यस्यात् पुष्टिरित्येषा संविद् देवी तथोदितात् ॥ ध्यानात् संजल्पसंमिश्राद् व्यापाराश्चापिरहितः॥ तस्माद् बिम्बेश्वरो बोधभैरवः समुपाश्यते। अवच्छेदानवच्छिद्भ्यां भोगमोक्षार्थिभिर्जानैः॥ येपि बोधाद्विभिन्नं

३७अ) हि किंचित् पूज्यतया विदुः॥ तेपि बोधं विविश्चना बोधाभेदेनमन्यते॥ इत्यादिना॥ तथा चान्यत्र॥ इयमात्मापरानन्दा संविदेषास्वयं प्रभा॥ एषा संवित् स्वयं प्रभा। स्वप्रकाशा अवेत्यद्वे सत्य परोक्षत्वात् व्यतिरेके घटादिवश्चेति॥ यत्र यत्रा वेद्यत्वेमत्र परोक्षत्वमस्ति। तत्र तत्र स्वयं प्रकाशत्वं॥ यथा संवित्॥ यत्रयत्रा वेद्यत्वे सत्यपरोक्षत्वं नास्ति। न च तत्र स्वप्रकाशत्वं। यथा घट इति व्यतिरेक दृष्टान्तः॥ इत्येवं पूर्वकृतोयमन्वयव्यतिरेक व्यवहारः॥ तथा चैतन्यमात्मेत्यादि संविद एवेवैवं ग्रहणात्

॥ तथा च। न तत्र सूर्योभाति न चन्द्रतारकं ने मा विद्युतोभान्ति कुतोयमग्निः। तमेवाभान्तमनुभाति सर्वं तस्य भासासर्वमिदं विभाति॥ तथा च वेदः॥ हिरण्यगर्भः समवर्तताग्रेभूतस्यजातः पतिरेक आसीत् सदधार पृथिवींद्यामुतेकां कस्मैदेवाय ह विषाविधीम॥ इत्येवं स एव प्रमाता महेश्वरो नामेदानिं पूर्वप्रसिद्धः सर्वत्रध्यातृ ध्यानध्येय रूपः। परमशिवः। शिवादिक्षित्यन्त षड्विंशत् तत्व हेतुस्सर्वशक्तिकारणमिति सिद्धः॥ ६४॥ इदानीं वद्य वेद्यवेदकयोर्व्याप्तेः परस्पर सम्बन्धेनान्योन्यं सम्बन्धपाणि ग्रहणं प्रदर्श्यते॥

ॐ तत् तद्विभिन्नसंवित्तिमुखैरेक प्रमातरि। प्रतितिष्ठत्सुभावेषु ज्ञातेय मुपपद्यते॥ ६४॥ यश्चेदानीमान्तरत्वात् प्रमात्रैक्यने बहिरनुसरणं भावानामिति यदत्र वेद्यवेदकयोः परस्पराव गति सम्बन्धः॥ स एव चानयोत्बन्धु समागमोनाम सम्बन्धः॥ ज्ञातेयं बन्धता तेषां क्रमाद् भावसमूहयोः॥ तयोः परस्परं बन्धुतेति भावः। घटादिषु भावेषु हि प्रमातरि प्रतितिष्ठत्सुसत्सु गच्छत् सुसत्सु

३७ब) एव परापनयनं विनैव। घटोयमित्यादिना

परस्परबन्धुत्वं हि सुगमेवेति तद्विदः॥ अतः सिद्धोयं विद्वत्क्षमः वेद्यवेदयोरान्तरयोरेव बहिरपिवेद्यवेदनक्रमोस्यतित इति भावः॥ ६५॥ इदानीं यद्येतदभावे। कथं हि तयोः परस्परसम्बन्धो नामेति दर्शयति ॥

ॐ देशकाल क्रमज्वषामर्थानां स्वसमापिनाम्। सकृदाभास साध्यो सा वन्यथा कः समन्वयः॥ ६६॥ यद्येवं न स्यात्। तर्हि कथं समन्वयो नाम हि स्यात्॥ तदनपेक्षि तस्य हि तदनपेक्षा प्रवृत्ति प्रसङ्गात्॥ तदपेक्षि तस्य च तदपेक्षा प्रवृत्ति प्रसङ्गादेवेति तद्विदः॥ तस्मात् सकृदाभाससाध्यो। परचिद्बोधैक साध्यो। साधनार्हः॥ समन्वयः सम्बन्धः कः । कोपि न॥ अर्थानां तत् तत्घटादीनां देशस्य कालस्य। क्रमंज्वषन्ति मेवन्क्रीति। के दृशानां सतां। स्वसमापिनाम्॥ स्वस्मिन् रूपे। आन्तरे स्वात्म स्वरूपे समाप्तिं यातानाम्॥ तद्व्यतिरिक्तत्वेन हि कस्समन्वय इति सम्बन्धः॥ अतश्चैकोदेश वृत्तिः । अन्यश्च कालवृत्तिः। अन्यश्च क्रमवृत्तिः॥ अथ च देशकालयोः क्रमज्वषामिति। एतत् स्वभावानामर्थानां बोधैकसाध्योसौ क्रमोन्यथा। तदभावे यावत् स्वसमाप्तिं। क इति सम्बन्धः॥ ६६॥ ननु देशकाल क्रमज्वषामर्थानां किं सकृदाभाससाध्यः

सम्बन्धः॥ यतो हि। अनुमान प्रक्रियासु हि धूमोग्निहेतुः। यत्र न धूमोग्निरपि न तत्रेति हेतु हेतु मतोरभेदविवक्षया हेतुरेव हेतुमन्तं श्रावयेत् इति किमनेन पुनरपि तुच्छतरेण बोध्यबोधनैक्य रूपेण व्यवहारेणेत्याह॥

३८अ) ॐ प्रत्यक्षानुपलम्भानां तत् तद्भिन्नांशपातिनाम्।
सकृदाभास साध्यो सा वन्यथा कः समन्वयः॥ ६७॥ इह घटे प्रत्यक्ष दृष्टे। गौर्नलभ्यते॥ तदनन्तरं च ग्रावादयोपि प्रत्यक्षेणैव पश्यति॥ इमागाव इति॥ ततोन्धत्व बधिरत्वादेर्यदि घटं न पश्यति। तद्वदयोपि हिनं पश्येन्त्येव। इत्येवं प्रत्यक्षाभ्यामनुपलम्भैश्च यत्कार्यकारणभावः। परस्परं। सचैक प्रमातृज एव॥ आत्मज एव॥ प्रतृत्वेन सर्वत्र बोध स्वरूपात्॥ अन्यथा हि धूमादीनां हेतु हेतुमतां पूर्वत्र प्रसिद्ध स्वात्मांशमतनिष्ठानां परस्परबोधना सम्भवात्॥ तथा च॥ तत् तद्भिन्नांशपातिनामिति॥ तदेवं सिद्धं॥ सकृदाभाससाध्यो यदि समन्वयो न स्यात्॥ तर्हि भिन्नांशपातिनां प्रत्यक्षादीनां हि कः समन्वयः। कोपिनेति हि स्थितम्॥ तथा हि पर्वतोयं वह्निमान्। धूमवत्वात् यो यो धूमवान् समोग्निमान्॥ यथा महान सः। यो यो न। समोना यथामह्लदः॥ इत्यादौ हि कोन्वयो धूमाग्न्योः परस्परम्॥

प्रकाशाप्रकाश स्वभावत्वात्॥ इत्यनेन भिन्नांशत्वात् प्रमातृ बोधांशं विना न कापि युक्तियुक्तिमतां॥ तदन्यथा कः समन्वय इति कथितमितिभावः॥ ६७॥ तस्मात् पूर्वोक्तमेव निगद्रढयितुमाह [सनन]

ॐ स्मृतौ यैव स्वसंवित्तिः प्रमाणं स्वात्मसम्भवे॥
पूर्वानुभवसम्भावे साधनं सैवनापरं॥ ६२॥ एवं पूर्वोक्तमेव यैव संवित् पूर्वानुभवे। घटोयमित्यादौ॥ सैवस्मृतौ पश्चात् तन्मया दृष्टमित्यादौ॥ इत्यनेनानयोर्बध्योबोधकयोः परस्परसम्बन्धाभिधो। जनव्यवहार इति सिद्धम्॥

इति श्रीमद्भट्टारकानन्दनाथकृतायां प्रत्यभिज्ञाकौमुद्यां अष्टममाह्निकम्॥

इदानीं येप्यन्ये बाध्यबाधकालोकानालोकादि व्यवहाराश्चान्ये भाववादि पूर्वप्रसिद्धा चार्यकृताः॥ बोधात्मक स्वात्मना किं प्रयोजनं॥ वाध्यबाधकादि व्यवहारेण हि कार्यकारणाद्युपलब्धेरित्यलं वेदकात्मनाहं रूपेणात्मना॥ इत्येवं सन्धानस्तानेवं भूतां नादौ

संवादमात्रेणाङ्गी कृत्य॥ पश्चात् तेषां मतमपि स्वात्ममत आलोच्य?॥ बाह्यान्तरव्यवहारश्चैक प्रमातारं विनान सिध्यतीत्याह॥

ॐ वाध्यवाधकभावोपि स्वात्मनिष्ठा विरोधिनाम्॥ ज्ञाना न मुदियादेक प्रमातृपरिनिष्ठितेः॥ ६९॥ शुक्ताविदंरजतं इत्यत्र शुक्तिशुक्लादिगुणनेन योरजता देर्बाधः॥ सै च प्रमातृ पेक्ष्यां विना न सिध्यति॥ शुक्तौ न रजतं। शुक्तिकामौ क्तृत्व प्रसङ्गात्॥ शुक्ति काशौ क्तृत्वमेवात्र प्रमाणमिति॥ न रजत ज्ञानमज्ञानादिना॥ परस्पर विरोधा पत्तिप्रसङ्गात्॥ इत्थं तेन परस्परं ज्ञानयोस्स्वात्मांशनिष्ठत्वात्परस्पर हेतु हेतु सम्भाव विरोधात्॥ कुत्र शुक्तिः कुत्र च तत्र रजतादि। कुत्रतच्छौ क्लं चेति परस्पर विरोधादनयोस्तस्मादत्रैक प्रमातृता हेतु सम्भावं विना न तत्रापि परस्पर विरोधाविरोधज्ञानाव गतिरिति भावः॥ इत्थं नापि तत्र बाध्यबाधकादि व्यवहारस्य स्वत एव सङ्गतिरपि त्वेक प्रमाता बोधात्मा स्वयमात्मानस्यात् साक्षी इदानीं संभावमात्रेणान्यथापि प्रमातृ पेक्षां विना न सिध्येत् प्रमातारं विना सिद्धेः॥ इत्यपि दर्शयन्नाह॥

ॐ विविक्तभूतल

३९अ) ज्ञानं घटाभावमतिर्यथा तथा चेच्छुक्ति ज्ञनं रुप्य ज्ञाना प्रमात्ववित्॥ ७०॥ ये अभाव वादिन् यत्येवं वदसि। शुद्धं भूतलज्ञानं। इह भूतले घटोनास्तीति॥ यथा च घटाभावमतिः। घटाभावप्रतीतिः॥ भूतलस्य शुद्धत्वात्वेक वलभावेन। तथैव चेच्छुक्ति ज्ञानमपि केवलं। रुप्य ज्ञाना प्रमात्ववित् रुपज्ञानाभाव हेतुरिति॥ तश्चनास्ति॥ ७० ॥ यतश्च॥

ॐ नैवं शुद्धस्थल ज्ञानात् सिद्ध्येत् तस्या घटतात्मता॥ न रूपलब्धियोग्यस्याप्यत्रा भावो घटात्मता॥ ७१॥ नायं नियमं। शुद्धस्थल ज्ञानेन। इह भूतले घटोनास्तीति। तेना घटात्मता न सिद्ध्येत्॥ किं नो पलब्धि योग्यस्याप्यत्र भूतले घटोस्तीत्यत्रापि घटाभाव एव॥ स्थूलघटायोः स्वस्वभिन्नांशे स्वरूपसम्भवात्॥ न च घटस्थल योरन्योन्यं हेतु हेतुमद्भावः। भिन्नांसत्वात्॥ तद्यथा शुद्धस्थल ज्ञानेन घटा भावमतिः। तथा शुद्ध सूलज्ञानेनापि। परस्पर भिन्नांशत्वात्॥ इत्यनेन हि शुद्धाशुद्धस्थूलज्ञानं सममेवेति किमनेनापि वेद्यवेदकभाव एक प्रमातृतां विना न सिद्ध्येदितिभावः॥ ७१॥

तदेवेदानीं दर्शयति॥

ॐ विविक्तं भूतलं शश्वद्भावानां स्वात्मनिष्ठितेः॥

तत्कथं जात्ततज्ज्ञानं भिन्नस्याभावसाधनम्॥ ७२॥

भूतलं सर्वदा विविक्तमेव घटादीनां भावानां स्वात्मनिष्ठितः। स्वात्मांश घटस्थलादिनिष्ठत्वात्। अयं घटाः। इदं च सूलमिति॥ न च घटोयमित्यनेन सूलत्वा व गमस्त्यात् परस्परैक्यावगमात्॥ न च स्थूलमिदमित्यनेन घटप्रतीतिः। न च तत् तयोः॥

३९ब) तस्माद्युक्तमेतत्॥ विविक्तं भूतलंशश्वद्भावानां स्वात्मांशनिष्ठत्वात्॥ तस्मादेव हेतोस्तज्ज्ञानं तत्स्थूलज्ञानं कथं स्वात्मनो भीन्नस्य घटस्या भाव साधनम्। अभाव हेतुः स्यादिति न कदापि भीनयोः परस्पर हेतु हेतु सद्भावः॥ ७२॥ न चैवमभावमात्रेण किं चिदुपनतमित्याह॥

ॐ किन्त्वा लोकचयोन्धस्य स्पर्शो वोष्णादिदिकोमृदुः। तत्रास्ति साधयेत् तस्य स्वज्ञानमघटात्मताम्॥ ७३॥ अन्धस्य प्रकाशव्यतिरिक्तात्मनः चक्षुरभावाद्य आलोकपुञ्जस्तेन

चोष्णादिकस्पर्शः। त्वगिन्द्रिय वृत्त्या॥ तेन च तस्या घटात्मतामपि स्पर्शवत्या व्यक्तीभवति॥ इत्येतदस्येवावश्यकतया न च तदस्ति स्पर्शो उष्णादिक एवा घटात्मतां साधयति॥ तत्रापि च चित्स्वरूपप्रमाता व्यापकस्तेन स्पर्शादिना हेतुना जानात्येव॥ नत्वत्रस्पर्श एव हेतु। स्वांशात्मनिष्ठतया भिन्नस्वभावत्वात् इति प्रोक्तं वक्ष्यते च॥ ७३॥ न चैवमपि किंचिदासाद्यते प्रयोजनादि॥ इत्याहुः॥

ॐ पिशचः स्यादनालोकोप्यालोकाभ्यन्तरे यथा अदृश्यो भूतलस्यान्तः निषेध्यः ससर्वथा॥ ७४॥ इह भूतलोपिशाचस्थापनास्ति॥ इह वहवटे यक्षः प्रतिवसतीतिवत्॥ परंत्व प्रत्यक्षतया॥ तत्र च पिशाचोनास्तीति नवाश्यं॥ वक्रमशक्त्यंत्वात्॥ आगमप्रमाणेनसर्वप्रमाणप्रमाणेन साध्यसिद्धत्वात्॥ यदि चा प्रत्यक्षोपि तत्रपिशाचस्तथाप्यत्र प्रत्यक्ष एवागमप्रामाण्य सिद्धेरितिभावः॥

४०अ) एवं यथेह भूतले घटोनास्तीति निषेधो व्यवहर्तुं शक्त्यते तथेह भूतलेपिशाचोनास्तीति न व्यवहर्तुं शक्तयात्॥ आप्तवाक्य विरुद्धापत्ति प्रसङ्गात्॥ घटस्तु साक्षादालोकेपि प्रत्यक्षतयानिषेद्धं शक्यते। घटसमीपेय आलोकस्तस्य च

घटोपाधेन नवस्थानात्॥ अतस्तद्व्यतिरिक्तो निषेध्य एव सर्वथा॥ पिशाचस्त्वा लोकमध्ये वा भूतलमध्येपि सत्वेनालोकतां न प्रतिहन्ति। अतश्चानिषेध्य एव इत्यनेनापि न किंचिदन्योन्यस्य साधको हेतु हेतु सद्भावतया यः प्रसिद्धः स्यादितिभावः॥ परंत्वेक प्रमातृत्वे मृतिसर्वं सर्वत्रसिद्धेदितिकोयं निषेधव्यवहारः॥ येन व्यवहारेण हि स्वस्वरूपसिद्धं विहाय। परंसर्पज्जुवदाभातमाश्रयेदिति नात्र व्याप्तिः॥ नह्यकृतके प्राप्ते कृतकमाश्रयेदिति हि व्याप्तिः॥ तस्मादत्राप्याभास एव प्रमातृतया प्रकाशात्मा प्रकाश्यमर्थमाभासयतीति सर्वसिद्धान्त निश्चयः॥ इदानीमभाववादिनामपि स्वमुखमालिन्येन नभस्तमो धूमरजोमालिन्यादिवत् मतं निराकृत्य। स्वपक्षस्थापनं निगमयति स्वप्रकृतयोजनेन॥

ॐ एवं रुप्यविदाभावरूपाशुक्तिमतिर्भवेत्। नत्वाद्यरजतज्ञप्तेः स्यादप्रामाण्यावेदिका एवं सिद्धे शुक्तिकाज्ञानेशुक्लस्वभावे सिद्धे। रजताभावरूपाशुक्तिमतिरपि सिध्येत्॥ न च तत्राद्य रजतज्ञानस्या प्रामाण्यां सिध्येत्॥ परस्परभिन्नस्वभावत्वादित्युक्तं। वक्ष्यते च। तत्सर्वोयं व्यवहारः प्रमात्रेपक्षां विना सिध्येदिति हि सिद्धम्॥ ७८॥

४०ब्) ननु यदि शुक्तिकादेर्भ्रममात्राद्रजतज्ञप्तिर्नास्ति

तर्हितत्रैवानुमानसाधनेन रजतप्रतीतिरस्तु॥ तथा हि॥ यत्र यत्र

हि सौक्ल्यं। तत्र तत्र हि रजतज्ञप्तिः। यथा हि नवनिधि विषयेषु

शुक्लरक्तादिनारुप्यसुर्णादि बुद्धिः। यत्र यत्र न वनिध्यादौ

शुक्लाशुक्लप्रतीतिः। तत्र तत्र सुवर्णासुवर्णादि प्रतीतिरपि॥ यत्र न

तत्र नापि। यथा काकिन्यादि सङ्खशुक्तिविषयादौ॥

इत्येवमनुमानतो व्यवहृतेः शुक्तावपि रजतप्रतीते सुत्किं न

ज्ञानं ज्ञानान्तरगम्यं। नापि चात्र

स्वात्मांशनिष्ठामात्रं भवन्मतविरुद्धमति कृत्॥ इत्यत्राहुः

॥

ॐ धर्म्यसिद्धेरपि भवेद्बाधानैवानुमानतः॥

स्वसंवेदनसिद्धा तु युक्ता सैक प्रमातृजा॥ ७७॥ यदुक्तं

नवनिध्यादावित्यादि॥ तद्वयं न मृषामहे॥ अनुमानादौ

पक्षसपक्षविपक्ष हेतु हेतु सद्भाव सत्तायामनुमानादि

व्यवहारः॥ न तु शुक्ताविदं रजतमित्यादौ। पक्षाभावे

सपक्षाभावात्। तदभावे च विपक्षाभावादपि।

मूलाभावेशाखा पल्लवाद्यभावात्॥ अथ च भ्रमिमात्र

प्रकाशनेन च विषयाभावात् तदभावे च विषय्यभावादिति हि

सिद्धम्॥ अत एव च धर्म्य सिद्धेर्वाधानामानुमानतोपि न भवतीति॥ प्रकाशमानसदातन नित्य व्याप्त विश्वैक रूपरूपे तु सिद्धे स्वात्मनि सापिवाधानामसिद्धा। सिद्ध्यति चेति गूरुवराज्ञा। स्वात्मानुभवश्चेति सिद्धोयं व्यवहारः॥ न चैतद्विना कापि युक्तिर्वा भ्रमिमात्रप्रतीतिश्चेति सिद्धम्॥ ७७॥

४१अ) इदानीमेतन्निगमयति सर्वं॥

ॐ इत्थमन्यर्थभिन्नार्थावभास खचिते विभौ। समलोनिर्मलोवापि व्यवहारोनु भूयते॥ ७८॥ इत्थमनेन पूर्वोक्तप्रकारेणात्यर्थं भिन्नाये पदार्थाः। नीलानीलादयः पदार्थाः। तैः खचिते व्याप्ते विभौ। आद्येशि वाख्ये परमतत्वे स्वात्मनि। समलः॥ घटोयं। पटोयमित्यादि। निर्मलश्च सोहमित्यादि च यत्किंचिदस्ति। शुद्धामशुद्धं स्थूलं सूक्ष्मं च। तत्सर्वमेव तत्रैवानुभूयत इति॥ अयमत्राभिप्रायः॥ शक्तिश्च शक्तिमांश्चैव पदार्थद्वयमुच्यते। शक्तयोस्य जगत्सर्वं शक्तिमांस्तु महेश्वर इत्यनेन शक्तिमात्योजः परमेश्वर इति वेदक इति ख्यातस्स एव। या चाभ्याशक्तिरिति सापि वदेकान्तर्भूतत्वेन चित्स्वभावा बहिरप्युन्मेषच्छजाया प्रमरतीत्येवं चित्सुधाच्छजामात्ररूपांसतिचिन्मात्र

रूपैवेतिनान्य द्वेद्यंनामेति भावः॥ तथा च पुरस्तात्॥

भावाभावावभासानां बाह्यतोपाधिरिष्यते॥

नात्मासत्तातस्तेषामान्तराणां सतां सदेत्यादिना॥

तस्मादुक्तं युक्तमेव॥ भिन्नार्थावभासखचिते विभौ।

समलोनिर्मलो वापि व्यवहारोनुभूयत इति॥ इत्येवं सिद्धं॥

मकुरबिम्बदवभासमाने जगत्यस्मिन्वेद्य वेदकाभिमत

भ्रमिमात्रं न किमपि व्यवह्रियते॥ यथा गन्धर्वनगरं यथा

वारिमरुस्थल इत्यादिनायत् प्रसिद्धतरमिति भावः॥ तत्सिद्धोसौ

प्रमातानाम स्वात्मा महेश्वरः॥ सर्वज्ञाता

कर्ताचानुभविता शिव एवेति सिद्धम्॥ इति

श्रीमद्भट्टारकानन्दनाथरचितायां

प्रत्यभिज्ञाकौमुद्यां नवममाह्निकं समाप्तम्॥

४१ब्) इदानीं यदेतत् समलोनिर्मलोवापि व्यवहारोनुभूयत इत्यादि

प्रोक्त पूर्वमस्ति। तदेवमायेव क्रमगत प्रत्यक्षा प्रत्यक्षतया

भासमानं ध्वनोद्यन्यथा॥

ॐ तात्कालिकाक्षसामक्ष्य सापेक्षाः केवलं क्वचित्। आभासा

अन्यथान्यत्रत्वन्धान्धतमसादिषु॥ ७९॥ अयं

चात्रभावाभावप्रकाशः॥ आन्ध्यबाधिर्यादि विशेषा प्राप्तौ

पुरुषस्यानुभावकस्यानुभवाः प्रत्यक्षतया घटोयं
पटोयं। नीलमिदं। पीतमिदं। इत्यादिनास्कुलं? भवत्येव॥
आध्यबाधिर्यादिमहोपाध्यभावात्॥ इत्येवमुक्तं क्वचित्॥
अन्यत्रापरथा च॥ आन्ध्यबाधिर्यतारतस्यात्वपाधिनात
एवानुभवाः प्रत्यक्षगोचरा। अप्रत्यक्षतां यान्ति। कुत्रापि च॥
प्रत्यक्षा प्रत्यक्षतां च यान्तीति॥ यथा किं श्रृणोषि। श्रुतं
परं तु मन्दंमन्दं॥ किं सृणोषि। किमपि न॥
एवमन्धतमसादिष्वपि॥ धावन्कार्यार्थं दिवापश्यन्सर्वं
गच्छति॥ अथचोत्पन्नेन्धकारे किमपि न पश्यत्यपि॥ तामसोपाधि
वृद्धिवशात्॥ इत्यनेनानुभवस्यायमेव विशेषः॥ अनुभावका तु
तादृक् स्वशुवो। यश्च दिवालोक विषये। वारात्रौचान्धकारविषया
वगाहिते सर्वस्मिन्विश्वेपि तादृक्
स्वप्रकाशबोधकनित्यनिरावरणसर्वव्यापि स्वभाव इति तत्र न
क्वापिहानिरिति। न द्वित्वं। न बहुत्वं चेति सिद्धम्॥ ७९॥ इदानीं
योनुभव रूपोनुभवात्मको बोधस्तस्या च न भेदभ्रान्तिरिति
दर्शयन्नाह॥

ॐ विशेषोर्थावभासस्य च वातद्विषयस्य च सत्तायां क्वचित्॥
विकल्पेषु भवेद्भाविभवद्भूतार्थगामिषु॥ ८०॥
योघटोमयानुभूतोर्यस्तं स्मरामि। पुरस्ताश्च।

तमेवानुभविष्यामि॥

४२अ) इत्यादौ योनुभवस्स एव त्रिकालव्यापीनापि च तस्य भेदः वानुभवस्य। वा [घटादेः] नुभावकस्य चेति परंत्वन्धत समादौ महोपाधिवशाद् भेद एवेति भावः॥ ८१॥ ननु च घटपटनीलानिलादौ परस्परविशेषा विशेषस्तूपपद्यतां। प्रत्यक्षतयास्भटन्वात्॥ यत्र चान्तरेण। मुखोपलब्धिस्तदवभासस्य। वैचित्र्यं कथमित्याह॥

ॐ मुखादिषु च सौख्यादि हेतुष्वपि च वस्तुषु। अवभासस्य सद्भावेप्यती तत्वात्तथा स्थितिः॥ ८२॥ येषु स्त्रक्कुन्दनहारादिषु सौख्यादि हेतुषु वस्तुषु। अहं मुखी। अहं विश्रामामि॥ इत्यादिना मुखादि हेतु ष्वयभासस्य सद्भावेपि। तथा पूर्ववत् तत्र न स्थितिः। आन्तरत्वात्। कदापि तथादि शब्दादहितृण कष्टकादौ दुःखादि प्रवृत्तौ च सत्यां। अहं दुःखीति॥ तथापि न पूर्ववत्॥ कदाकदाचिदनुभूतत्वात्॥ वाननुभूतत्वात्॥ घटादयस्तु भावास्सर्वत्र सर्वदा प्रसिद्धा इति सर्वास्ववस्थासु वा सर्वत्र कालेषु च भातभासमान स्वभावाः सिद्धा इति॥ मुखादौ तदनुपयोगान्नतादृगनुभवभङ्गिः॥ ८२॥ अथ चोल्लेखेन यत्र मुखादयोनुभूयन्ते। तत्र च तथैवस्थितिरित्याह॥

ॐ गाढमुल्लिख्यमाने तु विकल्पेन मुखादिके। तथा स्थितिस्तथैव स्यात् स्फुटमस्योपलक्षणात्॥ ८३॥ एवं हि विकल्पोल्लेखनेनाभिज्ञाते मुखादौ स्फुटत्वेनोपलक्षणात् तथा स्थितिरपि तथैवः पूर्ववदिति संबन्धः न किमपीतिभावः॥ ८३॥

४२ब्) एवं निश्चिते सर्वत्र सर्वदान्तरेवस्थितौ विश्वस्य सिद्धायां बाह्याथवान्नापि बाह्यंनापि किमपि घटादिवृतिरिक्ततया भातीत्याह। निगमनेन॥

ॐ भावाभावावभासानां बाह्यतोपाधिरिष्यते। नात्मासत्ता ततस्तेषा मान्तराणां सतां सदा॥ ८४॥ अयं चात्रभावः॥ सर्वेषा चिदचिन्मयानां नीलानिलादीनां विश्व वैचित्र्य चित्रितानामन्तरेवस्थितिर्बहिरपि प्रकाशते॥ न चान्तरं विनाबहिर्भावो हि कल्पते॥ कारणाभावे हि कार्यानुदयात्॥ सतिकारणे कार्यसंयोगात्॥ इत्यनया व्याप्त्या हेतु हेतु मतोश्चाभेद विवक्षया सिद्धं चैतत्॥ अन्तरे सति बाह्यत्वं नाम प्रसिद्धमिति भावः॥ तत एव च तेषां बाह्यत्वेन या सत्ता। घटोयमित्यादिना। सा चा सत्तैवेत्याहुः। अध्यासमात्रेण च सा सिद्धिः। वा गगनभ्रान्तचित्र नगरादिवश्चेति बाह्यनाम न किमपि

स्वरूप तया प्रतिभाति॥ एतश्च पूर्वं बहु श एवम्प्रतिपादितमेव

॥ अत एवोक्तं। ततस्तेषामान्तराणां सतां सदेति। तत एव चोक्तं

॥ भावानां। घटादीनां। घटोयमित्यादिना॥ अभावानां च

। न पटोयमित्यादीनां च ये वभासाः अवभासनं॥

प्रत्यक्षतया। अयं। स इत्यादिना प्रतीतिः तेषां च

भावाभासानां। अभावाभासानां च बाह्यता। या

अयमिदमित्यादिना। सा चोपाधिरिति कथ्यताम्॥ न च तत्वरूपता

तेषामिति वक्ष्यते च वोक्तं च॥ तत्सिद्धेयं दशा॥

अन्तरस्थितानां भावानां बाह्यतापि प्रसिद्धा बीजाङ्कुरवत्

सिद्धा। वाम यूराता?रसवश्च सुवर्णतार तस्यादिना च॥

४३अ) असदकरणादुपादान भ? न हणात् सर्वसम्भवा भावात्।

शक्तस्य शक्यकरणात् कारणभावाश्च सत्कार्यमिति साङ्ख्या

विवेकवन्तः॥ ८४॥ अत एव च।

ॐ अन्तरत्वात् प्रमात्रैक्येनैषां भेदनिबन्धना। अर्थक्रियापि

बाह्यत्वे सा भिन्नाभासभेदतः॥ ८५॥ आन्तरत्वेन च

प्रमात्रैक्येन चैतेषामर्थ क्रियाभेदनिबन्धना। सति बाह्यत्वे च

सा भेदनिबन्धनार्थ क्रियाभिन्नाव भास हेतुतया न तु स्वत इति

सम्बन्धः॥ ८५॥ अत एव च॥

ॐ विकल्पयोयमुल्लेखः सोपि बाह्यः पृथक् प्रथः।
प्रमात्रैकात्स्यमान्तर्यं ततो भेदो हि बाह्यता॥ ८६॥ अन्तर्यं तु
प्रमात्रैकात्म्यमिति हि सिद्धम्। ततोपि भेदस्तु बाह्यतेति कथ्यते॥
यतस्तु यो यमुल्लेखो विकल्पविषये। एतत्। इदं। अयमित्यादिना। सोपि
चान्तरत्वेसति बाह्यः। पृथक्तथेति कथ्यते इति सर्वमेवावधातम्॥
८६॥ तस्मात् तदुल्लेखादि सर्वेश्वर महिम्नैवतदिच्छयैवेत्याहुः॥

ॐ उल्लेखस्य मुखादेश्च प्रकाशो बहिरात्मना।
इच्छातोभर्तुरध्यक्ष रूपोक्षादि भुवां यथा॥ ८७॥ एवं हि
सत्यान्तरत्वे या बाह्यतया स्थितिर्वा प्रकाशादिना। वोल्लेखादिना
च। मुखदुःखादेः। मुख्यहं। दुःख्यहं वेत्यादिना च। सा
च भर्तरात्मनच्छात एव। पश्यश्छ्यणुन्स्पृशन्जिघ्रन्नित्यादि
नाना वृत्या। यथा क्षादि भुवां मध्यक्षरूपः। दृष्टो मया
। श्रुतो वा। घ्रातो वा। आस्वादितो वा। स्पृष्टो वेत्यादिना च एवं
यत्क्रियते स्वच्छयात्मा महेश्वरस्तत् क्रियत एव॥ ८७॥
तस्मादेवमेव पूर्वोक्तं निगमयति॥

ॐ तदैक्येन विनास्ति

४३ब) संविदां लोकपद्धतिः। प्रकाशैक्यात्तदेकत्वंमातैकः स इति स्फुटम्॥ ८८॥ तत् तस्माधतोः। अनुभवस्मरणादौ यद्बोधैक्यं। य एवानुभवः। तदेव हि स्मरणां। यश्चस्मरणं। तदेव च पुरस्तात्॥ इत्यनेन यो बोधोबोधाबोध गृहीता प्रमातेति स एक कथ्यते॥ स च सर्वत्रानुस्युत एव॥ तथा च जाग्रदादि विभेदेपि तदभिन्ने प्रसर्पति। निवर्तते निजान्नैव स्वरूपादुपलब्ध्यतः॥ इत्यादि स्पन्दे। तस्मात्प्रकाशैक्यात्। सर्वत्रैकत्वमेव सिद्धम्। दर्पणं नगरवत्॥ यतश्च तेन विनासे विदां ज्ञानानां लोकपद्धति व्यवहारः लोकपद्धति व्यापारोपगमोपि च नास्ये वेति निश्चयः॥ इत्येवं पूर्वोक्तं बोधलक्षणोक्यं पश्चात् सूचितं सावधानतयेति सिद्धम्॥ ८८॥ तस्मादेवमेव सिद्धम्॥

ॐ स एव विमृश्यत्वेन नियतेन महेश्वरः। विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यतः॥ ८९॥ स एव हि बोधोविमर्शशक्तिभाक् नियतं। महेश्वर इति कथ्यते महान्नैश्वर्यमय इति कथ्यते॥ यतश्च स्वभावमवभासस्य विमर्शं विद्वरत्यथा। प्रकाशोर्थो परक्तोपि स्फुटिकादिजडोपमः॥ एतदेव च तस्य विमर्शोनं नाम॥ एकोहं। बहुस्यामिति। स ऐक्षत बहुस्यां प्रजायेयेति॥ एवमहंभावनया विमर्शः॥ ततश्चाहं करोमि।

अहं गच्छामि॥ अहं जानामीति यो विमर्शस्तच्छक्तिमान्नसौ जयति। ये नैव च विमर्शेन सृष्टि स्थिति प्रलयपिधानानुग्रहान्कर्त्तमकर्त्तमन्यथा कर्त्तं शक्त इति। तेन च स एव हि विमर्शोनाम तस्येवं तु तस्य परमेश्वरस्य शुद्धे स्वस्वभाववन्निर्मले ज्ञानक्रिय एव वयतोहेतोः॥ ज्ञानं च क्रिया च। त एव हि ज्ञानक्रिये। यतोपि विमर्शेन जानामीदं। करोमि चेदमिति च॥ जानात्येव॥ करोत्येव च॥ इत्येवं शुद्धस्वरूप एव प्रभो ज्ञानक्रिये शक्ती स्वात्मनो बहुधा सम्पादनार्थं स्वोपकरणे मते॥

४४अ) इति तदनेन सर्वोयं भावनाशिः॥ ज्ञातमिदं मया। घटोयमिति॥ ततश्च जलापहारणो क्रियामयं करोतीति जानाति च करोति च तत् तत् क्रियामात्रमपि॥ इत्येवं तस्यात्मनस्स्वस्वभाव सिद्धे ज्ञानक्रियाख्ये॥ त एव च स्वात्मन एव स्वतः सिद्धे। प्रत्यक्षतया। घटोयमिति ज्ञात्वा करोमीति च जानाति। वा करोमि च ॥ इत्येवं सर्वमिदं विश्वं ज्ञानक्रियामयमेवेति भावः॥ एवं चादौ कर्तरि ज्ञातरि स्वात्मन्यादि सिद्धे महेश्वरे॥ इत्यादिना। पश्चाश्च विमर्श एव देवस्य शुद्धे ज्ञानक्रिये यत इत्यन्तेन च ज्ञानक्रिया सम्पुटितत्वेन शास्त्रमिदं गुम्फितमितिभावः॥ अनेनैव च तात्पर्येणादावपि परमेश्वरे

सिद्धे। कर्तरिज्ञातरिस्वात्मनीत्यादिना॥ पश्चाश्च प्रमात्रैक्यात् तदेकत्वं मातैकसतति स्फुटमित्यन्तेन च तस्मिन्नेव च सिद्धे शिवशक्ति तत्व द्वयमेकत्र सिद्धमिति भावः॥ शक्तिश्च शक्तिमांश्चैव पदार्थ द्वयमुच्यते। शक्तयोस्य जगत्कृत्स्नं शक्तिमांस्तु महेश्वर इत्यनेन शिवशक्ति द्वयमेवसिद्धमितिभावः॥ तदा वरणकमेववेदं सर्वमिति च तात्पर्यार्थः॥ अयमत्रभावः॥ स्वपदास्वशिरच्छायां यद्वल्लङ्घित्तमीत्यते। पादोत् देशेशिरो न स्यात् तथेयं बैन्दवी कला॥ इत्येवं स्वरहस्योद्घाटनं स्वरहस्येन विचार्य। रहस्यं रहस्योद्घाटनं च मनसैवभाव्यमिति भावः॥ शुभमस्तु सर्वजगतां॥ ८९॥ आदितः॥

४४ब्) इति श्रीमद्भट्टारकानन्दनाथ रचितायां प्रत्यज्ञाकौमुद्यां दशममाह्निकं समाप्तिमगमत्॥

इत्येवं ज्ञानाधिकारः सम्पूर्णीकृतोयं विवृतिकौमुद्यां भट्टारकेणतरुवरचरणरजः

प्रभाकरध्वस्ततमोमोहान्ध्यविलसश्चिदानन्द लहरीभरेण।

शुभायास्तुतमाम्॥

ॐ इत्थं ज्ञानाधिकारस्य यथा बुध्यनुसारतः।

भट्टारकानन्दनाथैर्कृता विवृत्तिरुत्तमा॥ १॥

बालबोधनशीलाख्यामधुरा सरलाकृतिः।

तत् तद् गुप्तार्थतिरमाग्राङ्कुशाकर्षणशालिनी॥ २॥

इत्थमसंस्कृत दुर्वचनान्ध्योन्दूलनैक चतुराशुभसारा

संस्कृताढ्यवचनैवृतभाराज्ञानवज्जनमनः। कृपारा॥ ३॥

श्रीप्रबुद्धपरमामृतधाराह्य प्रबुद्धसरसीकृत क्षारा।

सज्जनैस्तु स्ववचः कृतहारास्वप्रबुद्धकृतमोहनमारा॥ ४॥

शक्तिपातचिदम्भोधिरसास्वादमनीषया।

श्रीमद्भट्टारकेनापि कृतोयं विवृति श्रमः॥ ५॥

एवं ज्ञानाधिकारोसौ ज्ञानशक्ति स्फुरद्वपुः। श्रीविद्यायाः

कटाक्षेण भूवाद्विघ्नौघशान्तये संवत्सरे गुणमुन्यङ्किते

तथा नभस्य कृष्णोपि चतुर्दशीति॥ थौ। मध्याह्नदिष्टेपि तथामघोदये ज्ञानाधिकारोयमगात् समाप्तिम्॥ एवं पूर्वावमारेण ज्ञानशक्तिः। परीक्षिता। अथा परनुमात्रेण क्रियाशक्तिः परीक्ष्यते शुभमस्तु सर्वजगतां परहितनिरताभवन्तु भूतगणाः॥ दोषाः प्रयान्तशान्तिं सर्वत्रसुखीभवन्तु लोकाः॥ शुभमस्तुसाधकानां॥

४५अ) ॐ नमः श्रीविद्यापादुकाभ्यः॥ श्रीगुरुवरचरणेभ्यो नमः॥

ॐ नमस्कृत्य परां विद्यां श्रीसम्भुं शङ्करं परं।
गुरुनाथं गणपतिं नुत्वा सर्वार्थ सिद्धिदम्॥ १॥

ज्ञानाधि कारमालोड्य विविश्य च पुनः पुनः।
सम्पूर्णीकृत्य च ततः पूर्वशास्त्रविदागमैः॥

तस्माद‍ङ्गाङ्गि भावेन साहचार्याढतोन्यथा।
क्रियाधिकारं प्रकटीक्रमो गुर्वाज्ञयावयं॥ ३॥

ज्ञाने सिद्धे तत्पुरस्तात् क्रियाप्यावश्यकीमता॥

जाते ज्ञान क्रिया तत्र सिद्धैवनियतिक्रमात्॥ ४॥

प्रोक्तोदानीं क्रियानामक्रियाज्ञानार्थ रूपिणी।

तदिदानीं प्रवक्ष्यामः क्रियाधिकारसन्ततिम्॥ ५॥

ॐ अत एव यदप्युक्तं क्रियानैकस्य स क्रमा।

एकेत्यादि प्रतिक्षिप्तं तदेकस्य समर्थनात्॥ ६॥

यश्चैवमन्यमतादिभिः पूर्वोक्तं। एकस्य च परमेश्वरस्य सक्रमयाक्रियया कथं सम्बन्ध इत्यादिना पूर्वं। तच्च प्रत्युक्तमेव॥ दूरीकृतमिति भावः॥ पश्चादन्योन्यप्रश्नोत्तरतया चैकस्यैव बोधस्वरूप स्वात्मपरमेश्वरस्य समर्थनात्। इत्युक्तमेव॥ वक्ष्यते च॥ इत्थमनेनैकस्यानेकेन सम्बन्धः कथमिति यत्तन्न। अयुक्तेरिति सिद्धम्॥ नन्वेक एव महेश्वर इत्येत्थं सिद्धे। क्रियायाश्चानेक कालाकारविधानभङ्ग्या स्वरूप निष्पत्तेः कथमेकस्यसिद्धस्यानेकया सम्बन्ध इति तथापि स एव विरोधः पुनरप्यापतेत॥ इत्थं किमपि नायातम्॥ अत्रोच्यते॥ सद्येकस्मिन्नेव महेश्वरे सिद्धे। नापिकश्चिद्विरोधो नाम मूलस्थिता चैकत्वेन॥

४५ब) नानानेकत्वविरोधाभावात्॥ यथावृक्षादयः। तत्र मूले सिद्धे वृक्षाढौ शाखादीनामनेकत्व विधानं सिद्धमेव॥

[अथ श्रीमालिनी विजयोत्तरे॥ या सा शक्तिर्जगद्धातुः कथिता समवायिनी। इच्छात्वं तस्य सा देवि * *? प्रतिपाद्यते। १॥

सैकापि सत्यनेकत्वं यथा गच्छति तच्छणु। एवमेतदिति ज्ञेयं नान्यथेति सुनिश्चितं। ज्ञानी? जगन्त्यत्र ज्ञानशक्तित्रि? गद्यते?। एवं भवद्विदं सर्वमिति कार्यो दुखी?यदा जाता तदैव तत्तद्वत् कुर्वन्त्यत्र किम्? मत्। एवं यथाद्विरूपैव पुनर्भेदैरनेकधा मतोजाधिवशाद्याति चिन्तामणिरिवेश्वरी। तत्र तावत् समायन्नामतृभावं विभिद्यते। द्विधा च नवधा भेदैः पंचाशत्वासमालिनी॥ इत्यादिना प्रकाशितयोमर्थः श्रीमन्मालिनी विजयोत्तरे॥] जातश्च पूर्वं सिद्धान्ती कृतमेव॥ यथा वैयाकरणादौ॥ यथा चा लङ्कारशास्त्रादौरसभेदाः॥ अकारादीनां चाष्टादशभेदानि॥ इत्यादिनाचैकस्य बहवोभेदा यथा पूर्वं प्रतिपादिताः। तथा ब्रह्मणोपीत्यादिना प्रोक्तमेव पूर्वं तथैकस्यैव महेश्वरस्यानन्त क्रियाभेदमात्रेणापि योजनान्नदोष इत्यर्थः एतश्च पूर्वं संस्कर्ता इत्यादिना प्रतिपादितमेव पश्चान्निश्चयेनैकस्यैव बोधाबोध स्वभावस्य समर्थनान् तदेक एवासौ नानाशक्ति चक्रं भजन्ने एवाहमित्यत

इदन्तास्पदारोह समर्थनात्॥ इत्यनेन चाक्रमोसौ क्रमप्राप्तं शक्तिद्वयं ज्ञानक्रियाख्यं भजत इति भावः॥ १॥ ननु चाक्रम स्वभावे परमेश्वरे भगवति कथं स क्रमत्वविरुद्ध संयोग इति॥ परस्परा व्याप्ति हेतु प्रसङ्गात्॥ अग्निनासिञ्चेदितिवत्॥ तद्यदुक्तं॥ अक्रमस्य स क्रमत्व संयोगादिद्यादिना॥ इत्याह॥

ॐ स क्रमत्वं च लौकिक्याः क्रियायाः कालशक्तितः॥ घट तेन तु शाश्वत्यः प्राभव्यः स्यात् प्रभोरिव॥ २॥

तत्र यदा प्रभुः स्पन्दनमात्रेणोन्मेषदमया विश्वमुत्पादयित्तुमुत्सहते। तदादावेव ज्ञानक्रियात्मकं शक्ति यगलं परस्परैक स्वभावमपि भिन्नाकारतया भासयति। तदास्य प्रभोर्माया संपर्काद विद्याख्ययानियत्या च यज्ज्ञानक्रियात्मकं शक्तियुगलं तन्नियति पूर्वकतया स्थूलमित्युच्यते॥ तस्यैव च स क्रमत्वमिति कथ्यते। अत एव चोक्तं॥ सक्रमत्वं नाम लौकिक्या नियति शक्त्या वृतायाः क्रियायाः कालशक्तिसंयोगेन घटते॥ आसीत्॥ स्यात्। वर्तते वा। इत्यादिकालाकारेण॥ न च तच्छाश्वद्यानित्यायाः प्राभव्याः। प्रभोरियं प्राभवी॥ तस्याः॥ सूक्ष्मायाः। अहन्नामय्य इति। प्रभोरिव यथा न देशकालाकारादि स क्रमस्तथा॥ ३॥

४६अ) इदानीं क्रिया या अङ्गाङ्गिभावेन कालादीन्निरूपयति

क्रियाधिकारप्रस्तावात्॥

ॐ कालः सूर्यादि साञ्चारस्तत् तत् पुष्पादिजन्म वा।

शीतोष्ण वाथ तल्लक्ष्यः क्रम एव स तत्वतः॥ ३॥

तत्र ये नियति शक्तिपरिनिष्ठिताः सूर्याचन्द्र। सहकारमल्लिका

कुटजादि। शीतोष्णादि परभ्यतमदविलासादिय इत्यादिना यः

कालः परिसमाप्यते। दिने सूर्यः। रात्रो च चन्द्रमा।

पद्मात्याषाढश्रावणादौ॥ मल्लिकादीनि श्रावणे। कुटजानि

ज्येष्ठे। परभ्यतमदविलासानि। वसन्तादौ॥ शैत्यं चोदगयने।

औष्ण्यं च दक्षिणायने च॥ इत्येवं यः क्रमस्स काल इति कथ्यते॥

सैव च क्रिया शक्तिरिति चोच्यते॥ ३॥

इदानीं कालादीनां क्रमोनिरूप्यते॥

ॐ क्रमोभेदाश्रयोभे चोप्याभाससदसत्वतः।

आभाससदसत्वे तु चित्ताभासकृतः प्रभोः॥ ४॥

घटः। पटः। नीलं। पीतं च। इत्यादिना च यो भेदोभेदाश्रयः
। स क्रम इति कथ्यते॥ स भेदश्चाभास सदसत्वतः॥ इह भूतले
घटोस्ति। इह च नास्तीति। एवं यदा भाससदसत्वं। स एव हि
भेदोनाम॥ आभाससदसत्वे च प्रभोन्महेश्वरस्येच्छामात्र
कृत एव॥ नान्यथेति सिद्धम्॥ ४॥

तश्चित्राभासत्वमेव दर्शयति॥

ॐ मूर्तिवैचित्र्यतो देशक्रसमाभासयत्यसौ।
क्रियावैचित्र्यनिर्भासात् कालक्रममपीश्वरः॥ ५॥

पदार्थस्य स्वरूपं मूर्तिः। तद्वैचित्र्येण यः देश क्रमः। एतत्
गृहं। एतत् प्राङ्गनं। इयं च विपणिः। एतदुत्यानं।
एतश्चारण्यां इत्यादिनादेशक्रममाभासयति॥ तथा क्रिया
वैचित्र्येण च कालक्रममाभासयति। तत् तन्मूर्तौ वा देशे च यः
क्रमः सा क्रियेत्युच्यते॥ तत्वे चित्र्येण च कालक्रममप्याभासयति
॥ कृत्ऽम् मया करोम्यहं।

४६ब्) करिष्यामि चाहमित्यादिना च

कालक्रममपिश्वेनाभासयत्यसौ॥ इत्येवं

क्रियाशक्तिनिरूपणमेव॥ ५॥

एवं सर्वत्रयः क्रमाभासन क्रियात्मकः स च काल वशग एवेति

दर्शयन्नाह॥

ॐ सर्वत्राभासभेदोपि भवेत् कालक्रमाकरः विच्छिन्नभासः

शून्यादेर्मातुर्भातस्यनो सकृत्॥ यश्च सर्वत्रभासभेदस्स च

पूर्वोक्तः कालक्रमवशग इत्यर्थः॥ परंतु

शून्यादेर्विच्छिन्नभासः॥ देहे बुद्धौ। अथ प्राणे। कल्पितेनभसि

च प्रमातृत्वेनाहमिति विमर्शोन्य विपोरुनात्। विकल्प एवेत्यादिना

पूर्वमेव यच्छून्या भासादि। तस्यैव चा भासभेदः॥

नान्यस्य च प्रमातुर्भातस्य सकृत्॥ अविच्छिन्नबोधात्मकस्य

स्वात्मन इत्यर्थः॥ तस्य च तत् स्पर्शाभावादम्भोजदलवदप्सु॥ ६

॥ तस्मादेवमेवाह॥

ॐ देश क्रमोपि भावेषु भान्ति मातुर्मितात्मनः।

स्वात्मैव स्वात्मना पूर्णाभावाभान्त्यसि तस्य तु॥ ७॥

मितात्मनस्तस्यैव शून्यादेः प्रामातुर्देशक्रमादिभासते॥

स्वात्मना पूर्णाहन्ता चमत्कारमयाः पूर्णाश्च
भावाभान्त्यमितस्य। अपरिमित स्वस्वभावस्य। प्रमशिवस्य
स्वात्मन इति भावः॥ ७॥

एतत् क्रमेण च यत्प्रतिज्ञातं। तद्दृढयतुं निगमयति॥

ॐ किन्तु निर्माणशक्तिः साध्येवं विदुष ईशितुः
परमेश्वरेच्छयैव तथा विज्ञान विज्ञेय भेदो यदवभासते॥ ८
॥

यदेवं करोतीत्यादि कृत्यं किंचित् तत् सर्वं परमेश्वरेच्छयैव।
तथा च विज्ञान विज्ञेयादि च यत्तदपि तदिच्छैव तं
विनातृणमपि कुष्णी कर्तुमसमर्थः कश्चित् परं तु तदिच्छवैव॥
यद्भवति॥ तद्भवत्येव। यन्नतन्नेति भावः॥ ८॥

इति श्रीमद्भट्टारकानन्दनाथकृतायां
प्रत्यभिज्ञाकौमुद्यां क्रियाधिकारे प्रथममाह्निकम्॥

४७अ) इदानीनीं क्रियावदन्येपि सम्बन्धादय एकानेक विषया अपि सत्या एव। दृष्टविषयोपयोग्याद्दढाः स्थिरा इत्यर्थः॥ सर्वदोपयोगिनामेषामर्थ वत्वेनापरिहरणीयत्वात्॥ तदेतेपि सत्या अन्यचेद्विचन्द्रादयं सत्या इत्यर्थः॥ इत्येवं सूचयन्नाह च॥

ॐ क्रिया सामान्य सम्बन्ध द्रव्यदिक्काल बुद्धयः।
सत्याःस्थैर्योपयोगाभ्यामेकारोकाश्रयामताः॥ ९॥

एते सर्वेसामान्यादयः कार्योपयोगिनोमताः॥ अतश्च सत्याश्चते॥ परं तु। एकानेकाश्रया मता इति भावः॥ तथा हि॥ चैत्रो व्रजति। तण्डुला विक्लिद्यन्ते एधाज्वलन्ति। इत्यत्रैकानेक रूपश्चैत्रादिभावः॥ तत्र तत् तद्देशकालाकारभिन्नोशौ चित्रादि रूपश्चैत्रोनेक स्वभावोपि। अयं चैत्र इत्येक रूपतामपरित्यजन् भासते। स एवानेक रूपोर्थः क्रियेति॥ तथैव च प्रतिभासात् परमार्थिकी॥ सत्या तत्रैकाश्रवश्चैत्रः॥ अनेकाश्रयाणि च तण्डुलादीनि॥ वा द्विचन्द्रादितानि च स्थैर्योपयोगाभ्यामेकानेकाश्रयाणिमतानि॥ इत्यनेनापि क्रियापचनादि साध्यत एव॥ इति क्रियोपयोगार्थमेतद्युक्त मुक्तमित्यर्थः॥ ९॥

इत्थं क्रियानन्तरं सामान्यं कथयति॥

ॐ तत्रैकमान्तरं तत्वं तदेवेन्द्रियवेद्यताम्
संप्राप्यानेकतां याति देशकालस्वभावतः॥ १०॥

एकमेवान्तरं तत्वं नामजडुबोधरूपं। तत् तदिन्द्रियवेद्यता। घटोयमित्यादि वृत्यासंप्राप्य। अनेकतां भजत एव॥ तत् तदनु वृत्त एव भवति॥ देशकालादि स्वभावानुवृत्तेः॥ १०॥

४७ब) इत्येवं बाह्याभ्यन्तरस्थूल सूक्ष्मनिर्विकल्प स विकल्पादिकर्मादिकल्पनामन एव करोतीति वदति क्रमप्राप्तेश्च॥

ॐ तद्व्यालम्बना एतामनोनुव्यवसायिसत्।
करोतिमातृव्यापारमयीः कर्मादिकल्पनाः॥ ११॥

एवं सतिमन अन्तःकरणरूपो बाह्यान्तश्चरणशीलः प्रमातृव्यापारमयीः कर्मादिकल्पनाः करोति॥ सर्वत्र क्रियादावनुव्यवसायिसत् बाह्याव्यन्तरका *? चयति॥ इत्यादिनिवृत्तं सकृ?मिति॥ ११॥

इदानीं सम्बन्धमपि व्यनक्ति क्रमप्राप्तं।

ॐ स्वात्मनिष्ठाविविक्ताभाभावा एक प्रमातरि॥

अन्योन्यान्वय रूपैक्य युजः सम्बन्धधीपदम्॥ १२॥

सामान्यं प्रदश्र्य सम्बन्धं दर्शयन्नाह॥ घटादयो हि भावाविश्ववैचित्र्यचित्रिताः स्वात्मांशनिष्ठा एव॥ घटो हि घट एव॥ नीलमिदमिति नीलमेव॥ पीतमिदं इति च पीतमेव॥ रक्तमिदमिति च रक्तमेव। न च पीतं नीलं। वा रक्तं॥ वा न सितं। नीलं वा रक्तमित्यादिना घटादयोभावास्स्वात्मनिष्ठाः स्वात्माशनिष्ठा एव। पूर्वोक्तत्वात्॥ तथा विविक्ताभाः। घटोयं पटोयमित्यादिना स्फुटावभासमानाः। तेपि चैकप्रमातरि स्वात्मनि बोधात्मकेन्योन्यान्वय रूपस्य वदैक्यं तद्भाजोभजनशीलाः बोधस्तु जानाति च करोति चेत्यादि युक्त्या यदेवेतज्जानाति। वा करोति चैक परमार्थ रूपस्सन्। तत्रयोयं ज्ञानज्ञेयसम्बन्धस्स एवान्योन्यान्वयः॥

४८अ) ज्ञानस्य हि  ज्ञेये नैक्यपोपत्तेः॥ ज्ञेयस्य वा ज्ञानेनेति॥ तथा हि॥ ज्ञातोयं मया घट इति॥ इत्येवमेक प्रमातरि ज्ञानविषयेहमिति स्वरूपे या विश्रान्तिस्सैव च सम्बन्धः

परस्परमिति कथ्यते न चान्यत्॥ अथ च दे॥ व॥ द॥ *?॥ *?॥ गां॥ आ॥ न॥ य॥ इत्यनेन प्रहरे॥ प्रहरे॥ असहोश्चारिता निगामानयेद्यादीनि पदानि न वाक्यम्॥ सान्निध्याभावात्॥ इत्यनेन सान्निध्याभावे योग्यता भावात् तदभावे लोकव्यवहारानुत्पत्तेस्ततश्च सर्वं जगदन्धतमसप्रख्यमिति न किंचिदवशिष्यते॥ तत एव च॥ देवदत्तगामानय॥ इत्यनेन। भो देवदत्त। त्वं। गामानय॥ इति सान्निध्येन च योगितया। योग्यतोत् पत्तेस्सम्भवाश्च सर्वत्रेति सिद्धोयं लोकव्यवहार हेतुः सम्बन्ध इति॥ १२॥

इदानीं क्रमप्राप्तं सामान्यं दर्शयति॥

ॐ जातिद्रव्यावभासानां बहिरप्येकरूपतां
व्यक्त्यैकदेशभेदं चाप्यालम्बन्ते विकल्पनाः॥ १३॥

यथा गो व्यावृत्तित्वं गोत्वं॥ इत्थगोत्व सामान्ये सिद्धे। तत्र च गोत्वमिदं॥ इत्यनेनाबाल्यवृद्धान्तं सर्वं गोत्वमिति कथ्यते॥ अथ चानेन शुक्लादि कृष्णान्तं सर्ववर्णमयं गोत्वमिति च कथ्यते॥ इत्यनेनैक रूपत्वं॥ अथ च व्यक्तिद्वारा शूक्लागौः। वृद्धागौः॥ कृष्णागौः॥ इत्यनेन व्यक्तिभेदेनापि

स्वात्मांशपरिनिष्ठितेरेक भेदं च विकल्पना आलम्ब इत्येवं क्रियाशक्ति प्रसरश्चैतदङ्गाङ्गि भावेन॥ १३॥ न्ते॥

****४८ब) इदानीं क्रियादिगादि च दर्शयति तदुपयोगसिद्धये।

ॐ क्रियाविमर्शविषयः कारण्यानां समन्वयः॥

अवध्यवधिसद्भावान्वया लम्बादिगादिधीः॥ १४॥

तत्र विमर्शविषयः क्रियेत्युच्यते। करोम्यहं हतं वा मयेति विमर्शः क्रियेति॥ अथवा कारकानां तण्डुलादीनां समन्वयः । पचनक्रियेत्युच्यते॥ अथ च इयत्परिमितं स्तं?ननमाश्रिद्य घटोयं तिष्ठतीति। इत्यनेनयः सम्बन्धस्म एवा लम्बनं यस्यास्मा च दिगादिधीः। इयत्परिमिता हि पूर्वादिक् इतादिना॥ इत्यनेन विमर्शविष्यः। कारकानां समन्वयः क्रियेत्ति। पचन क्रियावत्तण्डुलादिना॥ अथवा वध्यवध्यसद्भावान्वयादिगादीधीश्चतिभावः॥ १४॥ एवमेकानेक रूपैरेव क्रियादिभिः प्रमातुर्यः क्रियासंवादो व्यवहार तवा। सचन भ्रम इति ब्रान्तिं भिन्दन्नाह॥

ॐ एवमेवार्थ सिद्धिः स्यान्मातुरर्थ क्रियार्थिनः।

भेदाभेदवतार्थेन तेन न भ्रान्तिरिदृशी॥ १५॥

एवमेवार्थ क्रियार्थिनः प्रमातुरेव। घठ महंजानामीति।

ज्ञातासन्। तत् सिद्धिरस्ये वेति हि *? टोयमर्तह्ः॥ सर्वत्रानु स्यूत

एवासौ स्वस्वभावात्मा बोधाबोधसरूपः। अहं जानामीति।

पश्यामि। श्रृणोमि। इत्यादि विन्दन्नपि ज्ञाता। कर्तेत्युच्यत एव॥

तसमदर्थ क्रियार्थिनः प्रयोजनसिद्धिस्तात्कालिकी।

भेदाभेदमयेनार्थेन। घटादभिन्नेन। अन्येभ्यश्च?भिन्नेन

घटादिना। तस्मादेवं न भ्रान्तिरिति भावः॥ १५॥

इति श्री मद्भट्टारकानन्दनाथरचितायां प्रत्यभिज्ञा

कौमुद्यां क्रियाधिकारद्वितीयमाह्निकम्॥

तस्मत्क्रियासम्बन्धादि बुद्धयो न भ्रान्ति स्वभावा इति सिद्धम्॥

४९अ) एवं क्रिया सामान्यसम्बन्धादिनाया प्रमितिः सा च न

भ्रान्तिरिति साप्रमैव दृढयति॥ द्वाभ्यां॥

ॐ इदमेतादृगित्येवं यद्वशाद्व्यवतिष्ठते। वस्तु प्रमाणं तत्

सोपि स्वाभासोभिरवोदयः॥ सोनतस्तथा विमर्शात्मा

देशकालाद्य भेदिनि। एकाभिदानविषये मितिरस्तुन्यबाधिता॥ १७॥

इदं घटादि स्यात्। एतादृ *?रिमितं। इतेतद्य स्वपादस्ति भाति च।
तद्वस्तु आप्तमाणं तत् अयमिदमेतादगिति प्रत्यक्षेण दर्शनात्॥
इत्यनेन च सोम्या भासोभिनवोद्य इति। चेदसं उत्थितस्तरङ्ग इव
चिद्घनः स एवचान्तर्विमर्शात्मा विमर्शस्वभावः।
स्वभावमवभासस्य विमर्शं विद्धरन्यथेति पूर्वमुक्तत्वात्।
तत्तत्र चैकाभिधाने घटोयमित्यादौ साप्रकाशात्मामितिः
प्रमितिः। घटादौ वस्तुन्या वाधित विषयेति सर्वसरवस्यम्॥ तथा
च॥ स्पन्दे॥ जाग्रदादि विभेदेपि तदभिन्ने प्रसरयतिति वर्तते
निजान्नैव स्वभावादुपलब्ध्यत इत्यादिनोपलब्धात्मा
सर्वत्रानुस्युत एवेत्यर्थः॥ १८॥

एवं तत्र प्रमासायथाबाह्यावेदककरणादि नानाद्वेन
नानाद्वमेव च सा भजत एव॥ न च तस्य वेदकस्य तत्त्वतो भेद
इत्याह द्वाभ्यां॥

ॐ यथा न चि यथार्थिन्यं यथा व्युत्पत्ति भिद्यते। आभासोप्यर्थ
एकस्मिन्ननुसन्धानसाधिते॥

ॐ दीन्*?व्यत्तोव्य? पुरुषधूम चन्द्रलतादिभिः। यथा
वभासाभिद्यन्ते देशकालविभेदिनः॥ १९॥

यत्र रुचिस्तत्र च विधिरित्यनेन यथारुचि। वायथार्थित्वं। वायथा
व्युत्पत्ति नानात्वेन चाभासा एकत्वेनाप्यनेकस्थित्या भासन्ते॥
तदनेकत्वमेव हि दर्शयति॥ यथा सायं
सन्ध्यारिगीलाभ्रमण्डल

४९ब्) प्रकाशित रक्तनीलपीतादि नानावैचित्र्येण।
हस्तिरथश्वसदातिगौ रथवाहा स्ववाहखङ्ग चर्मधरादि
नाना वैचित्र्येण चाभासभेदाभान्ति कारणाक्षि सान्धादि
राहित्ये नैव च॥ तथा च भोजनेका सर्वत्र प्रसिद्धैका च। तत्र
यथा रुचि यथार्थित्वं। यथा व्युत्पत्या च। रुचिराभासभेद
एकस्मिन्नेव च भोजनार्थे। भिद्यते नाना त्वेन। तद्यथा।
कश्चिद्भूञ्जति। अन्न कश्चि खेचर्यादि कश्चिदपूपादिकं।
कश्चिद्मांसादि?। कश्चिच्चशाकादि॥ कश्चित्केनापि प्रकारेण।
कश्चित्केनापि प्रकारेणापरथा
इत्येवमेकस्मिन्नर्थेनुसन्धानसाधिते। आभासभेदाभिद्यन्त एव।
अथ च। पूर्वोक्ता भ्रमण्डलदत्ताग्निनादीर्घवत्तरू?ध्व।
पुरुषाकृति। धूमचन्द्रलतादि विशेषैनाभासभेदाभिद्यते एव।
१९॥

अथान्यथापि वणायति॥

ॐ तथैव सर्घटद्रव्यकाञ्चनोज्ज्वलतादयः।
आभासभेदाभिन्नार्थं कारिणस्ते पदं ध्वनेः॥ २०॥

तथा च घटदुव्योनामकेनापि जलानयंनार्थं। केनापि न यनार्थं च केनापि नदीपान प्रतरणार्थं च केनापि कस्यापि घटाभावात्तदर्थं च। केनापि मलापहरणार्थं च। तथा च काञ्चनमपि। केनापि कटकार्थं। वात्तण्डलार्थं। केनापि मुद्रिकार्थं। केनापि परार्थमित्यादिना। एवमुज्ज्वलनीलपीतादयः। कस्यापि वस्त्रार्थं। कस्याप्यन्यदर्थमित्येवमादय आभासभेदाभिन्नार्थकारिणो मताः। परंतु ध्वनेः शब्दव्यापारस्य पदं शूनं। तेनै च तत्प्रवृत्तेरिति भावः परंतु तेषामाभासभेदान्नियतार्थक्रिया ॥ इति वदति॥ स्वयेन॥

५०अ) ॐ आभास भेदा स्वस्थानां नियतार्थ क्रियापुनः।
सामानाधिकरिण्येन प्रतिभासादभेदिनाम्॥

ॐ मृथस्दीपप्रकाशानां स्त्रोतमांसागरे यथा।

अविरुद्धावभासानामेककार्या तथैक्यधीः॥ २२॥

अयं घटः। अयं पटः। इदं नीलं। इदं च मीतं॥ इत्यादि नानात्वेन यदेतद्विश्वमाभाति च। तन्नियतार्थ क्रियामात्रमेव। नियतार्थ क्रियामात्रमेव हि प्रयोजनं विधेरवन्ध्ये स्फतयेति स्थितम्॥ यदा च सर्व मेतदभिधेयं प्रमेयताधि रूढं, पृथग् भूतमनुभवयथाधि रूढमनुभविन्दतान्तत्मग्रं चिन्मयमेव स्वप्रकाशैक वपुषं सामानाधिकारिण्येन स्थित सदभेदिनं नियतार्थ क्रियामात्रभग्नवृत्तमपि सर्वस्यास्य चिन्मयत्वेन स्फुरणात्॥ तदेव च दर्शयति॥ यथा दीपादि प्रकाशानां। प्रकाशान्तवर्ति प्रकाशान्तरितप्रकाशसंचयानां यथैक्यधीः ऐक्यधियैव हि प्रकाशानां दीप इति संज्ञया परिनिष्ठित घटादि नाना वैचित्र्यात् भिन्नानां च तेषां तथा त्वावगमा भावात्। एवं च मागते समुद्रादौ स्रोतसां च। एवं च तेषामविरुद्धावभासानामेकाधीः। दीपोयमिति। प्रकाशकस्सर्वत्र॥ सागरोयमिति वा। स्रोतसामैक्यधी विषायाश्च ॥ अत्रायं भावः। आभासेन भेदविशेषधियानियतार्थ क्रियासामानाधिकारिण्येन चाभेद विशेषधियानियतार्थ क्रियेति हि स्थितम्॥ २२॥

५०ब्) ननु तत्स्थितमेव दृढतया बौधमतेन यदात्मनिरमनं। यश्च वस्थनां नियतार्थ क्रिया स्वाभाविका सा च भवत्येवा वश्यकतया तत्किंचिदात्मा परमेश्वरो नामयोनुभविता। इति हि स्थितं॥ इत्याह।

ॐ तत्राविशिष्टे वह्न्यादौ कार्यकारणतो ध्यताता। तत्तश्च दार्थताद्यात्मा प्रमाणादेकतो मतः॥ २३॥

यत्र धुमस्तत्राग्निर्यथा महानसः। पर्वतोयं वह्निमान् धूमवत्वात्॥ इत्येवमविशिष्टे वह्न्यादौ गन्धवती वा पृथ्वी। यत्र यत्र गन्धवत्त्वं। तत्र तत्र पृथ्वीत्वं॥ वाशीत स्पर्शवत्य आपः॥ इत्यादौ च कार्यकारण भावः। तथोष्णतादि च। पुरुश्च तत्त्तच्छब्दार्थयो द्वर्थमं वा। एकतः प्रमाणा देव स्वात्मनः प्रकाशस्वरूपादभिमतः। तेन विनासिद्धेरिति हि स्थितम्॥ जानाम्यहं, करोम्यहं गच्छाम्यहं। सुपाम्यहमित्याना कर्तृत्व प्रवृत्तेः॥ तत्सर्वमेवस्वात्मनो वश्यमिति कारण कार्ययोस्संगतेरिति भावः। तस्मादेकत एव प्रमाणादिति हि प्रोक्तमिति॥ २३॥

अत एव चाह॥

ॐ मातुर्देशादिकाध्यकान्तर भिन्ने स्वलक्षणे तात्कालिकी प्रवृत्तिः स्यादर्थिनोप्यनुमानतः॥ २४॥

तत्र मातुः प्रमातु स्वात्मनः। स्वलक्षणे स्वलक्षणा भासविषयेपि ज्ञाने तात्कालिकी प्रवृत्तिः स्वाभाविकसम्बन्ध संबद्धविषयत्वात्॥ एवं चानुमानतोपि॥ नह्यनुमानं नाम किंचित्प्रतिप्रमातृतया भवितुमर्हतीति सिद्धम्॥

५१अ) नापि च स्वलक्षणादौ प्रमाता स्वात्मनापि प्रकाशको भवितु मर्हतीति च॥ तत्स्थितोयं सर्वत्र प्रमातृ रूपोयमात्मानुभवितेति चालं॥ २४॥

इदानीमनेकप्रमा स्थित्यानेकानुभवत्वसिद्धावमितस्यैवानि वारितमेकप्रमातृत्वमिति दर्शयति॥

ॐ दूरान्तिकतयार्थानां परोक्षाध्यकतात्मना। बाह्यान्तर तयार्थानां व्यञ्जकस्यान्यथापिवा॥

ॐ भिनावभास च्छायायामपि मुखावभासतः। एक

प्रत्यवमर्शाख्यादेकत्वमनिवारितम् कुत्रचिद्दूरेण।

वियतिमतत्त्वी। कुत्राप्यन्ति केन च लोचनस्थाञ्जनवत्॥ परोक्षत्वं

नाम॥ वेदान्ति मतान्तर्भावि ब्रह्मवत्॥ अपरोक्षत्वं च।

घटोयमित्यादिवत्॥ वाध्य च शोषादि पीडा। आभ्यन्तरीमानमि

पीडा च॥ तथा व्यञ्जकस्य च लोचनादेरनत्व बधिरत्वादेः॥

एवमनेन भिन्नावभासच्छायामपि स्वात्मन एवानुभवितुः

प्रमातुरेकत्वमनिवारितमिति संबन्धः॥

तथा च। दर्पण बिम्बेषद्वन्नगरग्रामादि चित्रमविभागि।

भातिविभागेनैव च परस्परं दर्पणादपि चेति॥ तस्मादेवमेव॥

ॐ अर्थक्रियापि सहजानार्थानामीस्वरेच्छया नियता

साहितेनास्यना क्रियातोन्यथा भवेत् घटामानय घटं नय।

इत्याद्यर्थ क्रिया सहजान घटादेः। अपि तु

यद्यनुभवितायच्छेत्तत्मासिद्धा न तु स्वत इति परमेश्वर एव

सर्वत्र हेतुरिति सिद्धोयमुपदेशः

तस्मान्नघटभङ्गदिनान्यथाभवत्॥ २९॥

५१ब) ननु पदे तत्प्रोक्तं॥ आभासभेदाद् वस्थानां नियतार्थ

क्रिया॥ तत्कथं॥ शुक्त्यादौ प्रत्यक्षतया भातरजतादि
निवृत्तेरित्याह॥

ॐ रजतैक्यविमर्शेपि शुक्तौन रजत स्थितिः। उपाधि
देशासंवादाद् द्विचन्द्रेपि नभोन्यथा॥ अत्रायं भावः। यथा
घटस्य प्रवृत्ति निवृत्ति योग्यावस्थिति न च तथा शुक्ते रजतादि स्थितौ
॥ तत्र भ्रान्त्या रज्वां सर्पवत् वाकाचादौ जलादिवत्॥ भ्रमेस्तु
भ्रमादेव॥ न स्थितिरनुभवयोग्या॥ अन्यत्र च योग्या॥ इति स्थितोयं
लोकव्यवहारः॥ शुक्ताविदंरजतमिति भ्रान्तिः। तदनु भवे जाते
पश्चान्नरजतमिति बुद्धिः॥ यथा हि घटोयमिति
बुद्धिस्त्रिकालान्तर्वर्तिनी तत्र चाव्यभिचारयुक्ता इयं च भ्रान्ति
स्वभावा शौक्लादि गुणकृतमनो भ्रमानप्रमाणमिति तद्विदः॥
तश्चोपाधि देशसम्बन्धात्॥ यथा द्विचन्द्रेपि नभः स्थूलं॥ इति
सर्वदातमेव॥ २३॥

एवं परमेश्वरा यत्ता सर्वैव सृष्टिः प्रमातृप्रमाण
प्रमेयादि चित्रा॥ इति दर्शयन्नाह॥

ॐ गुणैः शब्दादिभिर्भेदो जात्यादिभिरभिन्नता
भावानामित्थमेकत्र प्रमातर्युपपद्यते॥

घटजातेः सर्वत्रा विशेषात्॥ शब्दादिभिश्च विशेषात्॥ अतो विशेषाविशेषाद्भावानामित्थमेकत्र प्रमातदुपपद्यते परस्परं भेदा भेदा विरोध इति भावः॥ २३॥

५२अ) इदानीं श्रीमच्छास्त्रादौ कर्तरि ज्ञातरि स्वात्मन्यादि सिद्ध इत्यादिना श्लोकद्वयेन यदात्मनः परमेश्वरस्य प्रमाणाद्य प्रवृत्तेः सर्वविश्वसाक्षी सर्वोत्तिर्णः सर्वप्रकाशात्मा बोधाबोधस्वभावो विमर्शात्मकचित्तवृत्तिः स्वात्मा परमेश्वर इति यत्प्रोक्तं तदिदानीमपि सिद्धि कृत्यैवमेवसंपुटीकरणाय पुनरप्येवमेव दर्शयन्नाह॥

ॐ विश्ववैचित्र्यचित्रस्य समभित्ति तलोपमे। विरुद्धाभावसंस्पर्शे परमार्थसंतीश्वरे॥ प्रमातरि पुराणे तु सर्वदाभातविग्रहे। किं प्रमाणं नवाभासः सर्वप्रमिति भागिनि॥ अप्रवर्त्तित पूर्वोत्रकेवलं मूर्भतावशात्। शक्तिप्रकाशेनशादिव्यवहारः प्रवर्त्यते॥ २३॥ अत्रायं भावः ॥ यथायं स्वात्मा सर्वप्रकाशात्मा न चास्य तथा प्रकाशकः कश्चित्॥ प्रकाशस्यान्यप्रकाशात्मकात्मकानुपत्तेः॥ अनवस्थादि दोषप्रसङ्गपातात्॥ तस्मात् सर्वप्रमितिभागिनि किं प्रमाणं

नामानुमानादि नवाभासविशेषः। किमपि न हेतुतयेति स्वात्मन एवानेन मुखमालिन्य स्फारकलङ्कः॥ न च तत्र किमपि लेशतोपि विकारेण शक्यविकारे इति॥ तस्मिंश्च विश्ववैचित्र्य चित्त्रस्य भित्तितलोपमे। आधारे॥ परस्पर विरुद्धानामभावसंस्पर्शे च। तथा च परमार्थसति। तथा चैश्वर्यादि गुणगणयुक्ते। प्रमातरि । तथादि शिद्धत्वेन पुराणे च॥ सर्वदा चाभातं विग्रहे च। न वा भासो विश्ववैचित्र्यव्यवहार हेत्वर्थं।

५२ब्) यत्र पूमस्तत्राग्निरित्यनुमानाख्यया प्रसिद्धः किं तत्र साधयेदित्यहोलोकनैपुण्यमिति॥ यश्च सर्वप्रमातास्या देव किं तस्यान्यः प्रमातादिकस्तत्स्थितावद्दष्टेरिति स्थितं॥ ननु तत्र भवद्भिर्यत् प्रत्यभिज्ञाख्यं शास्त्रं तत्प्रमाण स्थित्या परिणतं। आगमप्रमाणाख्यं प्रतीपमाभिमुख्येन
ज्ञानं प्रत्यभिज्ञानं
प्रत्यभिज्ञाख्यशास्त्रपाधेनाभिमुख्येन ज्ञानं भवत्येव॥
इति तदप्यसत्॥ तत्राप्राप्तेः॥ इत्याह॥ पूर्वमपि प्रोक्तं। इदानीमपि वदति॥ यदेतज्ज्ञानक्रियात्मकं शक्तिद्वयं वर्तते। तदेव तद्धर्म सहचरिणं। तेनैव चेदं भावो पमन्नस्य विश्वस्य व्यवहृति योगात्। तस्मात् तद् दर्शनेन तद्दष्टेरिति त एवदर्शयन्नाचार्यः प्रत्यभिज्ञाख्यं शास्त्रार्थं दर्शयति।

तस्मिन् ज्ञाते तज्ज्ञानावगतिश्चेति सिद्धं॥ तथा च। शक्त्या विष्करणेनेयं प्रत्यभिज्ञो पदश्यते॥ पश्चाश्च शक्तिप्रकाशेनेशादिव्यवहारः प्रवर्त्यंत इति च तस्माश्च। अप्रवर्तितपूर्वोत्र केवलं मूढता वशात्। शक्तिप्रकाशे नेशादि व्यवहारः प्रवर्त्यते॥ केवलं मूढभावा देव। पूर्वं न प्रवर्तितः। ज्ञानक्रियाशक्तिद्वयप्रकाशेनत्वेशादि व्यवहारः प्रवर्त्यते॥ इति स्थितं मलं चाति विस्तरेण। प्रकृतसमाप्तेरत्यवाच्यवाचकाद्य योगात्॥ तस्माद्यतो वा चोनिवर्तन्त अप्राप्यमनगा सह। आनन्दं ब्रह्मणो विद्वान्न विभ्येति कुतश्चनेति श्रूयतयोपि॥ अतीतः पन्थानं तवरामहिमावात्मान सयोरतद्यावृत्यायं

५३अ) चकितमभिधत्ते श्रतिरपि। सकस्यस्तोतव्यः कतिविधगुणः कस्य विषयः पदेत्वन्वाधीनेपततिनमनः कस्य नवच इत्यादितम्॥ २३॥

इति श्रीमत्मपर्त्यभिज्ञा कौमुद्यां भट्टारकाकृतायां क्रियाधिकारे तत्फलप्रमेयादि निरूपणं तृतीयमाह्निकं समाप्तिमगमत्॥ आदितः॥ १२०॥

इदानीं परमेश्वर एव कर्ता ज्ञाता स्वात्मा

परिपूर्णसच्चिदानन्द् लक्षणो नान्य इति स्थिरी कृत्य पुनरपि तत्कर्तृत्वमेव प्रतिपादयति॥

ॐ एष चारन्त शक्तित्वादेवमाभासयद्यमून्।
भावानिच्छावशादेषाक्रियातिर्मान्दताम्यसौ॥ एष परमेश्वरः। भावान् घटादीन्। अनन्त कर्तृत्वादि शक्ति चक्रसाहचारित्व भावेनाभासयति॥ स्वस्मत आन्तर्याद्वहिर्भावेन। घटोयमित्यादिना प्रत्यक्षीकरोति स्वेच्छोन्मेषप्रवृत्या॥ एषैव च क्रियानाम शक्तिरिति गीयते॥ असावेव च क्रियानित्मर्दता परमुहायाकथ्यते॥ निर्मादोत्वं चेश्वरस्य स्वाभाविकशक्तिरिति च कथ्यते॥ तथा च॥
यस्योन्मेषनिमेषाभ्यां जगतः प्रलयोदयौ। तं शक्ति चक्रविभवप्रभवं शङ्करं स्तुमः॥ १॥

यत्र स्थितं मिदं विश्वं कार्यं यस्माश्चनिर्गतं।
तस्यानावृतर्थ पत्वान्ननिरोधोस्ति कुत्रचित्॥ २॥

जाग्रदादि विचेदेपि तदभिन्ने प्रसर्यति।
निवर्तते निजान्नैव स्वभावादुपलब्द्धतः॥

इत्यादिना स्पन्दे॥

५३ब) ननुजडस्यापि कर्तृत्व शक्तिः परमार्थतो दृश्यत एव॥
यथाम्धदोघटदि दृश्यत एव॥ तथा च
बीजादत्थुरादिनानानाधान्यादि सृष्टिर्वा॥ तथा च॥
जडाज्जलरूपा
स्फुरकृतिन्दोस्तत्तत्क?पकशविकादिव्यापारैर्जन्नूत्पत्तिः। इति
किमीश्वरोनामकर्तृत्व शक्तिमान्कर्तेति गीयते॥ परस्यापि हि
जडादेस्तच्छक्तेः॥ इत्याह॥

ॐ जडस्य तु रसा शक्तिस्सत्ता पद् सतः सतः।
कर्तृकर्मत्व तत्त्वैव कार्यकारणता यतः॥ २४॥

जडस्य बीजादेर्यदि कर्तृत्वादि शक्तिः तथापि स्वान्तर्वर्ति
तत्प्रकाशमानतया तत्तत्प्रवृत्ति हेतोः। नतु स्वतः पश्चाश्छवा
कारेपि तत्त्प्रवृत्ति योगप्रसङ्गात्॥ नापि हि तद्दृश्यते
कदाचित्कथञ्चित्॥ तस्माद्युक्तं॥ साकर्तृत्व शक्तिः
जडस्यबीजादेर्थ या सतः सतः सत्ता॥ सा च कर्तृ कर्मत्व तत्रैव॥
कार्यकारणता॥ अङ्कुरबीजादेः॥ तत्कर्ता च परमेश्वर इति
भावः पाश्चात्य भाव्य इति स्थितम्॥ २४॥

यतश्चैवं॥

ॐ यदसत्तदसद्युक्तानामतः सत्द्वर्थपता सतोपि तपुनसत्ता लाभेनार्थोथ चोश्यते॥ २५॥

ॐ कार्यकारणता लोकेसान्तर्विपरिवर्तिः। उभयेन्द्रियवेद्यत्वं तस्य कस्यापि शक्तितः॥ २६॥

यदसत्। तदसत्। शशिविषाणादि वा स्थिरं घटादि चास्थिरस्मेव॥ तर्हि मत्द्वर्थ पतासतोवस्तुनो दृश्यते॥ घटादेरिव॥ सतश्च वस्तुनोन पुनः सत्ता तल्लाभे नार्थोन प्रयोजनं प्रयोजने सिद्धे पुनर्वैयर्थ्यात्॥

५४अ) अत एव हि तस्य कस्यापीश्वरस्यैव शक्तितः। लोकेकार्यकारणता सान्तर्विपरिवर्तिनः। उभयेन्द्रियवेद्यत्वं चान्तर्बहिश्चरर्थपेणो भयेन्द्रियवेद्यत्वेन वत्तत एव॥ परं तु परमेश्वरशक्त्यैव नतु स्वत इति भावः॥ अत एव परमेश्वर एवान्तर्बहिर्हेतुरितिकथ्यते॥ २७॥

ॐ एवमेकाक्रियासैषा सक्रमान्तर्बहिः स्थिता।

एकस्यैवोभयाकारा सहिश्णो भ?पपादिता॥

ॐ बहिस्तस्यैव तत्कार्यं यदन्तर्यदपेक्षयां। प्रमात्रपेक्षया

चोक्ताद्वयी बाह्यान्तर स्थितिः॥

ॐ मातैव कारणं तेन स चाभासद्वय स्थितौ। कार्यस्य स्थित

एवैकस्तदेकस्य क्रियोचिता॥ २८॥

एवमेकस्य वै परमेशस्यो भयाकारान्तर्बहिश्चरण स्वभावा

सहिष्णोश्चोप पादिता। सक्रमा क्रियाशक्तिः॥ तथैव

बाह्याभ्यन्तरीद्वयी स्थितिः प्रमात्र पेक्षयैव॥ तस्मान्मातैव

प्रमाता परमेश्वर एव कारणं द्वयी स्थितौ। तस्माश्चैकस्यैव

प्रमातुः क्रियो चितां। नान्यस्य जडादेत्वी जादेश्चेति

सर्वमतनिरासः। तस्माद्युक्तं कर्तरि ज्ञातरि स्वात्मन्यादि सिद्धे

महेश्वर इत्यादिना॥ २९॥

तथा चा परथापि।

ॐ अत एवाक्तारेपीष्ठोसिमितं परमेश्वरः। तदन्यस्यापि

बीजादेर्हेतुता नैवयुज्यते॥ ४१॥

गतार्थमेतत्॥ ४१॥

नन्वर्थारस्त्वास्तां। यदेतत्कुम्भकारो मृदादिसंगृह्य। घटादि ग्राह्यं स्वयमेव जनयति॥ तथापि किं तेन प्रमात्रादिना वापरमेश्वर हेतुना वा॥ इत्याह॥

ॐ तथा हि कुम्भकारोमावश्वैयैव व्यवस्थया। ततन्मृदादिसंस्कार क्रमेण जनयेद्धटम्॥ ४१॥

अयमत्रभावः॥ कुम्भान्मृदादि कार्यात्करोतीति कुम्भकारोनिमित्तः। ततन्मृदादिसंस्कारान् संस्कारविशेषान्जपयेत्। जनयति॥ ईश्वर व्यवस्थायैव यथेश्वरो गुणत्रयमयीं प्रकृति स्वामधिष्ठाय यथा क्रमेण वेद्यवर्गान्जनयति॥ एवमेवेत्यर्थः॥ परं तु तत्रापीश्वर एव निमित्त मात्रं। कुम्भकारस्यापि चित्द्वर्थ पयाबुध्यैव तत्तत्संभाविता कारनिष्पत्तेः। तविना सिद्धेरिति स्थितमेव पूर्वत्र ॥ अत एवात्कुरेपीष्ठो निमित्तं परमेश्वर इति॥ तस्मात्सर्वत्रा वस्थिते कार्यकारण हेतु हेतुमद्भावादौ निमित्तं हेतु तया

साक्षितया च परमेश्वर एव कारणं॥ तथा च॥ ईकारेन्ना?

शब्दं प्रधानादि न कारणं तस्माद्ब्रह्मणः॥ तथा च

वेदः॥ यस्मादन्यो न परोस्ति जातोय आविवेशक्त वनानि विश्वा

इत्यादिना ननुयोगिनस्तत्तत्संस्कारा * * * * * ? कथं जनयन्ति

संकल्पादिना इति पुनरप्यापतिता

परमेश्वरादन्यत्कारणसत्कथा॥ इत्यत्राप्याह च॥

ॐ योगिनामपि मृद्बीजेविनैवेच्छावमेन तत् घटादि जायते

तत्तत्स्थिर स्वार्थ क्रियाकरम्॥ ४२॥

अत एव योगिनोपि न किंचित् हेतुतव्येश्वरवत्॥ वदि च कुम्भकारादि

व्यर्थद्ध? तया मृदादिसंस्कारं विनैव स्वसंकल्पतया

योगिनां सृष्टि प्रभवप्रलयौ॥ तयापितो योगिनोपीश्वरी भावा

वलम्भनेनैव तत्तदा पाद्यन्ते। नतु तदवलम्भनने विना

जातेयोगिनः। परमेश्वरता दात्म्यं संपादित स्वरूपा इति हि

प्रसिद्धिः॥ तदिच्छा वशेन योगिनां यदेतद्धटादि जलानयनादि

प्रयोजन संपादकं यद्धटादि जायते। तदपीश्वरोर्थत्वैव॥ इति

तत्रापि महेश्वर एव हि कारणं॥ ४२॥

एतदन्यत्र वा कुत्रापि कार्यकारणतादि हेतु हेतु मद्वा? वादावपि

परमेश्वर एव कारणमिति वदति॥ न चान्यज्जडादि॥

ॐ योगिनिर्माणता भावे प्रमाणान्तरनिश्चिते। कार्यं हेतुः

स्वभावो वात एवोत्पत्ति मूलजः॥ ४३॥

ॐ रूपस्तत्तत्प्रमात्रेकवह्न्या भासादितो भवेत्।

परोक्षादप्यधिपते बूमाभामादिनूतनम्॥ ४४॥

ॐ कार्यमव्यभिचार्यस्यजित्गमन्यप्रमातृगात्। तदाभासस्तदा

भासादे वत्वाधिपतेः परः॥ ४५॥

तथा हि।

ॐ अस्मिन्मतीदमस्तीति कार्यकारणतापि या। साप्यपेक्षविहिनानां

जडानां न पपद्यते॥ ४६॥

कथमिति चेदुच्यते॥

ॐ न हि स्वत्मैकनिष्ठानामनुसन्धानवर्जिना॥

सदसत्तापदेप्येष सप्तस्यर्थः प्रकल्पते॥ ४७॥ कथमिति चेत्॥

ॐ परस्पर स्वभावत्वेकार्यकारणयोरपि। एकत्वमेव भेदहि
नैवान्योन्य स्वभावता॥ ४८॥

तथा च॥

ॐ एकात्मनो विभेदेन क्रियाकालक्रमानुगा।
५५ब) तथा स्यात्क *? तैवेवं तथा पर्णमत्तया॥ ४९॥

अयमत्रभावः॥

योगिनिर्माणता भावेनिश्चितेसति। वत्कार्याकारणादि मृद्घटादौ
। तत्रापि च हेतु हेतु मद्भवेनाभिमतसिद्धिः॥ परंतु चिद्रूपो
महेश्वर एव हि कारणमिति भावः॥ तथा च। वनं गतः * * *?
जाडादि पर्शतादौ पूमदर्शनादिनाग्निं परीक्ष्यते।
अस्यद्र?पर्वतेग्निनाव्याप्तो पूम इति॥ अस्य च कार्यमव्यभिचारि।
व्याप्तेः परस्परं तदाभासादौ
गोपालघटिकादावुष्णत्वादिना बहिर्निर्गतोयो धूमाभास * * *?
स्तत्राप्यधिपति ज्ञापकोन्य उष्णो * *? इति स्थितोयं परस्पर
व्याप्त्या कार्यकारणभावेन ज्ञाप्यज्ञापकभावादिना॥

तत्रापि च महेश्वर एवमाक्षितया ज्ञापक इति स्थितम्॥ तथा चान्यत्र। धूमेमत्यग्निरप्यस्ति॥

इति व्याप्त्यापियो विशेषस्सोप्यपेक्षाविहीनानां। स्वात्संनिष्ठा तथा पूर्वोव्यात्वान्नान्योन्यव्याप्ति सिद्धेरे शु?चस्य कारणं *? । एतद्वा कार्यमिति॥ यतो हि। कार्यकारणयोः परस्पर स्वभावत्वे सिद्धे तथैकत्वं॥ भेदेतु नैवान्योन्य स्वभावता। परस्पर ज्ञानज्ञेयादि व्यवहारः। सत्ततकदाचित् स्वात्मां स?निष्ठत्वात् ॥ तथा चैकात्मनश्च विभेदेसति क्रियाकलादि क्रमेण। तत्तथा परिणमत्तया कर्तृतेति तथापि किं॥ तत्परमेश्वरेकर्तरि ज्ञापके सिद्धे सर्वनिरवस्यमेवेति भावः॥ तथा च पूर्वं॥ नश्येज्जनस्थितिः। न चेदन्तः कृतानश्च विश्वरूपोमहेश्वरः। स्यादेकश्चिद्वपु ज्ञानस्मृत्यपोहनशक्तिसानित्यान्दिना॥ ४९॥

५६अ) इदानीं सर्व चैतन्निगमयितुं परमेश्वर एव सर्वत्र हेतुः कर्ता बोधाबोधस्वभावोनुभविता। स्मत्ता च सिद्धोयमिति दर्शयति॥ ते *? नाज न स्थितिरवेनश्येदिति दर्शयति॥

ॐ न च युक्तं जडस्यैवं भेदाभेदविरोधतः। आभासभेद एकत्र चिदात्मनि तु युज्यते॥ ५०॥

न हि जडाजडुस्य भेदेन केनापि। घटस्येव दण्डेन अभेदेनापि केन। घटस्येव घटेन। तण्डस्येव च दण्डेनपि॥ एतद्विरोधेना भास भेदोस्ति॥ घटः। पटः। इत्यादिना॥ सर्वेषां स्वात्मांशमात्र स्थितेन च भिन्नं भिन्नस्य ज्ञान हेतुरिति भावः॥ परंत्वेकत्र चिदात्मनि सिद्धेनुभावके वास्मत्तरि च सर्वं चैतद्घश्यमिति नयो?पि विरोधः॥ उदिते च भास्करे सर्वेषां दीपादीनां हेतुनामस्तत्गतत्वात्। तत्राप्राप्तपादत्वात्॥ तत्स्थितोसौ सर्वत्र सर्वदा हेतुम्महेश्वर इति सिद्धोयमुपदेशः॥ ५०॥

एवं सर्वत्र चिदेकत्वे सिद्धेपि। अहत्र रूपत्वेन॥ इदं भावोपपन्नस्य च विश्वस्याभासभेद् एव प्रमाणं स्वरूपं॥ तश्च चिकीर्षा लक्षणैकत्व परामर्शनेन विनानसंभवति॥ अहं करोमीत्यामर्शनेन विना॥ स ईक्षित बह्वस्यां प्रजाये येत्यादिना॥ तदेव च दर्शयति॥

ॐ वास्तवेपि चिदेकत्वेन स्यादाभासभिन्नयोः।
चिकीत्षालक्षणैकत्व परामर्शं विनाक्रिया॥ ५१॥

आभासभिन्नयोः। घटाघट। नीलपीतरक्तादि बोधयोः। अहं ककरोमीति परामर्शं विनान क्रियासिद्धिः॥ तदन्तरालवर्तित्वात्तस्याः॥ तस्यां वातस्येति युगपद्भावोन्योन्यं सिद्धः॥

५६ब) अनेनैव च विमर्शेन चिकीत्षा लक्षणं। ज्ञानशक्तिः। तदनन्तरं च क्रिया॥ इति ज्ञान क्रियात्मकं शक्तियुगलं परमेश्वरस्य जगत्क्रीडन स्थित्यर्थं सिद्धमेवति भावः॥ तथा च पूर्वं॥ ज्ञानक्रिये स्फुटी एव सिद्धे सर्वस्य जीवत इति। जानाम्यहं करोम्यहमिति च व्यवहारमात्र सिद्धत्वात्॥ इत्यनेन ज्ञानाधिकार क्रियाधिकार नीत्याज्ञानक्रिया शक्ति युगलं सिद्धमिति भावः॥ ५१॥

ततश्च तदेव स्फुटयति॥

ॐ इत्थं तथा घट पटाद्याभासजगदात्मना।
तिष्ठासोतवेमिश्चैव हेतुता कर्तृता क्रिया॥ ५२॥

घट पटादिना भासभेदेन यज्जगदाभाति॥ इदमित्यनेन॥ साचतस्येश्वरस्येच्छैव॥ सैव च हेतुता। सर्वत्र हेतुरुता।

वाकर्तृता च सर्वत्र कर्तृगुणवती च। सैव च क्रियेति॥ ज्ञानपल्लव स्वभावै व हि क्रियेत्युच्यते॥ तस्मादीश्वरादादाविस्फा। ततोज्ञानं। ततश्च क्रियेत्युच्यते॥ इच्छाज्ञान क्रियात्मकं शक्ति त्रयमाश्रित्य परमेश्वरः स्वयं प्रभाभावितनिशेष विश्वाकृतिर्मातृमानमेयादि कल्पनयाविभिन्ना कारेण विश्वमाभासयति॥ तथा यतो या इमानि रुता निजायतो येन जातानि जीवन्ति। यस्मिंश्च प्रलीयन्ते। यत्रभिसंविशन्ति। तद्विजिज्ञासस्व। तद्ब्रह्ममहद्योनिर्विश्वस्य॥ यो विश्व च क्षुहत विश्वतो मुखो विश्वतो हस्त रुत विश्वतस्मात्॥ वेदाहमेनं पुरुषं महान्तमादित्य वर्णं तमसः परस्तात्॥ अहमेवासमेवाग्रेनात्यद्यत्सदत्परं॥

५७अ) पश्चादहं यदेतश्चयो वशिष्यते सोस्त्यहं॥ यस्मादन्योन परोस्ति जातोय आविवेशभुवनानिविश्वाः॥ तथा च तन्त्रालोके॥

किञ्चयावदिदं बाह्यमन्तरोपायसंमतम्।
तत्प्रकाशात्मता मात्रं शिवस्यैव परं वपुः॥ १॥

नीलं पीतं मुखं दुःखं प्रकाशः केवलं शिवः।
अमुष्मिन्परमाद्वैते प्रकाशत्मनिकः परः॥ २॥

इदं द्वैतमयं भेद इदमद्वैतमित्युत।

प्रकाश वपुरेवायं भासते परमेश्वरः॥ ३॥

अस्यार्थसौ मुखं दुःखं बन्धमोक्षो चितिर्जडः।

घटकुम्भवदेक्यार्थः शब्दास्तेप्येकमेव च॥ ४॥

प्रकाशोप्यप्रकाशांशः कथनामप्रकाशतां।

प्रकाशमाने तस्मिन्वा वस्तुता कथमुच्यते॥ ५॥

अत एव प्रकाशोयमिति वादेत्रस्वस्थिते।

तरादावादिताः सत्यं विभिन्नज्ञानवादिनः॥ ६॥

प्रकाशमात्रमुदितमप्रकाशनिषेधनात्।

एकशब्दस्यनत्वर्थः सङ्ख्यादि व्यक्ति भेदभाक्॥ ७॥

नैव शक्तिर्महादेवी न परत्राश्रितो यतः।

न चैषशक्तिमान्देवो न कस्याप्याश्रयो यतः॥ ८॥

नैषध्येयो ध्यातृभावान्नध्याताध्येय वर्जनात्।

न पूज्यः पूजकाभावात् पूज्याभावान्नपूजकर॥ ९॥

न मन्त्री न च मन्त्रोसौ न च मन्त्रपिता प्रभुः।
नदीक्षा नदीक्षको वापि न दीक्षा वान्महेश्वरः॥ १०॥

स्थानासननिरोधान्घसन्धानावाहनादिकम्।
विसर्जनान्तंनास्त्यत्र कर्तृकर्मक्रियोज्झिते॥ ११॥

नसन्नचासत्सदसन्न चतन्नोभयोज्झितं। दुर्विज्ञेया हि सावस्था
किमप्ये तदनुत्तरम्॥ अलं चाति विस्तरेण
महागुरुभिर्किन्त?रयाप्रकाशि इति श्री
मद्भट्टारकानन्दनाथकृतायां प्रत्यभिज्ञाकौमुद्यां
चतुर्थमाह्निकं क्रियाधिकारे॥ ॥

क्रियाधिकारः समाप्तः॥

ॐ सुस्यस्तु? प्रजाभ्यः॥ ॥

५७ब) ॐ श्रीविश्वेश्वरायेष्थ? देवाय नमः॥ श्रीगुरवे नमः।
अथात आगमाधिकारश्चित्युते॥

ॐ शिवादिक्षिन्यन्तं यदमलपरिस्फुर्तिविलत्मुधाधारासारं
नियति विषयं यन्मयमपि। यदन्तः सृष्ट्यादि स्थितिलयपिधानादि
कलना तदाभासं वन्दे परमशिवशक्त्यात्मगिरिशम्॥ १॥

एवं ननुस्वलक्षणाभासमित्यादिना बौधमतादि
सन्तमसान्धकारे प्रवृत्ते। ततस्तन्मताधिकार प्रवृत्तये। यद्येव
मन्तर्गस्तवाकोर्थः स्यात्स्थायिनात्मनेत्यादिना
स्थणानिखनन्यायेन तन्मतान्धकारे दृढीकृते सति। ततश्च
तन्मतनिरासार्थं। न चेदन्तः कृतानन्त विश्वरूपो महेश्वर
इत्यादिना तन्निरस्य। ततश्च सहि पूर्वानुरूतार्थोपलब्ध्या परतोपि
सत्। इत्यादिना प्रचण्डभास्करोदयने
विमर्शात्मकविमर्शस्वभाव महमिति स्वरूपं दृढीकृत्य।
ततश्च तस्यैश्वर्यात्मकस्य ज्ञान क्रियात्मक शक्तिद्वय
संघट्टानार्थपंच। ज्ञान क्रिये स्फुट एव सिद्धे सर्वस्य
जीवत इत्यादिना शक्तिद्वय स्वरूपं च सर्वस्य विभाव्य। तदनु च
ज्ञानाधिकारे ज्ञानंधक्रियाधिकारे च क्रियां
तत्तदभिसन्धानदिशातत्तदभिसन्धाय॥ इदानीं क्रमप्राप्तं
परमोत्तमं शिवादिक्षिति पर्यन्त षट्त्रिंशत्तत्व
प्रोक्तलक्षणतात्पर्यतयागमाधिकारस्तदौ

पूर्वसिद्धशिवतत्वानुसिद्धज्ञान क्रियात्मकशक्ति द्वयलक्षण प्रतिपादनद्वारामातुरेव

५८ब्) तच्छक्ति द्वयं प्रोक्त लक्षणं सिद्धं॥ इति तच्छक्ति तत्वं प्रोक्तलक्षणं सिद्धं। तेन च प्रमाता स महेश्वर इत्यादिना प्रमाता महेश्वरः शिव इत्याख्यया प्रथितः प्रोक्तलक्षणः सिद्ध एव शिव इति प्रतिपादयितुमाह॥ ॥

ॐ एवमन्तर्बहिर्वृत्तिः क्रियाकालक्रमानुगा।
मातुरेव तदन्योन्या वियुक्ते ज्ञानकर्मणी॥ १॥

अन्तर्बहिर्वृत्ति प्रसरत्स्वरूपाया क्रिया। एव महं करोमि। एवं कुर्वे। एवं कृतमित्यादितायेन्तर्वा। बहिर्वा वृत्ति प्रसरः। बहि प्रसरणं। अहं पचामि। अहं करोमि। अहमेवेर्थं जानामि च तदेव। इत्येवं यो बहिर्वान्तः कालक्रमानुगतोपि प्रसारः। सच क्रिया ज्ञानात्मक एव। तद्वये न विना सिद्धेः। तद्वये चाहमित्यन्तः स्फुरद्रूपस्य प्रकाशमानवपुष आत्मन एव। न च बुद्ध्यादेः॥ बुद्ध्यादीनां यदीयैश्वर्यविप्रूतिठ्व्कृ?तकृत्यत्वात्। स्वतश्च जदुप्रायात्पाषणादिवत्॥ तस्मादन्योन्यावियुक्त अन्येन्यसंयुक्ते

सम्बन्द्ध ज्ञानक्रियेतस्येति संबन्धः यतस्स एव करोति। स एव च जानाति॥ अन्त इत्यनेन शिव तत्त्व शक्ति तत्व लक्षणं द्वधात्मना प्रतिपादितमिति सम्बन्धः॥ १॥

५८ब्) इदानीं क्रमप्राप्तौ सदाशिवेश्वरौ निरूपयति॥

ॐ किन्त्वान्तरदंशोद्रेकात्मादाख्यं तत्व?मादितः। बहिर्भाव परत्वेतु परतः परमेश्वरम्॥ २॥

अयं चक्रमः। अन्तर्ज्ञानशक्ति चुम्बितभावतया योन्तर्विमर्शः। अहमिति स्वरूपेणाहमस्मिकर्ता। स एव विमर्शः सादाशिव इति तत्त्वं। यां च बहिरात्मतया। एवमहं करोमीति स्थूलविमर्शात्मकस्वरूपेण श्वेर तत्त्वस्वरूपमिति तद्विदः इत्यनेन ज्ञानक्रियात्मकमेवेदं सर्वमिति तदिच्छैव सर्वत्र हेतुकमिति॥ २॥

तथा हि॥

ॐ ईश्वरो बहिरुमेषो निमेषोन्तः सदाशिवः॥ सामानाधिकरिण्यां च सद्विद्याहमिदं धियोः॥ ३॥

तस्यैव प्रभोर्बहिरुन्मेष ईश्वर इति तत्वप्रख्यातिः। इदं भावेन ॥ अन्तश्चोन्मेषः सदाशिवेति हानिमेषतनुहं भाव हेतुतया। च तद्व्यं तदधीनं तदुद्कृतमेवेश्वर सदाशिवमिति सम्बन्धः ॥ तयोश्चाहमिदं धियोः सामानाधिकरिण्येनाहन्तायामिदन्तास्पदत्वेनाश्रयि भावादहमिदं धियोः सद्विद्या। शुद्धविद्या स्वात्मनिविश्रान्ति हेत्वर्थं सर्वस्यास्यजगतोमाषासम्बिकावद्घटधानिकावश्च स्वरूपापत्तेरिति सिद्धम्॥ ३॥

ननु किं रूपेयं विद्या अतश्चैव माह॥

ॐ इदं भावोपपन्नानां भेदवर्ति मुपेयुषां भावानां
बोधसारत्वाद्यथा वस्ववलोकनात्॥ ४॥

ॐ अत्रापरत्वं भावानां मतात्मत्वनेभासनात्।
परताहन्तयाच्छादात्परापरदशा हि सा॥ अत्रायं भावः॥ बहिर्भावम्धसरणे तदभेदापत्तेः परा। तद्भेदापत्तेश्चा इत्येवं शुद्धविद्यालक्षणं॥ ॥

परापरेति * *? च प्रसिद्धा॥

५९अ) प्रसिद्धा। अत एवेयं शुद्धविद्या। अहन्ताच्छादाच्छुद्धं विद्यात्मकं स्वरूपं यस्याः। या च चतुः षष्ठि तत्रोक्त प्रथमभूमिका परस्वरूपा मयूराण्डरमवद्घटदानिकास्वरूपवन्माषाशम्बिका स्वरूपवश्च स्थिता श्रीविद्येतिगीयन्ते। साधकोत्तमैरिति॥ साचाहमावृत्याशिवतत्वादनन्तरं शक्तितत्वं यत्परमं शुद्धं विश्वोत्तिर्ण स्वरूपं सासैव॥ इदं भवोपपन्नत्वेन चाङ्कादनस्वरूपद्वाच्छक्तिरिति गीयन्ते शक्यतेन यागो तुमिति मिति शक्ति त द्विद इति निरस्तसममुभावेन शुद्धविद्येति कथ्यते॥ ५॥

इदानी महन्तेदन्तयोः स्वरूपप्राधान्येन तस्या एवद्वैविध्या तत्त्वै विध्येन तत्व द्वयं यद्बहिः प्रसृतं। तदेव क्रमप्राप्तं दर्शयति॥

ॐ भेदधीरेवभावेषु कर्तुर्बोधात्मनोपि वा।
माया शक्त्यैव साविद्येद्यन्ये विद्येश्वरा यथा॥ ६॥

विद्या तत्वे स्थितास्सर्वज्ञा सर्वकर्तारश्चेति विद्येश्वराः

बोधकर्तृता मयस्यपि भेदेनेक्षणं विद्येति कथ्यते। यतो मायाशक्तिरप्येषा विद्यैव संसारोत्तिर्णत्वात्। तत्रस्थाश्च मन्त्रेश्वर विद्येश्वरा इति स्थितम्॥ यतश्च मायाशक्तिरेव स्वरूपभेदविपर्यया भासमत्तामात्रेण विद्येति कथ्यते॥ एतदेव चापरश्लेकतात्पर्येण कथ्यते॥ ७॥ तथा हि॥

ॐ तस्यैश्वर्य स्वभावस्य पशतभावेप्रकाशिका।

विद्याशक्तिस्तिरोधानकरीमायाभिधापुनः॥ ८॥

संसारिणां स्वात्मन ऐश्वर्यस्यवेद्यवेदकभावेन यासाविद्येति कथ्यते। वेत्तिस्वंरूपमनयाविद्येति॥ तस्यैव च स्वातन्त्र्यस्य तिरोधान करीया सामायेति कथ्यते॥ अत एव पशतभावेति॥ इदं नीलं। इदं च पीतं। इदं च शुक्लमितियज्ज्ञायते। ततश्च तत्तत्त्वं ततश्च तदेवस्वात्मा भेदेन यज्ज्ञायते सा विद्या। साविद्येति कथ्यते॥

५९ब) एवं चेदं नीलं। इदं च पीतं। इदं च शुक्लमित्यादिनायज्ज्ञानं। तत्तत्वा ज्ञानेन स्वात्मैश्वर्यादि विज्ञानाभावास्य शक्तिर्विजृम्भते। सामायेति कथ्यते॥ इत्यनेन मायाविद्या तत्व द्वय स्वरूपं निर्णीतमिति भावः॥ ॥

तत्तिरोधानमेवस्फुटयति॥

ॐ भेदेत्वेकरसे भाते हन्तयानात्मनीक्षते। शून्ये बुद्धौशरीरे वा मायाशक्तिर्विजृम्भते॥ ३॥ यदा भावा भेदेन भासन्ते। देहादिचाहमिति प्रमातृत्वेन। तदामायाशक्तिविकास इति हि स्थितम्॥ अनात्मनि शून्ये। वा बुद्धौ। वा शरीरे च। अहन्तया चैक्षिते सति। सति च भेदे। इदमिदमित्यादिना। तस्मिश्चैकरसस्वरूपे भेदरसमयेन भासमानेसति। मायानामदत्ताश्रया कृतास्पदा स्पन्धते तरामिति भावः॥ ३॥

अतश्च समायावीस्वम्भाद्यतिरेकिणि प्रमेये। मातासत्। कालादि पंचकव्याप्त इति कथ्यते॥ तदेव च दर्शयति॥

ॐ यश्च प्रमाता शून्यादिः प्रेमेयेव्यतिरेकिणि। माता समेयः सत्कालादिकपंचकवेष्टितः॥ ९॥

अतश्च मायावित्वाद्यतिरेकिणि प्रमेये समातामेयंः सत् [मेयं जायमन्]। कालविद्या। कला। रग। नियतिभिर्व्याप्तश्च प्रोत एव च मायास्थुले पञ्च शाखा स्वरूपे वेष्टित इति कथ्यते। तेन च बद्धस्त्रणमपि कुब्जयितु मसमर्थ इति का कथा

स्वस्वरूपदर्शनादौ॥ इत्येतत्पूर्वं प्रसिद्धमिति भावः॥ ९॥

६०अ) नव? चयोत्रमेयः कालादि पंचकवेष्टितः प्रोक्तः पूर्वं।
सकंतिविधद्। इत्याह॥

ॐ त्रयोविंशतिधा मेयंयत्?कार्यकरणात्मकं।
तस्याविभागरूप्येकं प्रधानं सूलकारणं॥ १०॥

तत्रस्थूलसूक्ष्मत्व भेदेन कार्यकारणसंज्ञानि।
शब्दस्पर्शरूपरसगन्धाख्यानि पंच।
तन्मात्रसंज्ञानिकारणानि सूक्ष्माणि?॥ ५॥

तत्कार्याणि च पृथिव्यप्तेजो वाध्वाकाशसंज्ञानि च।
पंचस्थुलानि॥ श्रोत्त्रत्वदक्षिजिह्वा प्रासिकाख्यानि
पंचज्ञानेन्द्रियाणि। तथा वाक्राणि। पादपायपस्थाख्यानि
कर्मेन्द्रियाणि पंच। मनबुद्धिः अहङ्कार इति त्रिधान्तः
करणमिति त्रयोविशति भेदस्यकार्यकरणात्मनः प्रमेयस्य
सूलभूतैकाविभागा प्रधानाख्या सूलकारणं॥ तथा च॥
सूलप्रवृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त।
षोडशकस्तु विकारोन प्रकृतिर्न विकृतिः पुरुषः॥ १॥

तथा च प्रकृतेर्महांस्ततोहङ्कारस्तस्माद्गणश्च षोडशकः।
तस्मादपि षोडशकात्पंचभ्यः पंचभूतानि॥ इत्यादिना॥
इत्येन नस्थुल सूक्ष्मत्व भेदान्मेयपद्धतिः सिद्धा
सांख्येहतान्ते॥ १०॥

नन्वेवं सति किंकारणं किं वा कार्यमित्याह॥

ॐ त्रयोदशविधाचाथ बाह्यान्तः करणावली। कार्यवर्गश्च
दशधास्थूल सूक्ष्मत्व भेदतः॥ ११॥

पंचज्ञानेन्द्रिया।इ। पंचकर्मेन्द्रियाणि च।
मनोबुध्यहङ्कारा इति त्रयोदशविधाभ्यन्तर वर्ति
बाह्यवर्तिकरणावली॥ कार्यवर्गस्तु दशधा पारेणेति सिद्धं॥ ॥
पृथिव्यप्तेजो वाध्वाकामशब्दस्पर्शरूपरसगन्ध॥

६०ब) इति श्रीमदादिगुहगुहवरोत्पलदेवरचित
प्रत्यभिज्नाभट्टारककृत प्रत्यभिज्ञाकौमुद्यां
श्रीमदागमाविकारतिरूपणे प्रथममाह्निकं
तत्वनिरूपसम्पूर्णीकृतं भट्टारकेनतिशूभम्॥ ॥

ॐ विश्वेत्तीर्णं विश्वमयं वेद्यवेदं नवेदकम्। साकास च निराभासं पूर्णानन्दं प्रभुं स्तुमः॥ १॥

एवं शिवनिरिक्ष?त्यन्तं यज्जगदुल्लसितस्वरूपं। तश्च मादमानमेयादि *? शिभाजं। वेदकवेदनवेद्यापन्नं च। ज्ञातृज्ञान्ज्ञेयस्वभावं च कुत्राप्यहन्तृ पूर्णत्वभावनया पूर्णा चिद्विकासं। कुत्रापीदन्तास्पदतयात्रिपुटीकृताश्रयं च। तत्र तस्मिंश्चाधिकारिणष्केप्यहन्ताविमर्शात्मकाः। केप् चेदन्ताविमर्शात्मकाश्चेति प्रकाशयितुमिदानीमपरमाह्निकाधिकारमातनोति। शिवाक्षित्यन्तं विश्वं प्रविभक्तातत्तदधिकारो न भेदेन प्रतनोति॥

ॐ तत्रैतन्मातृतामातृ स्थितो हत्रोधिदैवतं। भिन्नप्रमेयप्रसरे ब्रह्मविष्णुव्यिवस्थितौ॥ १॥

तदेव सहन्तृतया पूर्णास्वरूपासर्वौस्वभावेन स्वात्मनि विश्रान्ति तया सर्वमिदमहमेवेति विमर्शात्मकतया

यत्रपूर्णतास्पदत्वं। तत्रास्य विश्वस्य। रुद्रोधिकारी। यत

अन्तर्मुखतया स्थित्याध हिर्मुखप्रसर्पणातितीयनेत्रो भवति

यतश्चरुक। संसाररोगं। कौमिगच्छामि। सुपामि। इत्यादि

प्रसिद्धं। द्रावयति। अन्तर्मुखत्वेन स्पृश्यत इति रुद्रः॥ तथा च॥

यदासंहाराख्यायां मधिष्ठातृ देवतात्वं

तद्रशासंपादनेन स्वोपासकलोकस्यतद्रशादानेन च।

तद्‌पशाख्यानावेशसमापन्नस्यस्वाभिमुख्यसंपादनेन च

भजमानो भट्टारक ईश्वर एव रुद्रोभगवान्। यो मायापदेपै

प्राणपानात्मक

६१अ) धर्माधर्मसूर्येन्दु दिननिशादिविमुक्तमध्यमज्योती

रूपप्रमातृस्वरूपस्पर्शादुर्मीलिततृतीयनेत्रो

भवतीत्यादिनाप्रोक्तमेव पूर्वगुरुभिः॥ ततश्च भिन्न

प्रमेयप्रसरेसम्पादनाभ्यामेनाधिष्ठातृ देवतात्वं भजन्।

ब्रह्मा॥ ततश्च प्रसृते भिन्ने प्रमेये तत्सन्तानं

प्रवहनलक्षणे प्रसरेधिष्ठातृ देवता विष्णुः॥ अत एव च तयोः

प्रमेय प्रसरत्त पश्येदं नीलमिदं पीतमित्यादिप्रकाशात्मनः

प्राधान्येनाहमिति

प्रधानदशावेशशून्यत्वान्नतृतीयनेत्रोन्मेलनम्॥ अयं

भावः॥ अहमित्यवमर्शस्वभावादधिदैवत्वं तृतृस्य

इदमित्यवमर्शे स्वभावाद्ब्रह्मविष्णु व्यवस्थितौ। न च

तयोरान्तरनिमेषोपि स्वाभाविक इति हि स्थितम्॥ १॥

अत एव हेतोश्च॥

ॐ एषप्रमाता मायान्धः संसारीकर्मबन्धनः॥ ततश्च॥

विद्याभिज्ञापितैश्वर्यचिद्घनो मुक्त उच्यते॥ २॥

ॐ स्वात्मा रूपेषु भावेषु प्रमाताकथ्यते पतिः। मायातो

भेदिषु क्लेशकर्मादि कद्द षः पशुः एष मायान्धः

संसारीजीवः कर्मबन्धनः कर्मणा॥ ३॥

बद्ध इत्युच्यते॥ एकदाचिन्तयन्। ततश्च कुर्वन्। तत्र चानुसरन्।

इत्थं। इत्थं चकुर्वन्। कर्मबन्धनः संसारीतिकथ्यते।

तदनन्तरं स आद्यदत्तोपदेशमाशेण

विद्याभिज्ञापितैश्वर्यश्चिद्घनश्चात एवमुक्त तत्रुच्यते योगी॥

अत एव चाहमिदं सर्वमिति भावयन् प्रमातृ

सर्वग्राह्यग्राहकादिभावराशिदृष्ठस्वस्वभावः

प्रमातापतिरिति कथ्यते। तर्पनन्तरमिदन्तास्पदत्वेन

मायातोभेदिषु प्रश्चरिति॥

६१ब्) तत्र योयं पशुभावः सयमलत्रयोद्भवः। मलत्रयदूषित
इति तदेव प्रकटयति॥

ॐ स्वातन्त्र्यहानिर्बोधस्य स्वातन्त्र्यस्याप्यबोधता। द्विधानवं
मलमिदं स्वस्वरूपापहानितः भिन्नवेद्यप्रमात्रैव
मायाख्यं जन्मभोगदम्। कर्तुर्यबोधेकार्मत्त मायाशक्त्यैव
तत्त्रयम्॥ ५॥

चिदात्मनोबोधस्य हानिः। तस्य च बोधस्याबोधता। एतत्
स्वस्वरूपापहाने द्विधाणवं मलमित्याहुः॥
आगमाधिकारिणः॥ ततश्च भिन्नवेद्यप्रथैवमायाख्यं
मलमित्याहुः। तदेव च जन्मभोगदम्॥ जन्मभोगयोतकारणमिति
अहं कर्तेत्यबोधेतु कार्ममलमित्याहुः। परं तु परमार्थतः।
एतदाणवमायीय कार्ममलाख्यं त्रिपुटीमयं समस्तं
मायाशक्तिमूलस्तम्भभूतं।
त्द्बीजप्रधानाख्यमित्याहुरागमवादिनः॥ ५॥

इदानीं पशूनां मलत्रयबद्धानां लक्षणं निरूपयति॥

ॐ शुद्धबोधात्मकत्वेपि येषांनोत्तमकर्तृता। निर्मिताः
स्वात्मनोभिन्नाभत्रातेकर्तृताद्ययात्॥ ६॥

वेद्यराशिविरक्त चित्तानामपि पूर्णाहन्ताकर्तृत्वशून्यत्वात्
स्वात्मनोभिन्नास्तेप्रतिपादिताः॥ पूर्णाहन्ता वैयर्थात्॥ अत एव
च कर्तृतात्ययादित्यादि च॥ ७॥

अत एव चात्येप्येवमेव॥

ॐ बोधादिलक्षणैक्येपि येषामन्योन्यभिन्नता। तत्रेश्वरेच्छा
भेदने ते च विज्ञानकेवलाः॥ ७॥

तेषां बोधादिलक्षणैक्येपि यदन्योन्यं परस्परं भिन्नता।
भिन्नत्वं। तेपि च भेदमया एव विज्ञानकेवला इति नामानापि
बाह्या एव॥ परवध्वरेफपातथैवतिर्मणात्?। ते
साङ्ख्यपुरुषप्रायाविज्ञानकला उच्यन्ते॥ ८॥

६२अ) इदानीं तत्दृष्टिमाह॥

ॐ शून्याद्या बोधरूपास्तु कर्तारः प्रलयाकलाः। तेषां

कार्ममलोप्यस्तिमायीयास्तु विकल्पितः॥ ९॥

शून्यैबुद्धौ शरीरेवा कल्पितेन भासीववा। इत्यत्र जडाजडस्वभावादहमिति चमत्कारयोगनेयत्कर्तृत्वं। तत्प्रलयाकलावधित्वं॥ प्रलये। अकलाः। कलातत्वो पलक्षितकारणकावरहिताः अबोधर्थपाः कर्तार इति॥ तेषां च कार्ममलोप्यस्ति। मायीयस्तवान॥ इतिविकल्पित एव॥ ९॥

इदानीं मायाख्य मलस्यविषयतां प्रतिपादयितुमाह॥

ॐ बोधानामपि कर्तृत्वजुषां कार्ममलक्षतौ।
भिन्नवेद्यजुषां मायामलं विद्येश्वरा यथा॥ ३॥

येषां कर्तृत्वमप्यहमित्येवं कार्मोत्तिर्णत्वेन। भिन्नवेद्यभात्त्वेन च तेषां विद्येस्वराख्यानां मायामलं प्रवर्तत एव॥ तदास्पदत्वात्॥ ३॥

अथ च॥

ॐ देवादीनां च सर्वेषां शुविनां त्रिविधं मलम्। तत्रापि

कार्ममेवैकं मुख्यं संसारकारणान्॥ ९॥

भाविनां संसारिणां॥

विद्येश्वरविज्ञानकलास्ततावन्नभाविनः

मायान्ताध्वातिक्रमात् प्रलयाकला अपि तथैव। ये च

मायातत्वान्तरिताश्चैतदन्तुरालवर्तिनःदेवादयश्च

स्थावरान्ताश्चतुर्दशधाशास्त्रेषु परिगणितास्तेसर्वेभाविनः

संसारिणः॥ तेषां च त्रय एवयगपर्मला इति सिद्धम्॥ परं तु

संसारकारणं मुखतया कार्ममलमेवेति सम्प्रदायः॥ तथा

च साङ्गाः॥ अष्टविकल्पोदैवस्तैर्यग्योनयश्च पंचविधो भवति।

सानुषकश्चैकविधोस्समासतो भौतिकः सर्ग इत्यादिना॥ ९॥

६२ब) इदानीं देवकीनां द्वैविध्यमाह॥

ॐ कलोत्वालितमेतषु चितत्त्वं वद्दतलयं?। अचिद्रूपस्य

शून्यादेर्मितं गुणतयास्थितं॥

ॐ तत्र च। मुख्यत्वं कर्तृता याश्च बोधस्य च चिदात्मनः।

शून्यदौतद्गुणे ज्ञानं तत्समावेशलक्षणम्॥ ११॥

देवादीनां संसारिणां यश्चैतन्यं कर्तृतां
यस्याप्राधान्यान्मलेन संविन्भागस्य निमज्जितत्वात्
कर्तृताम्यं चिद्रूपस्य तत्वं स्वातन्त्र्यं कलाख्येन
परमेश्वर शक्त्या उपोद्वलितं मलेनन्यकृतं शून्याददेह
पर्यन्तस्या मायाप्रमातुः सम्बन्धितद्गुणत्वेनाप्रधानत्वेन
स्थितं। यतोमितं। इदन्ता मन्नदेहादि शून्यान्त
प्रमेयभागनिमग्नत्वात्॥ एतदेव च तत्वं कलोद्वलितं न्यकृतं
शून्यादेरचिद्रूपस्यमितं। अत एव च गुण तया प्रधान तया
स्थितं सत्। अज्ञान पूमपटलेनन्यक्कृतस्वरूपत्वात्॥ एतदेव च
शून्यादेरहन्तृ रूपस्य स्वरूपं। देहादिप्रमातृत्वात्॥
अप्रधानं तत्र च॥ यदागुरुकृपया अहं कर्तृताया मुख्यत्वेन
बोधस्य च चिदात्म स्वरूपस्य च। मुखत्वेन। परमार्थत्वात्॥
शून्यादेश्चाप्रधान्याद्यज्ज्ञानं। तदेवसमावेशलक्षणं
॥ तत्समावेशयुक्तिरितिभावः॥ कर्तृता या मुख्यत्वं। अहन्तृ
रूपायाः अहं शून्यः। अहं देहः। अहं बुद्धिरित्यादौ
चाप्रधानभूते। एत देवविज्ञानमानन्दं ब्रह्मे ब्रह्मविदः।
ब्रह्मविद्ब्रह्मैव भवतीति श्रुतेः॥ एतदेव च विज्ञान
तत्समावेशलक्षणमित्याहुः॥ सा च समावेशदशेद्यभिधीयते॥
अहं कर्तृत्व प्रधान्नात्॥ ११॥

इत्ययं तुर्या? पातुर्या?तीता च तद्दशापन्नस्येति सिद्धम्॥ ११॥

६३ब्) इदानीं या इमा अवस्थाः पशोः प्रतिभासन्ते। ता अप्याह विज्ञानतुच्छ स्वभावत्वात्॥

ॐ शून्ये बुद्ध्याद्य भावात्मन्यहन्ता कर्तृता पदे।
अस?जारूपसंस्कारमात्रिणिज्ञेयशून्यता॥ १२॥

साक्षाणामान्तरी वृत्तिः प्राणादिप्रेरकामता। जीवनाख्याथवा प्राणेहन्ता पर्युष्ठकात्मिका॥ १३॥

ॐ तावन्मात्रस्थितौ प्रोक्तं सौषुप्तं प्रलयोपमं।
सवेद्यमपवेद्यं च मायामलयुतायुतम्॥ १४॥

शून्येबुद्धौ शरीरेवा। इत्याद्यहन्ता कर्तृत्वा भावे। अप्रत्यक्षेणचप्रमेयादौ ज्ञेय शून्यता। न किंचिदवेदिषमित्याद्युक्तेः॥ तदेव च सुषुप्तमिति कथ्यते। सैव चाक्षाणा मान्तरी वृत्तिः निरिन्द्रियव्यापारवृत्तेः। परं तु प्राणादेः प्रेरकत्वं च व्यापृतत्वमिति भावः॥ सैव च प्राणस्य जीवणाख्या मुर्यष्ठकात्मिका हन्ता हन्तृत्वमिति॥

पुहुष्ठकं च शब्दस्पर्श रूपरसगन्धाः।
मनोबुध्यहङ्कृतयः॥ त एतत्पुर्यष्ठके तस्या हन्तृ
रूपप्राधान्यात्तदवस्थायां एतावन्मातृरूपेज्ञाने
सौष्ठत्तं प्रलयोपममिति कथ्यते॥ सर्वत्र
प्रमाणप्रमेयादिवैयर्थ्यात्॥ तदेव च सवेद्यं। किंचिद्दर्शनात्
। अपवेद्यं च॥ अदर्शनात्॥ नकिंचिदवेदिषमिद्यदिना॥

६३ब्) परश्च सवेद्यत्वेमति। मायामलेन युतं। वावेद्यत्वे च सति
मायामलरहितमिति कथ्यते॥ एतदवस्थामात्रं पशोरिति
पूर्वविदः॥ १४॥

इदानीं तस्यैव च पशुस्वभावस्यसुप्रमिति कथ्यते॥

तदाह॥

ॐ मनोमात्रपदेप्यक्षविषयत्वेन विभ्रमात्।
स्पष्टावभासाभावानां सृष्टिः मुप्नपदं मतम्॥ १५॥

यत्र च मन अन्तः करण प्रवृत्तौ सद्यां स्पष्टावभासाः।
घटोयं। स्थूलोयं। नीलमिदं पीतमिदमित्यादिना ये वभासाः

। विभ्रमादक्षविषयत्वेन। सा चान्तरी सृष्टिः मुप्रमिति कथ्यते पशोः॥ १५॥

तत्र या च जागरे सर्वैं ज्ञानकर्मैन्द्रिया द्यैर्वा मनसाधिया च ज्ञानज्ञेयाधिकरण सृष्टिः प्रत्यक्षतया स्पष्टस्तभावा। इदमिदमित्यादिना। स्थिरा मन्यतया स्पष्ट स्वभावा। न च स्वप्नादि वदसत्यत्वेना स्पष्टस्वभावा॥ सा च सर्वप्रमातृणां जागर इति कथ्यते साधरणः॥ १९॥

पुनश्च॥

ॐ हेयात्रपीयं प्राणदेः प्राधान्यात्कर्तृतागुणेतद्धानो पचयप्रायमुखदुःखादियोगतः॥ १९॥

यत्राहं केत्मताया गुणत्वे सति। प्राणादेश्च मुख्यत्वे। तस्य च प्रमेय राशेर्हानोपचयप्रायमुखदुःखादि योमाद्यद्गुणत्व मुप्रधानत्वं कर्तृत्वस्य। तस्माद्धेतोर्हेयात्रयीयं। जाग्रत्मुपसुषुप्तादि रूपावस्थामनः क्षोभात्मिकेति सिद्धम्॥ १९ ॥

इदानीं तुर्यामभिव्यनक्ति सौषुप्तरूपेण वा तुर्यातीतां च॥

ॐ प्राणापानमयः प्राणः प्रत्येकं स्वप्न जाग्रतोर

तच्छेदात्मासमानाख्यः सौष्वप्तेविष्ववत्द्विव॥ १८॥

ॐ ऊर्ध्वोर्ध्वगम्युदानाख्यस्तुर्यगो रूतभूद्मयः।

विज्ञानाकलमन्त्रेशोव्यारोविश्वात्मकः परः॥ १९॥

६४अ) अत्र प्राण इति प्राणन रूपाजीवनस्वभावाचिद्रूपा स्थितिः।

जीवात्म परपर्याय इति॥ स च जागरे वा स्वप्ने प्राणापान मयः।

प्राणस्योर्ध्वाधोगमनवृत्या सा च वृत्तिस्स्वप्ने वा जागरे

समानैव समानवायुस्तुतस्चेदात्मा। तच्छेदवृती।

तदूर्ध्वगमनवृत्त्या॥ प्रवेशनिर्गमनाभासादि

वाश्यानघृतादिवन्नकिंचिदवेदिषमित्यादि वृत्त्यासुषुप्तादौ॥

तत्र प्राणापानवृत्या जागरस्वप्ने। ऊर्ध्वाधो गमनभावेन

प्राणस्या॥ समानेन च सौषुप्तादि वृद्या। तयोर्गत्यभावादिव॥

ततस्तयोश्चोर्ध्वमार्गेण प्रवहणं सकलस्यभेदस्या

भेदसारतयौ दानलक्षणं हृदयाद्विज्ञानकलादारभ्य

सदाशिवान्तं सा च तुर्यात्मिकादशा॥ यत्र

प्राणादीनामूर्ध्वमार्गप्रवहणं॥ ततश्च विलीने तु भेदे

सर्वस्या चराचरात्मकस्या भेदवृत्तेः प्राणादि वृत्तिवानरूपाविश्वात्मकपरशिवोदिता तुर्यातीतरूपा। यत्र च प्राण एवप्रमाता। प्राणापानसमानो दानव्यान रूपश्चेति सामानाधिकरिण्यागा॥ विज्ञानाकलश्चासौमन्द्रश्चासौ। ईशश्च सदाशिवेश्वर रूपोयोसाविद्युदानः॥ स एव हुतदुग्नायः॥ सर्वस्यास्य ज्वलनहेतुत्वात्। स एव च परोविश्वात्मकः॥ अत्रायं भाव॥

६४ब्) यदैतेप्राणादयः पचभिन्न स्वभावाः भिन्नकाराश्च? तदास्वस्वावृत्ति मवष्ठभ्यपरिस्पन्द मात्राश्रयाः तदा? च जाग्रत्। * *? सुषुप्तं। तुर्या। तुर्यातीता चेति पंचप्रकाराः॥ य च चार्विणीने विश्वेस्मिंज्जगति प्राणादीनां च सुषुम्णायाशास्तत्वेसति सर्वत्रैकः शुद्धः चान्तस्वरूपः परमार्थ उदेति। न तदाकपि कामना॥ तथा च सर्वतीत पदालम्भी पूर्णेन्दुशशिराशयो इत्यादिना॥ एवं तत्वाच्य सान्नास्मिनमेनाहमित्यपरिमेषण्। अविपधा द्विशुद्धकेवलमुत्पद्यते ज्ञानं॥ तत्र च। सस्यज्ज्ञानाधिगमाद्धङ्गदीनामकारणप्राप्तौ। तिष्ठति संस्कारवशाश्चक्रभूमिरिव मृतशरीरः। ततश्च प्राप्तेशरीरभेदेच रितार्थत्वात् विनिवृत्तौ।

एकान्तिकमान्तिकमुभयं कैवल्यमाप्नोति॥ इत्यादिना

साङ्ख्यशास्त्रेषु वितत्यवितत्यनिर्णीतमेव॥ तथा च। तमविष्ठात्र

भावेन स्वभावमवलोकयन्। स्मयमान

इवाम्तेयस्तस्ययं?कुसृतिः कुतः॥ १॥

तदास्याकृत्रिमोधर्मोज्ञत्वकर्तृत्वलक्षणः। यतास्तदेप्सितं

सर्वं जानाति शकरोति च। अयमेवोदयस्तस्य ध्येयस्यध्यायिचेतसि।

तदात्मता समापत्तिरिच्छतः साधकस्यया॥ ३॥

इति श्री स्पन्द॥

p. 65a) तथा च तन्त्रालोके॥ इत्थं विश्वाध्वविलयमयत्नेनैवलीयते

। भैरवीय महाचक्रेसंवित्तिपरिवारिते

ततस्तद्वाद्वविलयात्तत्संस्कारपरिक्षयात्।

प्रशाम्यस्भावयेश्चक्रं ततः शान्तं ततः शमण ततो

नन्तरं तत्संस्कारस्यापि परिक्षयाच्छान्तं। यावदन्ते

शमंतश्चक्रप्रशान्त्या शुद्धमेव

संविन्दात्रमनुसन्दध्यादित्यर्थः॥ २॥

अनेन ध्यानयोगेन विश्वं चक्रेविलीयते। तत्सविदिततः

संविद्विलीनार्थैवं भासते॥ ३॥

एवं प्रदक्षिणं विश्वं स्वसंविदिविलापयेत्। विसृजंश्च
ततोभूयः शम्बक्?भैरवतां ब्रजेत्॥ ४॥

शक्तयोस्य जगत्सर्वं शक्तिमांस्त्रमहेश्वरः। इति
माङ्गलशास्त्रेतु श्री श्री कण्ठोन्यरूपत्॥ ५॥

निजानन्देप्रमातृशमात्रे हृदिपुरः स्थितः।
शून्यता मात्रविश्रान्ते निरानन्दं विभावयेत्॥ ६॥

तत्रानन्दं प्रमेयं शपूरणासृ *?तिर्वृतः।
परानन्दनीतस्तिष्ठे दपानशशिशोभितः॥ ७॥

तदनन्तस्फुरन्मेय सङ्घट्ठैकान्तनिर्वृतः।
समानभूमिमागत्य ब्रह्मानन्दमयोभवेत्॥ ८॥

ततोपि मानमेयौघ कलनानासततत्परः।
उदानवह्नौ विश्रान्तो महानन्दं विभावयेत्॥

अत्रटीका च॥

इहं खद्द धो?गी पुराप्रथमसशून्यं। शून्यमित्युक्तं शून्यं च भावयेदित्युच्यते॥ अभावः समुदिष्ठो यत्रभावः क्षयं गत इत्यादिनि रूपितम्ब रूपेसंविदेकात्मनि॥

६५ब) शून्यतामात्रेविश्रान्ति माश्रित्य प्राणाद्युदयविश्रामधामनि हृदिविषयेनिजेनिरुपाधित्वात् स्वभाव भूत? आनन्दोयस्यैव विधप्रमेयाद्यं शान्तरापेक्षया प्रमातृ समात्रेस्थितः स्वात्मानमेवकेवलतया साक्षात्कुर्वन्नवस्थितस्सन्ननन्तरं प्राक्संवित्प्राणेपरिणतेति नीत्याप्रमाणात्मनः प्राणस्य कृदयाद्स्वदशान्तं रेचकक्रमेणोदये। कथञ्चिद्बहिरौन्मुख्यान्निरानन्दं निजात्प्रमातृ सम्मतादानन्दान्निष्क्रान्तं दशाविशेषं विभावयेल्लक्षयेदित्यर्थः॥ अपानात्मनि प्रमेयेपुनरुदयति परेण प्रमेयेन कृतमानन्दं विभावयेद्यतस्तत तस्या प्रमेयोदयदशाया मसौ परानन्दनिष्ठस्तिष्ठेद्यतोनन्तायेप्रमात्राद्यपेक्षया प्रमेयलक्षणा अशास्तत्कर्मकायेयं पुराणा तत्तदर्थग्रहणेन नैराकाङ्क्ष्यसैवपानंपीतिस्तेननिवृतिः

स्वात्ममात्रविश्रान्तोयस्मादपान एवाप्यायकारितया शशीतेन

शोभितः। पुरकक्रमेण ज्वा?

दशार्थव्दयंयावद्दशामविशयान इत्यर्थः॥ ततोपि हृदये

कुम्भकवृत्याक्षणं विश्रम्यतेषां समनन्तरो

ब्रानानीलमुखादिरूप तयानन्तानां प्रतिभासमानानां

मेयानामन्योन्यमेलनात्मायोसौसङ्घट्टास्तेनैकान्तेनाव्यभिच

अरेण निर्वृतस्मन्।

सममेवसमानमेयात्मनीकारात्मसारभूमिमासाद्यमेयेन

सम्रूपकृतत्वाद्बृंहितेन

ब्रह्मरूपोयोमायानन्दस्तन्मयोभवेदित्यर्थः॥ तदनन्तरमपि

मानमेययोः सूर्यसोमात्मनोः प्राणापानयोः य ओघः

प्रवाहस्तस्य याषड्कतारिवरारोहमेहस्राण्येकविंशति

रित्यादिनानिरूपित स्वरूपाः कलनाः। तासां ग्रासतत्परः।

तद्घटनपरायणोयौ॥

६६अ) मध्यमार्गेणोर्ध्वगामित्युणापानाद्यवान्तरक्षोभतया

विश्रान्तो महान्तं प्रमाणादि

दशाधिशायिनिनिरानन्दादिवैलक्षण्यादुर्कृष्टं

प्रमभ्रससमतमानन्दं विभावयेत्स्वात्ममात्रविश्रान्ति

रूपतया विमृशेदित्यर्थः॥ नन्वेवं परामर्शेनास्यकिं स्यात्

इत्याह॥

ॐ तत्रविश्रान्ति मह्येतिशाम्यद्यस्मिन्महाचिषि॥

निरुपाधिर्महाव्याप्ति व्यानाख्योपाधिवर्जिता नह्यत्रसंस्थितिः

कापिविभक्ता जडरूपिणः॥ यत्रकोपि व्यवच्छेदनौस्तियद्विश्वतः

स्फुरत्। यदनाह तसंवित्तिः परमामृतवृंहिताम्॥ यत्रास्ति

भावनादीनां नमुख्याकापि सङ्गतिः। तदेव

जगदानन्दसस्सभ्यशम्भु रूचिवान्॥ अस्मभ्यं शम्भुनाथ

आदिशत्॥ नपुनरेतदम्भाभिः स्वोपज्ञमेवोक्तमितिभावः॥ ॥

इत्यलमतिविस्तरेण महात्मना मुपदेशवाचोनापि विस्तृतया लोश्या

इत्यर्थः॥ तदात्मनां क्षोभप्रसङ्गात्॥ इत्येवं

जाग्रत्स्वप्नसुषुप्तादितुर्यातुर्यातीतपदस्थात्वं स्पष्टी कृतं

पूर्वगुरुभिः प्रसङ्गश्चास्भाभिः प्रोक्तं नदोशः॥

६६ब) इति श्रीमत्परमाचार्य

श्रीमदुत्पलदेवरचितप्रत्यभिज्ञाभट्टारककृतप्रत्यभिज्ञा

कौमुद्यां आगमाधिकारस्य द्वितीयमाह्निकं समाप्तिमगमत्

शूभमस्तु शिवभक्तानां नराणां च

त्रिकशास्त्रविदितत्त्वानां शिवशक्ति नरात्मनां त्रिकानां

परमार्थ विदां च दृष्टिपातोदयोस्तु सद्गुरूणां च स॥ ॥

न्वृदा॥

इदानीं ज्ञानक्रियाशक्ति द्वय मयं परमेश्वरं
विभाव्यहं सोयथाद्विपक्षी। इत्येतावताग्रन्थेनैतत्तात्पर्यं च
॥

इदानीं तत्स्वरूपस्यमहिमाचित्कृते पुनः पुनरपि च
पदेत्वन्वाचीनेपततिनमनः कस्यनव च इत्याद्युक्तत्वात्॥ पुनः
पुनस्तन्महिमावर्णनेवालभ्यात्॥ तथा च महिमात्वमपि
वर्णनीयशिष्ठतयाक्रमप्राप्तमिति महिमात्वं वर्ण्यतेध्वना
॥

ॐ स्वात्मैव सर्वजन्तुनामेक एव महेश्वरः
विश्वरूपोहमिदमित्यखण्डमर्शवृंहितः॥ १॥

परमेश्वरः स्वात्मा सर्वस्यास्य जीवतः।
आत्मखल्वविश्वमूलमित्यादि निरूपित यत्त्या भास्करबिम्ब
इवसर्वत्र व्यापी महेश्वरो ज्ञाताकर्ता हमित्यवभासमानः।
वेदकवेदनवेद्यरूपः। परमार्थ स्वभावोतिरिच्यते॥ तथा च।
जाग्रदादि विभेदेपि

६७अ) तद्भिन्नेप्रसर्पति। *? वर्तते निजान्नैव

स्वभावादुपलब्ध्यतः॥ अहं सुखी च दुःखी च रक्तश्चेत्यादि

संविदः मुखात्यवस्थानुस्यूते वर्तन्तेन्यत्रताः स्फुटम्॥

इत्यादिना प्रोक्तलक्षणः स्वात्मा महेश्वरः सर्वत्र चैक एव

विश्वरूपः। विश्वसाक्षी। अहिमित्यवभासमानः

प्रत्यक्षरूतस्वभावः प्रत्यक्ष एव क्रियादि गोचरः॥ तथा च।

यं जानन्ति जडा अपि। जलहार्योपियं विजानन्ति। यस्यैव च

नमस्कारः सकस्यस्फुटो न भवति कुलनाथः॥ तथा च वेदः॥

उतैनं*?पा अद्यशन्। उतैनमुदहार्यः। उतैनं

विश्वारूतानिसदृष्ठो मृडायातिन इत्यादिना॥ यः हस्तिनि द्विपिनि।

यो हिरण्यो गोष्ठश्वेषु पुरुषेष्वन्ता॥ इत्यादिना॥ स एव

चाहमित्यनेनैव निश्चित इति सर्वमवधातम्॥ अहमात्मा

गुडाकेशसर्वभुताशाय स्थितः। अहमादिश्च मध्यं च

भूतानामन्त एव॥ अन्तश्चरमि भूतेषुमुहायांविश्वतो

मुखः। त्वं यज्ञस्त्वं वषङ्कार

आपोज्योतीरमोमृतमित्याद्युक्तेः॥ अथवा बहुनोक्तेन किं ज्ञाने

नतवार्ज्वन। विष्ठभ्याहमिदं कृत्द्रुमेकाशेन स्थितो जगत्॥

६७ब्) तथा चैतन्य मात्मा॥ तत्तकानु *? नतु कवत्कार्यं

यागत्मपादयतीति न तु कः॥ जन्मद्यस्य यतोन्वयात्॥ ईक्षतेत्वा शब्दमित्यादि व कृत्यादे *? रासः॥ तस्मादात्मैव महेश्वरो यमिति स्वरूपः स्वत एवसिद्ध इत्यलं॥ १॥ इदानीं तदुत्पादनेकारण कार्यविभागोपि तत्र दर्शयति॥ तस्य च निमित्तत्वं॥

ॐ तत्रस्वसृष्टेदंभागे बुध्यादिग्माहकात्मना॥ अहङ्कार परामर्श पदनीतमनेन तत्॥ २॥

स्वेच्छपैव सृष्टेदं भावरूप एव सर्वस्मि कार्ये बुध्यादि सद्कुचद्रूपाहं भावग्राहकात्मना। हङ्कारपरामर्श पदं नितमनेन कर्ता परमेश्वरेण॥ अहं मनुष्यः। अहं पशुः। अहं वामनः। कृषः स्थूलः वामन इत्यादिना हङ्कार परामर्श पदं नितमिति भावः। परंतु सङ्कोचाहन्तन्तायातादात्म्येन। नतु शुद्धपरिपूर्णाहं रूपेण परमेश्वरवत्। तेपि स्युरितिभावः॥ २॥ तस्मदेव हेतोश्च॥

ॐ स्वस्वरूपापरिज्ञानमयोनकेः पुमान्मतः। तत्र सृष्ठो क्रिया *? भोगो दुःखसुखात्मकः॥ ३॥

तस्मात्पूर्वोक्ता पूर्णाहन्ता स्वरूपेणैव
स्वस्वरूपस्यापरिज्ञानादनिश्चित स्वभावादेकः पुरुषोनेक इति

६८अ) भासन रूपः प्रतिभाति॥ तथा च जन्ममरण करणानां
प्रतिनियमादयगत्प्रवृत्तेश्च। पुरुष बहुत्वं सिद्धं
त्रैगुण्याविपर्ययाश्चैव॥ १॥

सङ्घतपरारूत्वत्रिगुणादि विपर्ययादधिष्ठानात्। पुरुषोस्ति
भोक्त्या भावात्कैवल्यार्थं प्रवृत्तेश्च॥ ३॥

वत्सविवृद्धिनिमित्तं क्षीरस्य यथाप्रवृत्तिरज्ञास्य
पुरुषविमोक्षनिमित्तं तथा प्रवृत्ति प्रधानम्॥ ३॥

तस्मात्पुरुषोस्त्यनेकधा। इति साङ्ख्यशास्त्रे॥ परमार्थ
तस्तुनकश्चिदनेक इति निश्चितम्॥
चित्स्वरूपस्यानेकदर्शनानुपपत्तेः॥ परं तु तत्तद्देहप्राण
शून्य बुध्यादिकृताहं भावनया सङ्कोचग्रहणात्॥
तद्वशाश्चानेकोत्पत्तेरिति किमेतत्॥ तस्यैव च सृष्टौ भोजस्पदाय
क्रियानन्दौ॥ प्रमान्भोक्ता। एकानेक रूपः क्रिया भोगः॥
पचनादि रूपः॥ तस्यां क्रियायां सङ्कुचित रूपसत्वेनय

आनन्दः॥ अहो। अहो इत्यनेन तदपि स्थूल तयानहं भावनया च दुःखमेव। इमौ च तस्य क्रिया नन्दौ भोगः। परं तु दुःख मुखात्मकः॥ इत्यभावेव दुःखमेवेति तदर्थं ने एवदात्मन इच्छामात्रेण बहुस्यामित्यादिना। इति तदपि तद्स्फयैव॥ परं तुं जीवार्थं भोग इति कथ्यते॥ ३॥

६८ब) इदानीं पशोस्सक्त चितस्वभावस्य संकोचाकारेण पदार्थ दृब्द्ध?ज्ञानक्रियात्मकतया मत्वाजस्तमांस्ति प्रतिपादयितुमाह॥

ॐ स्वात्मार्थ येषुभावेषु पत्युज्ञानं क्रिया च या। माया तृतीये ते एव पशोः सत्वरजस्तमः॥ ४॥

श्रीमद्भगवतो विश्वेश्वरस्य प्रकाशविमर्शात्मकं पदेतज्ज्ञानक्रियाशक्ति द्वयं शुद्धाहं भावमयं। तदेवसङ्कुचद्रूपमविद्यामयं मायापरपर्यायं मायातृतीयं पशोः सत्व रजस्तमः स्वभावात्मकं गुणत्रयमिति कथ्यते॥ तथा च सत्वं लघुप्रकाशकमिष्ठमुपष्ठाम्भकं चलं चरजः। गुरुवरणकमेवतमः प्रदीपवश्चार्थतो वृत्तिः॥ इत्यादिना

साङ्ख्ये॥ तत्रज्ञानं नामाशुद्धं सत्वमिति कथ्यते लघु

प्रकाशकत्वात्॥ अशुद्ध क्रियात्मके चेष्टमुपष्ठम्भकं चलं

चरज इति कथ्यते मलाख्यया विद्यया वरण

कत्वाद्गुरुवरणकमेव तम इति व्यवहारादौ गुरुवरण

कत्वाद्वृहदाच्छादकत्वात्तम इति॥ इत्येतत्रयं शुद्धं

प्रभोरिच्छा ज्ञानक्रियात्मकं। आनन्दसत्वरज आत्मकं

तदेवत्रयं॥ तदेव चाशुद्धं मविद्यापि हि तं सत्वरजस्तम इति

पशोः पाशत्रयं। तैश्च बद्धो बद्ध इति कथ्यते॥ यतः प्रकाश

प्रकाशा प्रकाश। अप्रकाशमयत्वेन पशोरेतत्तयं॥ तदेव च

६९अ) प्रकाशविमर्शात्मकं परमानन्दात्मकं

चेच्छाज्ञानक्रियात्मकं शक्तित्रयमिति भावः॥ एतश्च

पुरस्तात्प्रतिपादयिष्यति॥ सत्तानन्दः क्रिया पत्युस्तदभावोपि

सापशोः। द्वयात्मा तद्रजोदुःखं श्लेषिसत्वतमोमयमित्यादिना

॥ ४॥

इदानीं प्रभुजीवयोरन्योन्यं भेद इति दर्शयन्नाह च॥

ॐ भेदस्थितेः शक्ति मतः शक्तित्वंना पदिश्यते॥ एषां

गुणानां करणकार्यत्वपरिणामिंआम्॥ ५॥

सङ्कुचितप्रकाशमात्रस्वभवोयं पुरुषो नास्य

चनैसर्गिकप्रमेय पद्धतिः॥ सृष्टिस्थिति संहारादौ तस्या

यत्स्वतन्त्र्यं हि स्यात्॥ ततस्तदभावात्तद्गुणा इति कथ्यते॥

सङ्गशन्गविभागत्वात्॥ तस्माद्भेद स्थितेः शक्तिमतः।

प्रमेयादीनां शक्तिमत्वं नामदिश्यते॥

गुणगुणिनोरिवसंयोगात्॥ नतु समवायात्॥ समवायस्तुप्रभुनेति

निश्चितं इत्यनेन संयोग एवद्वयोर्मल्लयोर्यथा॥ तयोश्च

संयोगोविभागश्चेति॥ प्रभुना चाविभाग्या

दुद्भुतानुद्भूतत्वं तत्र निश्चितमेव तस्य च विश्वस्य

तन्मयत्वात्॥ जीवादौ चातन्मयत्वादिति व्यवहृतमेव कथ्यते॥

निश्चितमित्यर्थः॥ तस्मात्पशोर्येषां गुणानां कारणेन।

कार्येण च परिणामिनामिनां

p. 69b) शक्तित्वं चना पदिश्यते॥ एते गुणा अस्यपशोः शक्तय इति॥

अपि तु प्रभुनास्वेच्छयोत्पदिता बहुस्यामित्यादि वृत्तातच्छक्तय एव

॥ शक्तिश्च शक्तिमाश्चैव पदार्थ द्वयमुच्यते॥ शक्तयोस्य

जगत्कृत्सशक्तिमांस्तु महेश्वर इत्यादिना॥ तदेतदेवनिश्चितं॥

परमार्थतस्तु तच्छक्तयोपि॥ परस्पर भेदानुपपत्तेः॥ तथा च

स्पन्दे॥ यस्मात् सर्वमयोजीवः सर्वभावसर्वसमुद्भवात्।

तत्संवेदन रूपेण तादात्त्यप्रतिपत्तितः॥ १॥

तेन शब्दार्थ चिन्ता स्वन सावस्थानयः शिवः। भोक्तैव भोग्यभावेन सदासर्वत संस्थित इति वायस्यसंवित्तिः क्रीडात्वेनाखिलं जगत्॥ संपश्यन्सततं युक्तो जीवन्मुक्तोन संशय इत्यादिना॥ भेदोपपत्या तच्छक्तित्वमावश्यकमत्मीकृतं सदैव॥ परं तु प्रकाशविमर्शा प्रकाशा विमर्शात्मक धतत्वेन विद्याविद्याख्यभेदेन च प्रतिभासान्नाभेदः॥ सजीवोमलगुण्ठित इत्यादिविमर्शात्॥ मायाविम्बोवशीकृत्यतां स्यात्सर्वज्ञा ईश्वरः। अविद्यावशगम्वन्यस्तद्वैचित्र्यादनेकधा ॥ १॥ नद्यांकी जा इवावर्ता च वर्तान्तर मास्तेर्थे ब्रजन्तोजन्मनोजन्मलभन्ते नैव निर्वृत्तिम्॥ २॥

तथा च। सत्कर्मपरिपाकान्ते करुणानिधिनोध्यताः। प्राप्यतीरतरुच्छायां विश्राम्यन्ति यथा मुखमित्यादिना॥

७०अ) तस्माच्छक्ति मतोभेद स्थितेः शक्तेः शक्ति मत्त्वं च ना पदिश्यते। एषां गुणानां। कारणकार्यत्व परिणामिणामिति सम्बन्धः॥ तत्स्थितमेतयोरेव परस्परभेद इति सिद्धम्॥ यश्च

स्पन्दे यस्मात्सर्वमयोजीव इत्यादिना। तश्च मलशुद्धौ। अविद्यानिवृत्तौ। गुणत्रयक्षये। स्थूलशरीरा हभा?वविलये। निर्वासने च सूक्ष्मशरीरे। गलिते च तथा कारणे। वेदक। वेदन। वेद्यैक्यता पत्तौ प्रशान्तमानससंपङ्कर्दभेदोपपत्तिः तथा च॥ यथा उञ्जादिषीकैवमात्मायुक्त्या समुघ्यतः। शरीरत्रितयाद्धीरैः परं ब्रह्मैव जायत इति जातदभावेहि कथमनयोरभेदोपपत्तिरिति सिद्धम्॥ इदानीं तदेव विभागयितुमाह॥

ॐ सत्तानन्दः क्रिया पत्युस्तदभावोपि सापशोः। द्वयात्मातद्रजदुःखं श्लेषिसत्वतमोमयम्॥ ६॥

एवं हि तस्यैस्वर्यस्वभावस्य याजगत्सर्जनरूपापारमार्थिकपरमास्वेच्छा। सर्वमेतदहं सृजामीति। बहुः स्यामित्यादिना स एव च तदैक्योदयः। परमार्थर्थ परसत्ता। सत्वमिति कथ्यते॥ तथा च सास्फुरत्ता महासत्तादेशकालाविशेषिणी। सैषामारतया प्रोक्ता हृदयं परमेष्टिन इत्यादिना॥ इत्थं विश्वसत्तायां सिद्धौ। स्वभावमवभासस्य विमर्शविदुरव्यथा। प्रकाशोर्थो परर्थोपि

स्फटिकादिजडोपम इत्यादिना प्रकाशस्य विमर्शात्म कत्वाद्यश्च

तत्र विमर्शश्च सङ्कैरैकरमतयासम्पादनविश्वस्य सा च

क्रियेत्युच्यते॥ तत्र प्रकाशविमर्शजगतां यदैक्यविवरणं तन

च स्वात्मन्यहमिति यः परमानन्दोदयस्म चानन्द इति कथ्यते॥

सर्वमहं ब्रह्मास्मि। ब्रह्माहमहं बीजप्रदोमत इत्यादिना

विमर्शोदयः परमानन्द इति वृथ्यते॥ एतत्त्रयं च पत्युः स्वयं

प्रभोः। परमेश्वरस्य * *? दिशक्तिगणयुतस्य सर्वतः

सञ्चारिणः। स्वात्मनः स्वस्वभावस्य।

प्रकाशविमर्शानन्दात्मकस्वैतत्स्वरूपमित्याहुः। आगमविदः॥

तदेतस्माद्यतिरिक्त च तदभावः। एद्दक्तत्ताभावः। सापि च

तमसा व्याप्ता सत्तापशोः। पशुस्वभाववैसत्तापि॥

तमसावृतत्वात् पुनश्चैतद्स्वयात्मातश्चाजः दुःखमेव॥ श्लिष्टे

परस्परमिश्रेमलिन्तेसत्वतमसीयत्र॥

इत्येतत्पशुप्रमातृस्वरूपमित्याहुरागमवादिनः॥ ६॥

इदानीं प्रमातृ तत्वमुपपाद्य। प्रमेयतत्त्वमपि तथा

प्रतिपाद्यते॥ * *?

ॐ येप्यसामयिकेदन्ता परामर्शभुवः प्रभोः। तेपि भिन्ना

विमिश्राश्च तथा चित्त्रावभासिनः॥ ८॥

ॐ तेतुभिन्नवभासार्थाः प्रकल्प्याः प्रत्यगात्मनः।

तत्तद्विभिन्नसंज्ञाभिःस्मृद्युत्प्रक्षादिगोचरे॥ ३॥

ॐ तस्या

७१अ) माधारणी सृष्टिगंशसृष्टपजीविनी। सैषाप्यज्ञातया

सत्यैवेशशक्त्यात रदात्मना॥ ९॥

ॐ स्वविश्रान्त्युपरोधाया चलया प्राणरूपया

विकल्पक्रिययातत्तद्वर्णावैचित्र्यचित्रया॥ १०॥

अत्रासामयिकत्वेन सर्वदात्वं धुनोति॥ तेसर्वदा प्रत्यक्षतया

स्फुट इति भावः॥ परामर्शभुवः परामर्शस्थानानि

आश्रयाणीत्यर्थः॥ ते चनीलादयः स्फुटतयाभिन्नाः

विमिर्शाश्च ज्ञानमत्तेभेदाभावप्रतिपत्तेः॥ तथा

चित्त्रावभासिनश्च। स्फुटत्या॥ तेपि च

भिन्नस्वरूपेणावभासार्थाः स्वरूपाः। प्रत्यगात्मनः

कूटम्कुस्यजीवस्यपशोर्थ अनारोपितं तत्त्वं कूटस्थ स्थत्वं॥

तत्तद्विभिन्नाभिर्घटपटादिनीलरक्तादि संज्ञाभिः।

स्मरणानुभवोत्प्रेक्षादिमोचरेविषयेषु॥ तस्य च पशोः

सृष्टिरीशसृष्टपजीविनी। ईश्वरकारणे नाहमितिभावतया

चित्रावभासयत ज्ञेयत्वात्। तद्दलब्ध तु चिश्च मत्कारविशेषाश्च

॥ तस्य च सृष्टिः प्रमाणप्रमेयादि व्यवहारतय प्रसिद्धा।

साचेशशक्त्या। ऐक्यावबोधेनाज्ञातया सत्यैव।

मायाविलापरितत्वात्॥ जगतोस्य प्रमाणप्रमेयादत्रीलानीलदेर्वा॥

तथा स्वविश्रान्त्युपरोधाया चलया। तथा प्राणरूपया।

७१ब्) स्वरूपविश्रान्ति लक्षण पादानै?श्वर्योपरोधप्रयोजनार्थ

सचलया। स्वस्वरूपेसदा *?आनत्वात् मायाख्ये॥ तत्रैव चाचलया।

प्राप्तः प्राणरूपया। पुनः विकल्प क्रियया तत्तद्वर्णवैचित्र्या च

त्वया॥ तत्तन्निलपीतादि वर्णवैचित्र्यचित्रया। तदसाधारणी सृष्टिः

पशोरेवनाश्यस्येति सम्बन्धः॥

तस्मात्तानाभासानीश्वरसृष्टानेवोपजीवयतीति

सर्वापाशवीसृष्टिरीश्वर सृष्ट्युपजीविरीति कथितम्॥ १०॥

तथा चान्यथापि च॥

ॐ साधारणोन्यथा चैषः सर्गः स्पृष्टावभासनात्।

विकल्पहानेनैकाग्र्यत्क्रमेणेश्वरता पदम्॥ ११॥

एषचैश्वरस्सर्गः साधारणः सर्वत्रनीलपीतादि

प्रसिद्धेस्साद्दश्यतया साधारणतया च॥ इत्येवं

साधारणत्वं॥ असाधारणत्वं च। द्विचन्द्रादि कुत्रापि

तद्दर्शनात्॥ दृष्टं चानूरमल्लेन शतचन्द्रं

नभस्तलमित्यादिना च॥ तथा यथा गन्धर्वनगरं। यथा

वारिमरुत्स्थूल इत्यादौ चान्यथा सृष्टिः॥ यतस्स्पष्टावभासनात्

॥॥ तत्रैतद्विकल्पहानेनैकाग्र्यत्वेन। सर्वमिदं

विश्वममृतमयमेकमनेकारविषयं रूढं रशान्तं।

चित्स्वभावं तत्स्वरूपं चेति विकल्पहानेनैकाग्र्यसम्पत्तेः

प्राहुत्भावात्क्रमेणेश्व ईतापदं। ईश्वरत्वापादनं।

माहेश्वरसंपद्विवृद्धिः॥

७२अ) तद्वृद्धौ चेश्वरत्व सिद्धिः॥ अत्रविकल्पहानिरेव

परमेश्वरसंपल्लाभे कारणं॥ यतः तत्संपत्तिश्च

विघ्नसंपत्तिकारण। विघ्नाना मुदयेश्वसम्पत्तेः प्रश्याव इति

विकप संपत्तिः तदभावेस्वसम्पत्ति प्रादुर्द्भावः॥ प्रोक्तो च॥

जातेदेहप्रत्ययद्वीपभङ्गे प्राप्तैकप्येनिर्गलेबोधसिन्धौ

अव्यावर्त्यैवेन्द्रियग्राममन्तर्विश्वात्मात्वं नित्यमेकोवभासि॥

अत्र क्रमेणेत्यनेन॥ विकल्पहानेनैकाग्र्यत्वलाभः। तल्लाभेन

क्रमलाभः॥ क्रमस्योल्लङ्घनेनिःशेषत्वे जातेपरम् पदेश्वरत्व

लाभः॥ तथा च साङ्ख्यः॥ प्राप्ते शरीरभेदे चरितार्थत्वात्

प्रधानविनिवृत्तौ॥ एकान्तिकमात्यन्तिकमुभयं कैवल्य माप्नोति

तथा च परमेश्वरता लाभे

हिसमस्तास्तन्निःष्यन्दमध्यस्सम्पदः प्रसर्पन्ति॥

रोहणलाभेरत्नसम्पद इवेतिशुभमस्तशम्भुनाथ पदारविन्दो

पासकानां तन्मयी भूतचित्तानां।

अतीतवर्तमानभविष्यदैकीभावना पदार्थानां परमपदा

रूढ हृदयानां

॥स्वात्माशस्थविश्वतदैक्यभावनापवित्त्रितहृदयानां।

श्रीशम्भुनाथभासकरसमुत्बलहृदम्बुजानामित्यलं॥ ११॥

७२ब) एवं सर्वत्र विकल्पेनिवृत्ते। दृष्टेसमत्वेस्वपरविभागयोः

मोक्षाव * *? महेश्वरतन्मयता मासाद्यसाक्षान्महेश्वर

एवेति प्रतोनति॥

ॐ सर्वो समायं विभव इत्येवं परिजानतः

विश्वात्मनोविकल्पानां प्रसरेपि महेशता॥ १२॥

नह्येवमात्मा जीवोपि पशुरिवबद्धः कश्चिदन्योस्ति। अपि तु

स्मयमान इवास्ते यस्तस्येयं कुसृतिःकुत इत्यादि निरूपित

युक्त्यायमेवमहेश्वरोनामसर्वमिदमवलम्ब्य सर्वस्यान्तः

समाविष्टः स्वात्मस्थगनशीलोसौ महेश्वर इति सिद्धः॥अ तथा च

॥ यस्मात्सर्वमयोजीवः सर्वभावसमुद्भवात्।

तत्संवेदनरूपेण तादात्स्य प्रतिपत्तितः॥ १॥

तेनशब्दार्थचिन्तासुनसावस्थानजाः शिवः। भोक्तैव

भोग्यभावेन सदासर्वत्र संस्थितः॥ इति वायस्य संवित्तिः

क्रिडात्वेनाखिलं जगत्। संपश्यन्मततंयुक्तो

जीवन्मुक्तोनसंशयः॥ ३॥

तथा च॥

गुणादिस्पन्दनिःष्यन्दाः सामान्यस्पन्दसंश्रयात्।

लब्धत्मलाभाः सततं स्युर्ज्ञस्यापनिपन्थिनः॥ ४॥

अप्रबुद्धधियस्त्वेते तेस्वस्थितिस्थगनद्यता?? पातयन्ति

दुरुत्तारेघोनेसंसारवत्मनि॥ ५॥

अतः मृततमुद्युक्तः स्पन्दतत्वविविक्तये। जाग्रदेवनिजां भाव

मचिरेणाधिगच्छति॥ ६॥

७३अ) इत्यनेन पथासर्वश्चायं ममैवविभव इत्येवं जानन्।
विकल्पमध्ये प्रसरन्नपि कोभाभावान्महेशता। महेश्वरता
दात्म्यन्महेश्वरोयमिति प्रवृत्तिरम्य॥ सर्वातीतपदस्थत्वादस्य॥
सर्वमिदमस्यविभवमिति श्रुतेः॥ अत एवचोक्तं॥
स्युर्ह्रस्यामरिपन्थिनः इति॥
तदेननाव्यस्याभावादन्योनकश्चिदस्ति नास्ति। न भूतः। न च
भविष्यति॥ सर्वस्यास्येतत्स्वरूपप्रथनात्॥ नान्यापन्थाविद्यते
यनाय। योदेवेभ्य आतपते। योदेवानां पुरोदितः।
पूर्वोयोदेवेभ्यो जातो। इत्यादिना॥ हिरण्यगह्यः समवर्तताग्रे
भूतस्यजातः पतिरेक आसीत् इत्यादिना च॥
अहमेवासमेवाग्रेनान्यद्यत्सदसत्परं पश्चादहं यदेतश्च
योवशिष्येन्तसोस्म्यहम्॥ सर्वस्य चाहं हृदिसन्निविष्टो मत्तः
स्मृतिज्ञानमपोहनं च। वेदैश्च
सर्वैरहमेववेद्योवेदान्तकृद्वेदविदेवचाहमित्यादिना॥
अहमात्मागुडाकशसर्वभूताशयस्थितः। अहमादिश्च
मध्यं च भूता नामन्त एव च॥ नाहमस्मिनचान्योस्ति ध्येयं
चात्र न विद्यते॥ आनन्दपदसंलीनं सररसमरसीगतं॥
योविश्वचक्ष? रुतविश्वतो मुखोविश्वतोहस्त रुतविश्वतस्मात्।
सत्वाहुन्यां नाग्रतेसंयजत्रैत्व्यवापृषिव्यो?जनयन्देव एकः॥

इत्यादिनास्य सर्वमिदं स्ववपुश्चतं। भासते च भाति
चेतिस्तर्थं

७३ब्) एवमनेन प्रकारेणैतदप्येवमेव॥ इत्याह॥

ॐ मेयं साधारणं मुक्तः स्वात्मभेदेन मन्यते।
महेश्वरोयथा॥ बद्धः पुनरत्यन्त भेदवत्॥१३॥

अयं चात्रभावः॥ यदेतत्साधारणं मेयं।
सदाशिवेश्वरादिक्षित्यन्तं तदेव सर्वमिदं स्वात्मा
भेदेनमन्यते तराम्॥ सर्वोयं भावराशिर्समैवविभव
इत्युक्तत्वात्॥ मत्तो विनिर्गतं विश्वं मध्येव प्रविलीयत इत्यादिना॥
अहमेवाक्षयः कालोदाताहं विश्वतोमुखः। मृत्युः
सर्वहरश्चाह मुद्भवश्च भविष्यतामित्यदिना॥ तत्र
यथामहेश्वरस्तथैव स्वात्माभेदेनविश्वमेतन्मन्यते॥अ यत
एवागतं विश्वं ततस्तत्रैवलीयत इति॥ अथैतद्विपर्ययेण बद्धो
प्रबुद्धतया स्थितः पुनरत्यन्त भेदवत्॥ अत्यन्त भेदमयः
पशुरिवप्रवृत्तोजगत्यस्थिन्निति सम्बन्धः॥ नद्यांकीजा
इवावर्तादावर्तान्तरमाश्तते। ब्रजन्तो जन्मतो जन्म लभन्ते नैव
निर्वृतिम्॥ इत्याद्युक्तदिशातेबद्धा इति कथ्यते॥ * *?न्ते

मायापाशवशीकृतं माणावादिपाशैरिति बद्धः॥

७४अ) अत एवात्यन्तभेदमयोपि। नीलंनीलमेव। पीतं पीतमेवं।

घटः घट एव। पटः पट एव। अश्वोपि अश्व एव।

इत्यादिनानाप्रवृत्तेरत्यन्तभेदवान्॥ तदप्रवृत्तो हि सर्वोयं

भावराशिर्मदभिन्नतया स्फुट इति कथ्यते॥

अत्वन्मयमेतदशेषमिदानीं भाति ममत्वदनुग्रहशक्त्या त्वं

च महेशसदैव ममात्मा स्वात्ममयं ममतेन समस्तां॥ १॥

स्वात्मनिविश्वगते त्वयि नाथे तेन न संसृति भीति कथास्ति॥

इत्यादिना पुरुश्च सकथं केन प्रकारेण विभाति॥ इत्याह॥ १३॥

ॐ सर्वथात्वन्तरालीनानन्ततत्वौघनिर्भरः।

शिवश्चिदानन्दघनः परमाक्षरविग्रहः॥ १४॥

स साक्ऽच्छिव इति। अहमिति स्वरूपतया

प्रथमानुस्वात्मन्यन्तर्ल्लिनेजगति तन्मयो तन्मययश्च

मयूराण्डरसवत् निर्भरितवपुर्विश्वात्मना

धृतशरीरःसर्वव्यापी व्यापकादि

करणरूपश्शश्वद्भासमानप्रकाशानन्दादि चिद्घनः

साक्षाच्छिव इति कथ्यते॥ परमाक्षरेणाहमिति स्वरूपेण॥

तत्रापिहि। अकारादि हकारान्ताक्षरमात्रादि
स्वात्मान्तर्णीनव्याप्त्याव्यापक स्वरूपत्वात्॥

७४ब) स्त?त्येतन्निष्कलं वपुः। ततस्ततोनन्त रूपत्या अ आ इ ई उ ऊ ऋ ॠ ऌ ॡ ए ऐ ओ औ अं अः। क ख ग घ ङ च छ ज झ ञ। ट ठ ड ढ ण। त थ द ध न। प फ ब भ म। य र ल व। श ष स ह। लं क्ष इत्यादि नाना वैचित्र्येण विरा *? पतया च भातं भासमानं भातिच परमार्थः ततश्च तास्ता विद्याः॥ यथा शिवादिक्षित्यन्त मण्डतया भातं भासमानं विभाति॥ तद्विसृष्टो च शक्तिः। सदाशिव ईश्वर॥ शुद्धं विद्यामाया। विद्या शिव काल कला राग नियतिः प्रकृतिः पुरुष मनः बुद्धिः अहङ्कार शब्दस्पर्शरूपरसगन्ध श्रोत्रं त्वक् चक्षुः। जिह्वा घ्राण वाक्पाणि पाद पायु उपस्थ आकाश वायुः तेजः आप् पृथ्वी चेत्यतो ब्रह्मादि पिपीलिकास्तं जगत् च च चरात्मकमिति भावः॥ इत्येवं परमाक्षरविग्रहवद्वैत प्रथासिद्धा॥ अथ च परमेणोत्कृष्टतमेनाक्षर रूपेणा विनश्यत् स्वभावेन विग्रहोविशेषण सृ?ष्टिस्थितिलयादि पंच कृत्यं॥ १४॥

एवमेन प्रकारेणे स्वरत्वे सिद्धे प्रत्यभिज्ञाख्या पनादिनाहेतुना। इदानीमधिकरणसिद्धान्त दिशा

सर्वमेतच्छास्त्रार्थं प्रबुद्धं प्रतिनियमयत्याचार्यः॥

यस्मिन्नर्थे सिद्धे॥ तदनुपायूत्यर्थान्तराण्यपि सिद्ध्यन्ति।

सोधिकरण सिद्धान्त इत्यादिना॥

ॐ एव मात्मानमेतस्य सम्यज्ज्ञानक्रियेतया।

पश्यत्यथेप्सितानर्थान्जानाति चकरोति च॥ १५॥

७५अ) एवमित्यनेन महेश्वरो यथा। ज्ञानक्रियावात्। यज्ञानाति।

वाकरोति। सृष्टिस्थिति। संक्यति पिधान। अनुग्रहादि रूपतया

पंचकृत्यमयः शिव इति व्यपदिस्यते चतुः षष्टि

तन्त्रमिमांसान्या यविस्तारादौ यथा। तथा यमपि सिद्ध इति

सिद्धे। परमार्थ रूपे। तदनुया यूनि च ज्ञानक्रियादीनि सर्वाणि

कार्याणिकारणानि च सर्वाणि सिद्धात्येवेति सिद्धन्तः॥ ईश्वरो हि

बहिरुन्मिषति च वानिमिषति च। तद्वत्॥ यथेप्सितान्। सृष्ट्यादीन्॥

ज्ञानक्रियारूपद्वयेन हंसवदुन्दीयते। उपविशति। गच्छति च

सर्वथा सर्वदा सर्वत्रेति निर्विवाददशापन्नस्य

निर्विवादमाहेश्वर स्वरूपख्यातिः अनन्तत्वोघनिर्भरा।

चिदानन्दपरिपूर्णा स्वभावा

महाव्योमात्मकचिद्ज्योतिरत्यन्तनिर्जादिनी षष्टिं शतत्वनिर्भरैक

वपूर्भासनरूपा चिदचित्परमार्थ स्वभावा। सदातना।

शाश्वते निजालया अस्ति मितसोमसूर्याग्निनेत्रा। सर्वनेत्राधिकृता सर्वधर्मोन्तरा चि *? जाप्लुष्टा परमाक्षरविग्रहा च ति हृदयगोचरमिति निर्विवादोय मुपदेशमार्गः॥ १५॥

७५ब) इत्येवं शास्त्रार्थः परमार्थ सारसङ्ग्रहः। न मयास्वकपोलकल्पित कृतः। स्वधियाकृत विमर्शनेन तत्तदर्थ्शीलकल्पितपरमार्थः। परं प्रत्युपकारार्थं प्रकटीकृतः॥ अपि तु यत्पूर्वगुरुभिर्यथा प्रतिपादितसारस्तथैव नियमिततत्वेन प्रतिपादितः॥ इत्याहापरश्लोकतात्पर्यसङ्ग्रहेन परं प्रति॥

ॐ इति प्रकटितो मया मुघट एषमार्गो नवै महागुरुभिरुच्यतेस्म शिवदृष्टिशास्त्रेयथा। तदत्रनिदधत्पदं भुवन कर्तृता माविशन्विभाव्यशिवतामयी मनिशमाविशन्सिन्च्य?ति॥ १६॥

इत्येवं मया। उत्पलदेवाख्येन परमाचार्यवर्यपूजितपदारबिन्दयुगलेन। एषमार्गः शैवः त्रिकाभिधः। अनुत्तरमार्गानुसारिपरमार्थः नवनव एवक्षणात्क्षणं। सुघट एव यस्मात्। प्रत्यभिज्ञाशात्रसङ्ग्रहेगुरुमुखाल्लब्ध परमार्थे शिवतत्त्व

लाभोवश्यं भावि। इति सुघट एव॥ अनशन कृच्छतप्तादि पंचाग्नि कर्मादि चान्त्रायणानुष्ठानादियक्याप्राणाभ्यास हेतुरुतया वाविना

७६अ) युक्ति मरामर्शात्। अत एवहेतोः सुघट इति। शास्त्रपठनसिद्धेः सिद्धत्वात्॥ एतश्च मया सुत एव न प्रोक्तं। विनाध्यानादि नैपुण्येन शास्त्र पठन सिद्धेः। सिद्धोयमुपदेशमार्ग इति॥ अपि तु महागुरुभिर्यथा [श्रीसोमानन्दपादैः] शिवदृष्टादि शास्त्रेषु पूर्वं प्रोक्तस्त। अनेन न ज्ञानादेरुत्पलदेवस्यहानिक्लेशतोपि यत्पूर्वैः प्रोक्तं सिद्धिकृतं स्यात्तत्प्रमाणमिति [तदेव]॥ यथा स्वयं भगवता ज्ञानादि श्रीभगवद्गीते मनिषदाप्रमाणी कृतं। तदेव सर्वत्र प्रमाणतरमित्याहुः। यद्यदाचरति श्रेष्टस्तत्तदेवेतरोजनः। सयत्प्रमाणं कुरुते लोकस्तदनुबर्ततेे॥ इत्यादि निरूपितशुक्त्या यत्पूर्वैरेव प्रतिपादितं तदेव प्रमाणमिति॥ अत एव महागुरुभिरुच्यते स्मशिव दृष्टि शास्त्रे यथेति युक्तमुक्तं॥ तस्मादत्र हेतोः निदधत्पदमत्र। अत्रैव कृता श्रयोयदिस्यात्। ऊहि भुवन कर्तृतामिवाविशन् महेश्वरवत्॥ स एव करोति। संहरतिय॥

७६ब) तत एव भुवनकर्तृतां शिवता मयीं विभाव्य॥

शिवस्वरूपां शिवस्वभावां विभाव्यनिश्चित्य।

सद्यस्तत्क्षणमेवाविशन् शिवतन्मयी भावं विभाव्य सिद्धति।

सिद्ध्येत्॥ कृतकृत्यो भवतिति युक्तार्थः॥ सम्बन्धार्थश्चायमेव॥

तथा च तन्त्रालोके॥

योगुरुः स शिवः प्रोक्तोयः शिवः सागुरुः स्मृतः।

उभयोरन्तरं नास्ति गुरोरपि शिवस्य च॥ १॥

तस्य शक्तय एवैतास्तिस्रो भान्ति परादिकाः।

सृष्टौ स्थितौ लये तुर्ये तेनैताद्वादशोदिताः॥ २॥

नावान्पूर्णस्वभावोसौ परमः शिव उच्यते॥

तेनात्रोपासकाः साक्षात्तत्रैव परिनिष्ठिताः॥ ३॥

तासामपि च भेदाशन्यूनाधिक्यादियोजनम्॥

तत्स्वतन्त्र्यबलादेव शास्त्रेषु परिभाषितम्॥ ४॥

एकवीरो यामलोथ त्रिशक्तिश्चतुरात्मकः।

पंच मुक्तिः षडाम्नाय सप्तकोष्ठविभूषितः॥ ५॥

नवात्मादशदिग्छक्तिरेकादशकलात्मकः।

त्वादशारमहाचक्र नायको भैरवस्त्विति॥ ६॥

एवं यावत्सहस्त्रारे निरसंख्यानेपि वाप्रभुः।

विश्व चक्रे महेशानो विश्वशक्तिर्विजृम्भते॥ ७॥

शक्तिश्च शक्तिमांश्चैव पदार्थद्वय मुच्यते।

शक्तयोस्य जगत्सर्वं शक्तिमांस्तु महेश्वरः॥ ८॥

तेषामपि च चक्षाणां स्ववर्गानुसमात्मना।

ऐक्येन चक्रशो भेदस्तत्र तत्र निरूपितः॥ ९॥

ए *? स्य संविन्नाथस्यह्यातरीप्रतिभाती *?।

सौम्यं वान्यन्मितं संविदूर्मिचक्रमपासते॥ १०॥

अस्यस्यात्सृष्टिरित्ये पासं विद्देवी तथोदितात्।

ध्यानात्संजल्पसंस्मिश्राध्यपाराश्चापि बाह्यतः॥ ११॥

तस्माद्विश्वेश्वरो बोधभैरवः समुपास्यते।

आवच्छेदानवश्छिद्यां भोगमोक्षार्थिभ्र्जनैः॥ १२॥

तेनाविच्छिन्नता सर्व रूपाहं ताप्रथात्मनः।
स्वयं प्रथम्यनविधिः सृष्ट्यात्मस्य च पूर्वशः॥ १३॥

पूर्वशः पूर्वभावि॥ १३॥

सोयमात्परमावृत्त्य स्थितोजडपदंमतः।
आवृता नावृतात्मा तु देवादिस्था वरान्तगः॥ १५॥

तस्य स्वतन्त्रभावो हि किंकिं यन्नविचिन्तयेत्।
तदुक्तं त्रिशरः शास्त्रे सबुद्ध इतिवेत्तियः॥ १५॥

तत्राद्ये स्वपरामश्शेनिर्विकल्पैधामनि।
यत्स्फुरेत्प्रकटं साक्षात्तदिच्छाख्यं प्रकीर्तितं॥ १६॥

यथा विस्फारित दृशामनुसन्धिं विनाप्यलं।
भतिभावः स्फुटस्तद्वत्केषामपि शिवात्मना॥ १७॥

भूयो भूयो विकल्पं शरिश्चयक्रमचर्वनात्।

यत्परामर्शमभ्येति ज्ञात्रोपाय तु तद्विद्धः॥ १८॥

यत्तत्तत्कल्पना कू?प्तबहिर्भूतार्थसाधानं।
क्रियोपायं तदाम्नातं भेदोनात्रापवर्गतः॥ १९॥

७७ब्) इत्येवं महागुरुभिस्तंत्रालोके वान्यत्र
वितत्यवितत्यप्रोक्तपूर्वं। तदत्रपि पूर्वप्रोक्तमेवात्रापि
निग्रदितं। तदस्मिन्निदधत्पदं। भुवनकर्तृतामाविशन्। ततश्च
शिवावार्थां विभाव्य॥ ततोनन्तरमनिशसाविशन्। ततश्च
सिद्ध्यति॥ कृतकृत्योभवतीत्यर्थः॥ १९॥

ननुयदेतत्पूर्वं प्रतिपादितं शास्त्रादावेव। कर्तरि ज्ञातरि
स्वात्मन्यादि सिद्धेमहेश्वरे। अजडात्मानिषेधं सिद्धिं वा
विदधीतकः॥ १॥

किन्तु मोहवशादस्मिन्दृष्ट वाप्यनुपलिक्षिते। शक्याविष्करणे
नेयं प्रत्यभिज्ञो पदश्श्त इति अनेनैतदेवोपलक्षते॥ कोनिषेधं
। वासिद्धिं कर्तुं शक्तयात्॥ तदत्रास्मिन्सृष्टेप्यनुपलक्षित एव।
तस्मात्तस्य ज्ञानक्रियाशक्ति द्वयाविष्करणेन
तद्रत्यभिज्ञोपदुसर्ग्य?त इति सम्बन्धः॥ इति किमेतदुक्तं

तदत्रनिदधत्पदं भुवनकर्तृता माविशन्विभाव्यशिवतामयी
मनिशमाविशन्मिध्यति॥ इत्यत्र किं सिध्यति। ज्ञानक्रियात्मकं
शक्ति युगलमिति चेत्॥ इत्यतः किंप्रतारकतामात्रतया
परमेश्वरसिद्धिः प्रत्यभिज्ञापठनादिनानुभवेनेति प्रोक्तं॥
इत्यत्राहाचार्यः॥ अत्रापरेप्रद्यवतिष्ठन्ते।

ॐ तैस्तैरप्युपयाचितैरुपनतस्तन्वाः स्थितोप्यन्ति
केकान्तोलोकसमान एवसपरिज्ञतोनरन्तु यथा। लोकस्यैष

७८अ) तथा नवीक्षित गुणरस्वात्मपि विश्वेश्वरोनैवालं
निजवैभवायन्तदियं तत्प्रत्यभिज्ञोदिता॥ २०॥

यथा कांचित्कामिनी। अहस्मि शंगलितव्यापारासती॥ परंतु
तत्कामुकध्यानतत्परमानमासन्। कथमहमनेनाश्लिष्यामीति।
कथमह मनेनवाचं संभाषे कथं वाह
मनेनोपविश्यामीति विनश्यद्व्यापारान्तुरासती चैतदेवस्मरतीति॥
तदनन्तरमेव दूतीसंप्रषणादि व्यापारेण।
वामदनलेखनद्वारावा। विरहक्षामी भवद्गत्रलतिकातिष्ठतीति
॥ तदनुयथा तथासविधवर्त्तिनि प्रियतमेसमीपं याते च।
जनसाधारणता पापादिते। पितृमातृभ्रातृसुतादि साधारणतया

तन्निकटवर्तिनि तद्गारावलोकनादि हृदयं न पूर्णता मभ्येति॥

तत्रापि रहः स्थानावेशाभावात्। यदाचदैव वशाद्रहः

संयोगेप्राप्ते यथा तथालिङ्गनादि अम्बनादिस्ततमतृनादिसिद्धौ

जातायां हृदयानन्दे जाते परमानन्दोदयोब्रह्मानन्द इतिथ्यते

॥ तथा च। अतिक्रुद्धः प्रकृष्टो वा किंकलीति वा मृचनि॥ धावन्वा

यत्पदं गच्छेत्तत्त्र स्पन्दः प्रतिष्ठितः॥ अत्राति प्रकृष्ठत्वं

महदानन्द तत्वेन लक्ष्यत इत्यर्थः॥ एवं मोहापसरणेसिद्धे

यथा परमानन्दोदयः। तथैवदेहाहंशुवेनष्टे

परमेश्वरता वाप्तिः॥ तथा च॥ यथा मुञ्जादिषीकैवमात्मा

७८ब्) युक्त्या समुच्यतः। शरीरत्रितयाद्धीरैः परं ब्रह्मैव

जायत इति॥ अथ च॥ जातेदेह प्रत्ययद्वीपभङ्गे

प्राप्तैकब्रनिर्मबोधोधसिद्धौ।

अव्यवर्त्यैवेन्द्रियग्रासमन्तर्विश्वात्मात्वं दित्यमेकवोभासि॥

इत्यनेन यावन्मोहस्तावदज्ञानबुद्धिः। मोहापसारेसिद्धे

सर्वं सर्वदा सर्वत्र भवत्येव॥ नायिकानायकयोरिव॥ इत्येवं

गुरुवचनाज्ज्ञानक्रियात्मकं शक्तित्वयं

परीक्ष्यतदनन्तरमेव तद्वारापरमेश्वरोत्कर्ष

हृदङ्गमीभावो जायते॥ तत्क्षणमेव पूर्णानन्द

स्वरूपाजीवन्मुक्तिः

समावेशाभ्यासरसेनपारमैस्वर्यविभूतिलाभेप्रत्यभिज्ञैव

परसिद्धिदायिनी मतेति सिद्धम्॥ तथा च तन्त्रालोके॥

तत्राद्येस्वपरामर्शे निर्विकल्पैकधामनि॥ यत्स्फुरेत्प्रकटं

साक्षात्तदिच्छाख्यं प्रकीर्तितम्। यथा विस्फारित

दृशासनुसन्धिं विनाप्यलम्। भाति भावः स्फुटः

तद्वस्केषामपि शिवात्मता॥ २॥

भूयो भूयो विकल्पं शरिश्च वक्रम चर्चनात्।

यत्परामर्शमभ्येति ज्ञानोपायं तु तद्विद्धः॥ ३॥

यत्तत्कल्पनाक्याप्तबहिर्भूतातासाधनं।

क्रियोपायं तदाम्नातं भेदो नात्रापवर्गतः॥ ४॥

यतोनान्या क्रियानाम ज्ञानमेवमितत्तथा।

रूढेग्रगान्ततां? प्रातिमिति श्रीगमसासने

७९ब) योगोनान्यः क्रियानान्यातत्वारूढा हि यामतिः।

स्वचित्तवासनाशास्त्यैसाक्रियेत्यभिधीयते॥ ६॥

स्वचित्तेवासनाकर्म मलसावाप्रसूतयः।

तासां शान्तिनिमित्तं यामतिस्संवित्स्वभाविका॥ ७॥

सादेहारम्भिभाह्यस्थतत्वव्राताविशायिनी।

क्रियासैव च योगः स्यात्तत्वानां चिल्लयीकृता॥ ८॥

लोकेपि किलगच्छामीत्येव मन्तः स्फुरैव या।

सादेहं देशमक्षांश्चाप्याविशतीगति क्रिया॥ ९॥

तस्मात्क्रियापिवानामज्ञानमेव हि मानतः।

ज्ञानमेव हि मोक्षाययुक्तं चैतदुदाहृतम्॥ १०॥

मोक्षो हि नामनैवान्यः स्वरूपप्रथनं हि सः।

स्वरूपं चात्मनः संविन्नान्यत्तत्र तुयः पुनः॥ ११॥

तस्मात् संवित्वमेवे तत् स्वातन्त्र्यं यत्तदप्यलम्॥

विविश्यमानंधह्वीषुपर्यवस्यति शक्तिषु॥ १२॥

तस्माज्ज्ञानक्रियेमोक्षायेति निजायः॥ तदनन्तरं

समावेशलाभोनेन ज्ञानक्रियात्मकद्वारेणेति शुभमस्तु

शम्भुनाथ पादारधिन्दयुगलप्रसृतरसपवित्रं हृदयानां

परमेश्वर *?क्तानामिति शुभमित्यलमतिविस्तरेण॥

७९ब्) इदानीमेच्छास्त्रस्य म * *?लतामास्वाद्य एतत्कत्पता चाप्याश्रोतव्या जनैः॥ यद्बुद्धिरीदृशीरीद्यश्विधशास्त्रकरण प्रवृत्ता सत्तमहान्माहेश्वराव तार एवंसिद्धोजयंति परोपकारपर इति स च क इत्याह॥

ॐ जनस्यायत्र सिद्ध्यर्थं मुदयाकरसूनुना।
ईश्वरप्रत्यभिज्ञेय मुत्पलेनोपपादिता॥ २०॥

आदितः॥ १९३॥

कश्चिदुदयाकरोनामशम्भुनाथ चरणारविन्द तत्परमानसपवित्रित हृदयो *? प्राप्तघूर्णपरमार्थ त्वेनाप्त प्रसादमात्रोत्पलदेवपुत्रमणि चेयमीश्वरप्रत्यभिज्ञाप्रतिपादिता। जनस्या यत्रसिद्ध्यर्थ स्गमतयास्वमातृसमीपमुपविश्यैव तत्प्रत्यभिज्ञा न यथा यत्नतयैयसनजनस्य समुदियादुदयं पानीति भावस्तदर्थमेव मुदयं यातीति भयः?॥ यत एव हि। उद्गतः परोमोक्षाख्योलाभो यस्मात्॥ तदुद्भूते

श्वरप्रत्यभिज्ञाशास्त्रेण हि परमामृतलाभोष्टसिद्धियुतो
महामाहेश्वरलाभ इति सिद्धोयं पूर्णः शास्त्र संग्रह
मार्गो गुरुकृपयैवेति शुभम्॥ ॥

आदितः॥ १९३॥

समाप्तेयं प्रत्यभिज्ञाकौमुदी॥ ॥

८०अ) ॐ वर्षेवेद् उपोधने थनश्रा?भसिष?क्षे च कृष्णे शुक्ले
तरेसप्तम्या खद्द पूष्णिसौभगयुतेकर्ते च लग्ने स्थिरे।

श्रीविद्यापदपद्ममेवनलसद्बुद्ध्यातितीक्ष्णाग्रया
श्रीभट्टारकस्वन्?परेण रचिता पूर्णीकृताकौमुदि॥ १॥

अत्रापरेषानिन्दन्तुह सर्वथास्तवर्तु वा।
परस्परं स्पन्धयन्त्रदास्यन्त्मुखण्डनानि च॥ २॥

अथवापि मनोमोहादाश्चर्येणादि संभुवा।
तथापि न च मोहानिन्न च चिन्तस्य संमदः॥ ३॥

पदार्थरचनां पूर्वगुरुभिः समुदीरितां।
विलोक्यप्रत्यभिज्ञाया विभ्यन्ति बुद्धिवज्जनाः॥ ४॥

तस्माद्विचारणान्हात्त पठनार्हा मनोहरा।
यथाबुद्ध्यानुसारेण शास्त्राणि प्रविलोद्य च॥ ५॥

प्रत्यभिज्ञाकौमुदीयां रचिता सुमनोरमा।
भूयात्स्वत्मोपकारार्थं प्रसङ्गद परत्र च॥ ६॥

क्रुयाद् विघ्नोघशान्त्यर्थं शम्भुनाथप्रसादतः॥
तत्प्रसादाद् रचित्तानां तत्समावेशमस्तुनः॥

शुभमस्तु प्रत्यभिज्ञापाठकानाम्॥ ॥

इति श्रीमदुद्पलदेवरचितप्रत्यभिज्ञायी सूत्रावलि श्रीमद्भिरव
आप्तरचितसूत्रविमर्शिन्यीः श्रीमद्भट्टारकसुन्दरीदासेनौ तु
जातिजन्मिनासाक्षाच्छङ्करावतार श्रीमच्छ्रीविद्यापारिजात
श्रीमच्छ्रीशङ्कराचार्यवर्य पुत्रमणिनाद्विशतसङ्ख्यायाः
श्लोकावल्याः विरचिताकौमुदी
प्रत्यभिज्ञाकौमुद्याख्व्यासमाप्ती कृतेति

शिवसम्भुसम्भुनाथसाधकानां

पराप्रामादमन्त्रोद्यत्समस्तपरमार्थतत्वानां पारमार्थ

विदांचेति शुभम्॥ ॥

प्रत्यभिज्ञाकौमिदीसमाप्ता श्रीमद्भट्टारकरचिता॥ ॥

सं ७४ श्रावणे कृष्णपक्षे सप्तम्यां रेवत्यां

सौभाग्यविष्कम्भे फङ्ग?योगे च। आच्चिके लग्ने च समाप्तिं गता

प्रत्यभिज्ञा कौमुदी॥ ॥

श्रीमच्छ्रीमद्गुरुदृष्टिपातलस * *?॥ ॥

शुभम्॥ शुभम्॥ शुभम्॥

ॐ ये पीष्ठ देवी सद्दृष्टिविलसत्तिक्षणबुद्धयः।

जयन्तिते महात्मानस्सर्वशक्ति विकस्वराः॥ १॥

शुभमस्तु सर्वत्र शिवशक्तिसामरस्यं॥